इति श्रीमहाभारते शतसहस्रिकायां संहितायामानुशासनिके

पर्वणि भीष्मस्वर्गारोहणं नाम द्विषश्चाशद्द्विशततमोऽध्यायः ।
श्रीकृष्णार्पणमस्तु । श्रीकृष्णार्जुनाभ्यां नमः । शुभमस्तु ।

Remarks—The Ms. is very old.

॥ भारतम् ॥

364. BHĀRATAM.

Substance—Palm leaf. Size—18″ × 1½″. Leaves—125. 19¼″ × 1½″—Leaves—73.

7—8 lines per page and 46—54 letters per line.

Script—Tamil Grantha. No. of Grathas—4600.

Colophon :

इति श्रीमहाभारते शतसहस्रिकायां वैयासिक्यामाश्वमेधिके पर्वणि वैष्णवधर्मशास्त्रे पश्चाधिकशततमोऽध्यायः । इत्याश्वमेधिकः समाप्तः । हरिः ॐ । शुभमस्तु । श्रीगुरुभ्यो नमः । श्रীकृष्णाय नमः । श्रीरामाय नमः ।

கஙயஉ ஐந பிங்கள ஐந வைகாசி மீ கயக உ குருவா ரம் பூரநட்சத்திரம் அவ எட்டுநாழிகை அ...... லெ வைஷ்ணவ தர்மசாஸ்திரம் முகிஞ்சுது. சங்கரலிங்கம்.

ग्रन्थोऽपि स्वकीय एव ।.

Remarks—The Ms. is old and very much damaged. It is written in a beautiful and neat hand.

|| भारतम् ||

365. BHĀRATAM.

Substance—Palm leaf. Size—14½″ × 2″. Leaves—36. 10 lines per page and 46 letters per line. Script—Malayāḷam. No. of Granthas—1035.

Colophon :

हरिः ओम् । शुभमस्तु ।

इत्याश्रम(वास)पर्वणि षट्चत्वारिंशोऽध्यायः । हरिः ॐ । शुभमस्तु । आश्रमवासपर्व समाप्तं सम्पूर्णम् । हरिः । ओम् ।

Remarks—This Ms. contains the Āśramavāsika-parva complete. It contains 46 chapters, while the printed book comprises only 41 chapters. One end of the Ms. is worn out. Three verses of the next *parva* are also seen after the colophon.

|| भारतम् ||

366. BHĀRATAM.

Substance—Palm leaf. Size—19″ × 2½″. Leaves—177. 9—11 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—6195.

Colophon :

इति श्रीमहाभारते शतसाहस्रिकायां संहितायां महाप्रस्था-

निके तृतीयोऽध्यायः । महाप्रस्थानिकं समाप्तम् । वेदव्यासाय नमः ।

स्वर्गारोहणपर्वणि चतुर्थोऽध्यायः ।

Remarks—This work comprises Āśvamedhika, Āśramavāsika, Mausala, and Mahāprasthānika *parvas* and five chapters of the Svargārohaṇa-parva. The numbers of chapters in Āśvmedhika and Āśramavāsa differ from those in the printed edition. The FF. comprising Āśvamedhikaparva are separately numbered.

॥ भारतम् ॥

367. BHĀRATAM.

Substance—Palm leaf. Size—12¼" × 2". Leaves—250. 8 lines per page and 50 letters per line. Script—Tamil Grantha. No. of Granthas—6250.

Colophon:

इति श्रीमहाभारते शतसहस्रिकायां वैयासिक्यां स्वर्गारोहणपर्वणि पञ्चमोऽध्यायः । हरिः ओम् । शुभमस्तु ।

Remarks—The Ms. begins from Āśvamedhika and ends with the Svargārohaṇa *parva*. The readings differ much from those in No. 366. The numbering of pages is in order except in the Āśramavāsa *parva* the pages of which are numbered from 51 to 119. This portion seems

to be a later addition. The Nos. of chapters differ from those in the printed books as in 366.

॥ भारतम् (सनत्सुजातपर्व विवरणोपेतम्) ॥

368. BHĀRATAM.

Sanatsujātaparva with Vivaraṇa.

Substance—Palm leaf. Size—13¼″ × 1¾″. Leaves—73. 6—8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1554.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

नमः पुंसे पुराणाय पूर्णानन्दाय विष्णवे ।
निरस्तनिखिलध्वान्ततेजसे विश्वहेतवे ॥

नम आचार्येभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यः । सनत्सुजातविवरणं संक्षेपतो ब्रह्म जिज्ञासूनां सुखावबोधायारभ्यते । स्वतश्चित्सदानन्दाद्वितीयब्रह्मात्मस्वरूपोऽप्यात्मा स्वाश्रययाव्यवस्थया अविद्यया स्वानुभवगम्यया स्वाभाविकचित्सदानन्दाद्वितीयब्रह्मात्मभावात् प्रच्युतोऽनात्मनि देहादौ आत्मभावमापन्नोऽप्राप्ताशेषपुरुषार्थः साभासया प्राप्ताशेषानर्थोऽविद्यापरिकल्पितैरेव साधनैरिष्टप्राप्तिमनिष्टपरिहृतिं चाकाङ्क्षन् लौकिकवैदिकैः साधनैरनुष्ठितैरपि परमपु-

रुषार्थं मोक्षाख्यमलभमानो मकरादिभिरिव रागादिभिरितस्ततः समाकृष्यमाणः सुरनरतिर्यगादिभेदभिन्नासु नानायोनिषु परिवर्त्तमानो मोमुह्यमानः संसरन् कश्चित् पुण्यवशाद् वेदोदितेनेश्वरार्थकर्मानुष्ठानेनापगतरागादिमलोऽनित्यत्वादिदर्शनोत्पन्नेहामुत्रार्थभोगविरागो वेदान्तेभ्यः प्रतीयमानब्रह्मभावं बुभुत्सुर्वेदोदितशमदमादिसाधनसम्पन्नो ब्रह्मविदमाचार्यमुपेत्याचार्यगुणानुसारेण श्रवणादिनाहं ब्रह्मास्मीति ब्रह्मात्मतत्त्वमवगम्य निवृत्ताज्ञानतत्कार्यो ब्रह्मस्वरूपोऽवतिष्ठत इति वेदान्तमर्यादा । एतत् सर्वं क्रमेण दर्शयिष्यति भगवान् सनत्सुजातः ।

वैशम्पायनः—

ततो राजा धृतराष्ट्रो मनीषी
सम्पूज्य वाक्यं विदुरेरितं तत् ।
सनत्सुजातं रहिते महात्मा
पप्रच्छ बुद्धिं परमां बुभूषन् ॥

धृतराष्ट्रः शोकमोहाभिसन्तप्तस्त'रति शोकमात्मविदि'ति वदतो वादमुपश्रुत्य ब्रह्मविद्यामृते शोकापनयनमशक्यं मत्वा—

"अनुक्तं यदि ते किञ्चिद् वाचा विदुर विद्यते ।
तन्मे शुश्रूषवे ब्रूहि विचित्राणीह भाषसे" ॥ . . . . . .

End :

तथाच श्रुतिः तेषामनुभवं दर्शयति—"तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदे" इति बृहदारण्यके । "एतत् साम गायन्नास्त" इति तैत्तरीयके सामगानेन स्वानुभवो दर्शितः आत्मनः कृतार्थत्वद्योतनार्थम् । तथा छान्दोग्येऽपि । तलवकारे चाहमन्नमन्नमित्यादिना विदुषां भोक्तृभोग्यरूपं जगत् स्वात्मव्यति-

रेकेण नास्ति इति स्वानुभवो दर्शितः । तत्रैते श्लोका भवन्ति—

नित्यशुद्धबुद्धमुक्तभावमीशमात्मना
भावयन् षडिन्द्रियाणि सन्नियम्य निश्चलः ।
अस्ति वस्तु चिद्घनं जगत्प्रसूतिकारणं
ननश्वरं च तद्भवं तमस्तमोनुदं च यत् ।
तत्पदैकवाचकं सदामृतं निरञ्जनं
चितवृत्तिदैकसुखं तदस्म्यहं तदस्म्यहम् ॥

Colophon :

इति श्रीमद्भगवत्कृष्णद्वैपायनप्रणीतसनत्सुजातविवरणे भगवत्पादकृते चतुर्थोऽध्यायः ।

इदं सनत्सुजातीयं पद्मनाभेन लिखितम् ।

ശ്രീ കൃകൂഌതംപത്തുമൂന്നാമാണ്ടു ഇടവമാസം മൂന്നാംതീയതി എഴുതിതീൎത്തു. श्रीनारायणाय नमः ।

Author of the commentary—Śaṅkarācārya, as is evident from the colophon at the end of the first chapter.

Remarks—This work contains four chapters in Sanatsujātaparva with the commentary, Vivaraṇa. The commentary is elaborate elucidating the details of Brahmātmavidyā, and giving appropriate quotations from the Upaniṣads. (Refer to C. C. page 693—Sanatsujātīya by Śaṅkarācārya—Oppert II. 6487.) Though this work has been printed in Śaṅkaragranthavali series at Sīrangam many useful readings are noteworthy in this Ms.

॥ भारतम् ॥ (विवरणोपेतम्) ॥

369. BHĀRATAM

with Vivaraṇa.

Substance—Palm leaf. Size—19½″ × 2″. Leaves—32. 10—12 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—1600.

Colophon :

इति श्रीमद्भगवत्कृष्णद्वैपायनप्रणीतसनत्सुजात-
विवरणे भगवत्पादकृते चतुर्थोऽध्यायः ।

इदं सनत्सुजातीयं शङ्करेण लिखितम् ।
गोविन्दाय मुकुन्दाय वासुदेवाय विष्णवे ।
नारायणाय रामाय हरये परमात्मने ॥
परब्रह्मणे नमः ।

Author—Remarks: Same as No. 368.

॥ भारतम् (भगवद्गीता पदयोजनोपेता) ॥

370. BHĀRATAM.

Bhagavadgītā with Padayojanā.

Substance—Palm leaf. Size—14¾″ × 2″. Leaves—84. 13 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—4100.

Beginning:

हरिः । श्रीगणपतये नमः ।

श्रीरामादिदशावतारसमये रक्षोवधं कुर्वता
कृष्णे जन्मनि राजगोपललनासक्तेन यल्लम्पटम् ।
तन्मोक्तुं हरिरेव जीवकलया सानन्दमाविर्बभौ
ब्रह्मानन्दसरस्वतीति यतिराण्णीलाद्रिसिंहासने ॥

श्रीसत्याकुचकुङ्कुमाङ्कितनिजश्रीवत्समाच्छादयन्
लीलानीलसरोरुहेण च लसद्बिम्बाधरोरुक्षतम् ।
वेणुक्वाणमिषेण तत्त्वकलने मद्वाचमव्यान्मुदा
व्याकोचाननकञ्जमञ्जुकुहनागोपालभूपालकः ॥

नारायणं ब्रह्मवसिष्ठशक्तीन् पराशरव्यासशुकान् मुनीन्द्रान् ।
श्रीगौडपादान्वययोगिवर्यान् गोविन्दपूज्यानथ शङ्करार्यान् ॥
सुरेश्वरांस्तोटकपद्मपादान्नमामि हस्तामलकान् गुरून् मे ।

वन्दारुवृन्दमन्दारान् सनन्दकशुकोपमान् ।
चिदानन्दानहं वन्दे पूर्णानन्दसरस्वतीन् ॥

वृन्दारकपदं गत्वा मन्दारकुसुमान्यहो ।
येनानीतानि तं वन्दे पुरुषोत्तमयोगिनम् ॥

यस्मै प्रसन्ना कामाक्षी क्षीरान्नं कृपया ददौ ।
लब्धप्रसादानं तं नौमि शिवरामसरस्वतीम् ॥

सर्वातिशायिने वीतमायिनेऽभीष्टदायिने ।
गोपालानन्दसंज्ञाय कस्मैचिन्महसे नमः ॥

स्वयंप्रकाशकानन्दश्रीपादसुरपादपम् ।
अखण्डानन्दफलदं कृपामूलमुपाश्रये ॥

श्रीनीलाचलनाथपादयुगळीहेमाब्जनीलाश्रुता(?)
नाब्रह्माण्डजमद्द्विजामतसुवर्णाच्छादनालंकृतान् ।

नानासत्कुलहंसपक्षकलनात् सम्पोषितान् मद्गुरून्
ब्रह्मानन्दसरस्वतीपरमहाहंसान् प्रशंसाम्यहम् ॥

प्रालेयाचलसेतुमध्यनिवसच्छात्रोल्लसज्जूटिका
लोकालोकमहीध्रभूषितशिरोभूषामणीपेटिका ।
दीनानूननिधानदानतुलनासन्तानसद्वाटिका
ब्रह्मानन्दपदारविन्दयुगली पायाज्जयद्वाटिका ॥

अविघ्नशुभदं भूयाद् भूयो वैनायकं महः ।
मेयं ध्येयममेयं यद्वाङ्मनसगोचरम् ॥
रामायणं तु व्याख्याय रामचन्द्रसरस्वती ।
करोति गीताव्याख्यां समाख्येयां तत्त्वदीपिकाम् ।
भाष्यं पैशाचिकं दृष्ट्वा शाङ्करीयं च टिप्पणम् ॥
श्रीधरीयं समालोक्य लिख्यते पदयोजना ।

श्रियः पतिरखिलजगदुत्पत्तिस्थितिहेतुभूतः स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःसौशील्यापारकारुण्यप्रभृत्यसंख्येयकल्याणगुणरत्नरत्नाकरः सच्चिदानन्दावाङ्मनसगोचराखण्डैकरसस्वरूपो भगवान् वासुदेवः कुरुपाण्डवयुद्धे धनञ्जयस्याहवो साहोत्पादनव्याजेन लोकानुग्रहार्थं परमपुरुषार्थलक्षणतया ज्ञानयोगमवतारयामास । तमर्थमेवात्र भगवान् बादरायणः श्लोकसप्तशत्या विरचयन्नादौ तावत् तदुचितकथां प्रस्तौति—

"श्रीकृष्णरचितानेव श्लोकान् व्यासोऽत्र भूरिशः ।
विलिख्य तत्सङ्गतये कांश्चिद्रचितवान् स्वयम् ॥"
इत्युक्तेर्भगवत्प्रोक्तश्लोकानां गणनोच्यते ।
सर्वलक्षणया श्लोका गीता भगवतात्र हि ॥

15

श्लोकं पञ्चशतीं प्राह त्रिसप्तत्युत्तरां हरिः ।
पार्थश्चतुरशीतिं च त्रिंशतं सञ्जयोऽब्रवीत् ॥
धृतराष्ट्रः श्लोकमेकं नवश्लोकीं सुयोधनः ।
अष्टाचत्वारिंशदुक्ता अध्याये प्रथमेऽखिलाः ॥

*   *   *   *

धृतराष्ट्र उवाच—
धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

हे सञ्जय धर्मक्षेत्रे पुण्यभूमौ कुरुक्षेत्रे मामकाः मत्पुत्राः पाण्डवाः पाण्डुपुत्राश्चैव युयुत्सवः योद्धुमिच्छन्तः समवेताः मिलिताः सन्तः किमकुर्वत किं चक्रुः ॥

End :
तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ।
विस्मयो मे महान् राजन् हृष्यामि च पुनः पुनः ॥
हे राजन् अत्यद्भुतं हरेः श्रीकृष्णस्य तद् रूपं विश्वरूपं संस्मृत्य संस्मृत्य ध्यात्वा ध्यात्वा मे मम महान् विस्मयः आश्चर्यं भवति । पुनः पुनः हृष्यामि च । किमत्र बहुनोक्तेन ।

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

यत्र यस्मिन् पक्षे योगेश्वरः योगमायेश्वरः कृष्णः, यत्र यस्मिन् पक्षे धनुर्धरो गाण्डीवधन्वा पार्थः तत्र तस्मिन् पाण्डवानां पक्षे श्रीः राज्यलक्ष्मीः ध्रुवा स्थिरा तत्रैव विजयः ध्रुवः तत्रैव भूतिः श्रियो विशेषविस्तारः ध्रुवा तत्रैव नीतिः नयः धृतिर्वा इति मे मम मतिः निश्चयः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यब्रह्मानन्दसरस्वती-शिष्यश्रीरामचन्द्रानन्दसरस्वतीविरचितायां भगवद्गीताव्याख्यायां पदयोजनासमाख्यायां सकलशास्त्रपरमार्थतत्त्वनिर्णयमोक्षयोगो नाम अष्टादशोऽध्यायः । श्रीकृष्णाय नमः ।

यस्यच्छात्त्रनिशान्तशान्तशकुनैर्दान्तातिदान्तैर्मृगे-
ब्रह्माहं चिदहं चिदेकरस एवास्मीति वा पठ्यते ।
यस्यानुग्रहलेशमात्रविभवान्मूकोऽपि वाग्मी भवेद्
ब्रह्मानन्दसरस्वतीति यतिनां राजा स मे राजते ॥
श्रीदेव्यै नमः । शुभमस्तु ॥

Author—Com: Śrī Rāmacandrānanda Sarasvatī.

Remarks—The commentator propitiates his preceptor Brahmānandasarasvatī both at the opening and at the close of his work. The latter preceptor was a devotee of Śrī Nīlācalanātha. The line "रामायणं तु व्याख्याय रामचन्द्रसरस्वती" bears out that he had written a commentary on the Rāmāyaṇa. The Nīlācala referred to here is a hill at Gauhati in Assam. (Vide p. 140, Geographical Dictionary.) There is a shrine dedicated to Kāmākṣīdevī, invoked by the author at the beginning of his work. The commentary explains the meaning of all the words in the Gītā, and hence the title Padayojanā. He acknowledges his indebtedness to the Śaṅkara

Bhāṣya, Śrīdhariya etc. The commentary is short and clear. It is a recent work and is mentioned on p. 319 C. C. Oppert—7142.

॥ भारतम् (भगवद्गीता पदयोजनोपेता) ॥

371. BHĀRATAM.

Bhagavadgītā with Padayojanā.

Substance—Palm leaf. Size—14⅝" × 2". Leaves—12. 12 lines per page and 60 letters per line. Script—Malayalam. No. of Granthas—540.

Beginning:

धार्तराष्ट्रान् हन्तुं नार्हाः न योग्याः । ते स्वजनहननदोषमना-दृत्य यथा युद्धोद्यताः । त्वया शोकं परित्यज्य योद्धव्यमित्याशङ्कयाह यद्यपीत्यादिश्लोकद्वयेन ।

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः ।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥

End:

अर्जुन उवाच—

ज्यायसी चेत् कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत् किं कर्मणि घोरे मां नियोजयसि केशव ॥

जगज्जननोपलक्षितं जीवस्य संसारं मर्दयति हिनस्ति इति जनार्दनः तस्य सम्बुद्धिः हे केशव बुध्यतेऽनयेति बुद्धिः ज्ञानम् । कर्मणः सकाशात् ज्यायसी गुरुतरेति ते तव मता अभिमता चेत्, तत् तस्मात् कारणात् किं किमर्थं घोरे क्रूरे हिंसालक्षणे इति यावत् ।

कर्मणि मां नियोजयसि प्रवर्तयसि । ननु धर्म्यादि युद्धादित्यादिना कर्मणोऽपि श्रैष्ठ्यमेवेत्याशङ्क्याह—

व्यामिश्रेणैव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥

व्यामिश्रेण क्वचित् कर्मप्रशंसा क्वचिद् ज्ञानप्रशंसेत्येवं . . . .

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यब्रह्मानन्दसरस्वतीशिष्यरामचन्द्रानन्दसरस्वतीविरचितायां भगवद्गीताव्याख्यायां पदयोजनामाख्यायाम् अर्जुनविषादयोगो नाम प्रथमोऽध्यायः ।

Author—Same as No. 370.

Remarks—The Ms. contains the latter portion of chapter 1, the second chapter and two verses in chapter 3.

॥ भारतम् (भगवद्गीतापैशाचभाष्योपेता) ॥

372. BHĀRATAM.

Bhagavadgītā with Paiśāca Bhāṣya.

Substance—Palm leaf. Size—14″ × 2″. Leaves—59. 8—10 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—1900. Complete.

Beginning:

ॐ हरिः । अविघ्नमस्तु ।

प्रणम्य परमात्मानं विष्णुं कृष्णं जगद्गुरुम् ।
परमात्मावबोधार्थं गीताव्याख्या मयोच्यते ॥

अस्य संबन्धाभि (धेय) प्रयोजनान्युच्यन्ते । मोक्षस्तावत् प्रयोजनं, स च गीताशास्त्रप्रतिपादितात् परमात्मसम्बोधादेवेति परमात्मस्वरूपमभिधेयम् । परमात्मस्वरूपावबोधकस्य शास्त्रस्य साध्यसाधकलक्षणः सम्बन्धः । एवं सम्बन्धाभिधेयप्रयोजनवद् गीताशास्त्रम् । अत्र चार्जुनस्य राज्यार्थं (श)त्रून् विजिगीषोर्धार्तराष्ट्रैः सह युद्धं सम्प्राप्तम् । तत्र साहाय्यार्थं वृतेन भगवता वासुदेवेन सह रथमारुह्य युद्धभूमिं प्रविष्टोऽर्जुन उभयोरपि (से)नयोर्योद्धृव्यवस्थितानाचार्यपितृपितामहपुत्रमित्रादीन् दृष्ट्वा, एते मया हन्तव्या मदर्थं चैते मरिष्यन्तीति पर्यालोच्य शोकमोहाभिभूतः चिन्तया बहु प्रलप्य न योत्स्य इत्युक्त्वा युद्धादुपराम । एवमुपरताय तस्मै तस्यावि(द्यमूल?द्यामूल) शोकमोहापनोदाय परमकारुणिको भगवान् भक्तवत्सलो वासुदेवो वेदान्तवाक्यैः समधिगम्यपरमार्थतत्त्वमुपदिदेश । (अ) त्रच "दृष्ट्वा तु पाण्डवानीक" मित्यारभ्य "नयोत्स्य इति गोविन्दमुक्त्वे" त्येवमन्त्यो ग्रन्थः प्राणिनां शोकमोहः संसारोऽविद्यामूल इति दर्शनार्थः । धृतराष्ट्रः "धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः । मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय" ॥ इत्यारभ्य । " सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः" ॥ इदमिति वक्ष्यमाणं वचः ।

End:

तच्च रूपं विग्रहं अ(त्य)द्भुतम् अत्याश्चर्यं । हरेर्नारायणस्य विस्मयः कुतूहलं मे महान् । हृष्यामि च पुनः पुनः भूयो भूयः । किं बहुना । यत्र मम । यत्र यस्मिन् पक्षे योगेश्वरः कृष्णः स्थितः यत्र पार्थोऽर्जुनः धनुर्धरः उद्यतगाण्डीवः तत्र तस्मिन् पक्षे श्रीर्देवता विजयार्थो विजयः शत्रूणां धर्षणं भूतिर्विभूतिः ध्रुवा नित्या नीतिर्नयः । मतिः मम

जयसाधिका इतीत्थं मतिर्निश्चयः, मम सञ्जयस्य । इति—
करणं गीताशास्त्रपरिसमाप्त्यर्थम् ।

Colophon :

इति पैशाचभाष्ये भगवद्गीतोपनिषद्भाष्ये अष्टादशोऽध्यायः ।
श्रीकृष्णाय परमात्मने नमः ।

Remars—The commentary is written in very simple and lucid style, bringing home to the readers the dogmas of Vedāntic philosophy. In the revised edition of the Bhagavadgītā with eleven commentaries published from the 'Gujarati' Printing Press, Bombay, this work is ascribed to Hanumat. It differs much from the Ms.

॥ भारतम् (भगवद्गीता भाष्यसंक्षेपोपेता) ॥

373. BHĀRATAM.

Bhagavadgītā with Bhāṣyasaṃkṣepa.

Substance—Palm leaf. Size—17″ × 2½″. Leaves—112. 7—8 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—3500.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीमद्वारणशैलेन्द्रगुहामुखविजृम्भणः ।
जयत्यभ्यर्णविघ्नेशः परमात्मा नृकेसरी ॥
मन्दानामपि गीतासु कश्चिदर्थोऽवबुध्यताम् ।
इति श्रीभगवत्पादभाष्यं संक्षिप्यतेऽन्वयैः ॥

नारायणः परोऽव्यक्तादण्डमव्यक्तसम्भवम् ।
अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी ॥

अथ स भगवान् सृष्ट्वेदं जगत् तस्य च स्थितिं चिकीर्षुरग्रे मरीच्यादीन् प्रजापतीन् सनकादींश्च योगीश्वरान् सृष्ट्वा जगतः स्थितिकारणं वेदोक्तप्रवृत्तिलक्षणम् अभ्युदयसाधनमग्निहोत्रादिकं निवृत्तिलक्षणं च निःश्रेयससाधनज्ञानवैराग्यात्मकं धर्मं ग्राहयामास । तच्च गच्छता कालेनानुष्ठातॄणां कामोद्भवात् हीयमानविज्ञानहेतुकेनाधर्मेणाभिभवात् क्षीणप्रायमुपलभ्य पुनरादिकर्ता नारायणो ब्राह्मणस्य वर्णाश्रमभेदानिबन्धनस्य संरक्षणाय ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सदा सम्पन्नः त्रिगुणात्मिकां स्वां प्रकृतिं वशीकृत्याजोऽव्ययो भूतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावोऽपि लोकानुग्रहाय देवक्यां वसुदेवात् अंशेन सम्भूतो मायया देहवानिव लक्ष्यमाणो धर्मसम्मूढचेतसं शोकमोहमहोदधिनिमग्नमर्जुनं तमुद्दिधीर्षुर्द्विविधमपि तं धर्मं वक्ष्यमाणक्रमेणाधिकारिभेदेन अवस्थितमुपदिदेश । तमेतं भगवता वासुदेवेन यथोपदिष्टं भगवान् वेदव्यासः गीताख्यैः सप्तभिः श्लोकशतैरुपनिबबन्ध । तस्यास्य गीताशास्त्रस्य सकलवेदार्थसारसंग्रहात्मकस्य संक्षेपतः प्रयोजनं सहेतुकस....रे.त्य.... परमलक्षणं निश्रेयसं परमार्थतत्त्वं च वासुदेवाख्यं परं ब्रह्माभिधेयं तदुभयाभिव्यञ्जकस्य प्रसिद्धमेव । इह भगवत्पादैः स्पष्टार्थतयोपेक्षितस्य अशोच्यानित्यतः प्राक्तनस्य श्लोकसन्दर्भस्य मन्दानामन्वयपरिज्ञानायाक्षरयोजनामात्रं क्रियते । कुरुराजः प्रज्ञाचक्षुः बाह्यचक्षुरभावेन बाह्यमर्थं प्रत्यक्षयितुमनीशानोऽभ्याशवर्त्तिनं व्यासप्रसादात् प्रत्यक्षीकृतपक्षद्वयव्यापारम् आत्मनो हितोपदेष्टारं सञ्जयं पृच्छन् धृतराष्ट्र उवाच—

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

End :

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ इति ॥

यस्मिन् पक्षे योगानां सर्वेषां कर्मज्ञानाविषयाणा... ... ...
... . प्रभवतयेश्वरः कृष्णोऽस्ति । यत्र गाण्डीवधन्वा पार्थश्चास्ति । तत्रैव पक्षे युधिष्ठिराधिष्ठिते श्रीः विजयश्रीः विशेषो भूतिरव्यभिचारितया ध्रुवा नीतिश्चेति मम निश्चयः ।

इतिश्रीभगवत्पादभाष्यं संक्षिप्तमन्वयैः ।
आवर्तनीयं यत्नेन यतिभिर्मोक्षकाङ्क्षिभिः ॥
श्रीविद्याभारतीं वन्दे श्रीविद्याचक्रवर्तिनीम् ।
यदनुग्रहमात्रेण मूको वाचस्पतीयते ॥
प्रणमामि परानन्दं क.........णालयम् ।
अविद्यारण्यदावाग्निं विद्यारण्ययतीश्वरम् ॥
यत्कटाक्षेक्षिकासूत ज्ञानलक्ष्मीमिमां मयि ।
तस्मै गुरूणां गुरवे विद्यातीर्थात्मने नमः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकेशवात्मभगवत्पूज्यपादशिष्यस्य श्रीकेशवसाक्षिभगवतः कृतौ श्रीगीताभाष्यसंक्षेपे अष्टादशोऽध्यायः ।

मलनिर्मोदनं पुंसां गङ्गास्नानं दिने दिने ।
सकृद्गीताम्भसि स्नानं संसारमलमोचनम् ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।

श्रीकृष्णाय नमः चक्रग्राम... ... ...ना वेङ्काजल्लूर् शङ्करेण लिखितमिदं संक्षेपभाष्यम् । विष्णवे नमः ।

.........गुरुरात्मेति मूर्तिभेदाद्विभागिने ।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ॥

नमः शिवाय त्रिदशार्चिताय विनष्टदोषाय गुणार्णवाय ।
विमुक्तिमार्गप्रतिबोधनाय देवादिदेवाय... ...शिवाय ॥

शिवं शिवकरं शान्तं शिवात्मानं शिवोत्तमम् ।
शिवमार्गप्रणेतारं प्रणतोऽस्मि सदाशिवम् ॥

ओं नमः शिवाय शिवायै नमः । शङ्कराय नमः । शिवं शिवं शिवम् ।

Author—Com: Keśavasākṣi Bhagavān.

Remarks—This Ms. is an abridgment of the Gītā-Bhāṣya of Śaṅkarācārya. The commentator's preceptor was Keśavabhagavatpūjyapāda.

॥ भारतम् (भगवद्गीता सभाष्या) ॥

374. BHĀRATAM.

Bhagavadgītā with Bhāṣya.

Substance—Palm leaf. Size—18″ × 2″. Leaves—98. 11—13 lines per page and 80 letters per line. Script—Grantha. No. of Granthas—5900.

Beginning:

अस्य श्रीभगवद्गीतामहामन्त्रस्य । श्रीवेदव्यासो भगवानृषिः । अनुष्टुप् छन्दः । श्रीकृष्णः परमात्मा नारायणो देवता । अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषस इति बीजम् । सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज इति शक्तिः । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः इति कीलकम् । श्रीभगवतो वासुदेव(स्य) प्रीत्यर्थे जपे विनियोगः । नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः इत्यङ्गुष्ठाभ्यां नमः । नचैनं क्लेदयन्त्यापो न शोषयति मारुतः इति तर्जनीभ्यां नमः । अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च इति मध्यमाभ्यां नमः । नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः इत्यनामिकाभ्यां नमः । पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः इति कनिष्ठिकाभ्यां नमः । नानाविधानि दिव्यानि नानारूपाकृतीनि च इति करतलकरपृष्ठाभ्यां नमः । ओं ज्ञानात्मने श्रीकृष्णाय हृदयाय नमः । श्रीमदैश्वर्यात्मने छन्दसे शिरसे स्वाहा । श्रीमच्छक्त्यात्मने वेदव्यासाय शिखायै वषट् । बलात्मने बलभद्ररामाय कवचाय हुम् । श्रीमत्तेजसात्मने श्रीकृष्णाय नेत्रत्रयाय वौषट् । श्रीमद्वीर्यात्मने गाण्डीवधन्वने विजयाय अर्जुनाय अस्त्राय फट् । ॐ भूर्भुवस्स्वरोमिति दिग्बन्धः ।

आताम्रपाणिकमलप्रणयप्रतोद-
मालोलहारमणिकुण्डलहेमसूत्रम् ।
आविःश्रमाम्बुकणमम्बुदनीलमव्या-
दाद्यं धनञ्जयरथाभरणं महो नः ॥

करकमलनिदर्शितात्ममुद्रः परिकलितोन्नतबर्हिबर्हचूडः ।
इतरकरगृहीतवेत्रतोत्रो मम हृदि सन्निधिमातनोतु शौरिः ॥

वन्दे कृष्णार्जुनौ वीरौ नरनारायणावुभौ।
धार्तराष्ट्रकुलोन्मत्तगजारोहणवल्लभौ ॥
वाचकः प्रणवो यस्य क्रीडावस्त्वखिलं जगत्।
श्रुतिराज्ञा वपुर्ज्ञानं तं वन्दे देवकीसुतम् ॥
प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये ।
ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥
सारथ्यमर्जुनस्यादौ कुर्वन् गीतामृतं ददौ ।
लोकत्रयोपकाराय तस्मै कृष्णात्मने नमः ॥

जीवब्रह्मभिदामहामयजुषां जीवातुरत्यङ्कुश-
स्वान्ताकारमदान्धवारणसृणिस्तत्त्वंपदव्याक्रिया ।
नानाकर्मकवाटिकाविघटनव्यापारसत्कुञ्चिका
चिन्मुद्रा जगतां गुरोर्भवतु मे जन्मार्तिविध्वंसिनी ॥

नारायणः परोऽव्यक्तादण्डमव्यक्तसम्भवम् ।
अण्डस्यान्तास्त्विमे लोकाः सप्तद्वीपा च मेदिनी ॥
धृतराष्ट्र उवाच— श्रीसच्चिदानन्दगुरुभ्यो नमः ।
धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

... ...

नारायणः परो व्यक्तादण्डमव्यक्तसम्भवम् ।
अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी ॥

स भगवान् सृष्ट्वेदं जगत् तस्य च स्थितिं चिकीर्षुः मरीच्यादीनग्रे सृष्ट्वा प्रजापतीन् प्रवृत्तिलक्षणं धर्मं ग्राहयामास वेदोक्तम्। ततोऽन्यांश्च सनन्दसनकादीनुत्पाद्य निवृत्तिलक्षणं धर्मं ज्ञानवैराग्यादिल-ग्राहयामास। ....

Colophon :

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगो नामाष्टादशोऽध्यायः ।

॥ श्रीशङ्कराचार्यविरचितं गीताभाष्यं समाप्तम् ॥

॥ ओं तत् सत् ॥

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः ।

या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता ॥

Author—Com : Śaṅkarācārya.

Remarks—In this Bhāṣya Śaṅkarācārya refutes the arguments of all the other schools of philosophy and establishes his own school of Advaitavedānta. Nyāsa, Dhyāna and other practices preliminary to the recital of Gītā are included in the beginning column.

॥ भारतम् (भगवद्गीता सुबोधिनीसाहिता) ॥

375. BHĀRATAM

Bhagavadgītā with Subodhinīvyākhyā.

Substance—Palm leaf. Size—13″ × 2″. Leaves—77. 11 lines per page and 64 letters per line. Script—Grantha. No. of Granthas—3500.

Beginning :

गजाननविघ्नभित्तिप्रभित्तिकुद्दालमिव करेणुरदम् ।

दधतं महागणेशं प्रणौमि सकलेष्टसम्पदं ददतम् ॥

नमो भगवते तस्मै वासुदेवाय माजुषे ।
येन पार्थोऽतरद् गीतासुप्लवो भववारिधिम् ॥
शेषाशेषमुखव्याख्याचातुर्यं चैकवक्त्रतः ।
दधानमद्भुतं वन्दे परमानन्दमाधवम् ॥
श्रीमाधवं प्रणम्योर्वीसुरपुङ्गवमादरात् ।
तद्भक्तियन्त्रितः कुर्वे गीताव्याख्यां सुबोधिनीम् ॥
भाष्यकारमतं सम्यक् तद्व्याख्यातृगिरस्तथा ।
यथामति समालोच्य गीताव्याख्यां समारभे ॥
गीता व्याख्यायते यस्याः पाठमात्रादयत्नतः ।
सेयं सुबोधिनी टीका सदा ध्येया मनीषिभिः ॥

इह खलु सकललोकहितावतारः परमकारुणिको भगवान् देवकीनन्दनः तत्त्वाज्ञानविजृम्भितशोकमोहभ्रंशितविवेकतया निजधर्मत्यागपरधर्माभिसन्धिनम् अर्जुनं धर्मज्ञानरहस्योपदेशप्लवेन तस्मात् शोकमोहसागरादुद्धार । तमेव भगवदुपदिष्टमर्थं कृष्णद्वैपायनः सप्तभिः श्लोकशतैरुपनिबबन्ध ।

... ...

वन्दे कृष्णार्जुनौ वीरौ नरनारायणावुभौ ।
धार्तराष्ट्रकुलोन्मत्तगजारोहणवल्लभौ ॥

श्रीगीताशास्त्रमहामन्त्रस्य वेदव्यासो भगवानृषिः । प्रायेणानुष्टुप् छन्दः । क्वचित् क्वचित् नानाविधानि छन्दांसि । गोपालकृष्णः परमात्मा देवता । अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषस इति बीजम् । सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज इति शक्तिः । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि माशुच इति कीलकम् । ऊर्ध्वमूलमिति हृदयम् । धर्मार्थकाममोक्षज्ञानयज्ञेन

भगवत्समाराधनार्थे जपे विनियोगः । ज्ञानात्मने श्रीकृष्णाय हृदयाय नमः । अभिदैश्वर्यात्मने छन्दसे शिरसे स्वाहा । शक्त्यात्मने श्रीवेदव्यासाय शिखायै वषट् । बलात्मने श्रीबलभद्राय कवचाय हुम् । तेजसात्मने श्रीकृष्णाय नेत्राभ्यां वौषट् । वाय्वात्मने श्रीबृहद्गाण्डीवधन्वने अर्जुनाय अस्त्राय फट् भूर्भुवस्स्वरोमिति दिग्बन्धः ॥

हृदि विकसितपद्मं सार्कसोमाग्निनेत्रं
प्रणवमयविकारं यस्य रूपं प्रकल्प्य ।
अचलमिव सुसूक्ष्मज्योतिराकाशसारं
भगवति मनसो मे वासुदेवे प्रतिष्ठा ॥

वाचकः प्रणवो यस्य क्रीडावस्त्वखिलं जगत् ।
श्रुतिराज्ञा वपुर्ज्ञानं तं वन्दे देवकीसुतम् ॥

अग्रे कृत्वा कमपि चरणं जानुनैकेन तिष्ठन्
पश्चात्पार्थं विच(प)लजुषा चक्षुषा प्रेक्षमाणम् ।
सव्ये तोत्रं करसरसिजे दक्षिणे ज्ञानमुद्रा-
माबिभ्राणो रथमधिवसन् पातु नः सूतवेषः ॥

गीतायाः श्रवणाद्यस्य मानसं परिवर्तते ।
तस्य वैवस्वतो राजा कुरुते लिपिमार्जनम् ॥

पार्थाय प्रतिपादितां भगवता नारायणेन स्वयं
व्यासेन ग्रथितां पुराणमुनिना मध्येमहाभारतम् ।
अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनी-
मम्ब ! त्वामनुसन्दधामि भगवद्गीते भवच्छेदिनीम् ॥

मू—धृतराष्ट्र उवाच—

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

व्या—हे सञ्जय! धर्मभूमौ कुरुक्षेत्रे मत्पुत्राः पाण्डुपुत्राश्च युयुत्सवः
योद्धुमिच्छन्तः समवेताः सन्तः किं कृतवन्तः ।

End :

"देहान्ते देवः परं ब्रह्म तारकं व्याचष्टे" "यमेवैष वृणुते तेन लभ्यः" इत्यादि श्रुतिस्मृतिपुराणवचनान्येवं सति समञ्जसानि भवन्ति । तस्माद्भगवद्भक्तिरेव मोक्षहेतुरिति सिद्धम् ।

तेनैव दत्तया भक्त्या तद्गीताविवृतिः कृता ।
स एव परमानन्दस्तथा प्रीणातु माधवः ॥
परमानन्दपादाब्जरजःश्रीधरिणाधुना ।
श्रीधरस्वामियतिना कृता गीतासुबोधिनी ॥

स्वप्रागल्भ्यबलाद्विलोक्य भगवद्गीतां तदन्तर्गतं
तत्त्वं प्रेप्सुरुपैति किं गुरुकृपापीयूषदृष्टिं विना ।
अम्बु स्वाञ्जलिना निरस्य जलधेरादित्सुरन्तर्मणी-
नावर्तेषु न किं निमज्जति जनः सत्कर्णधारं विना ॥

Colophon :

इति श्रीभगवद्गीताटीकायां सुबोधिन्यां श्रीधरस्वामिकृतौ परमार्थनिर्णयो नामाष्टादशोऽध्यायः । भगवद्गीताव्याख्यानं समाप्तम् ।

गुरुपादाम्बुजद्वन्द्वं मम हृत्पद्ममन्दिरे ।
नित्यज्ञानप्रबोधाय चिन्तयामि सुखप्रदम् ॥

श्रीसत्यवागीश्वरो रक्षतु ।

श्रीकृष्ण विष्णो नृहरे मुरारे प्रद्युम्न सङ्कर्षण वासुदेव ।
अजानिरुद्धामल विश्वरूप त्वं पाहि नः सर्वभयादजस्रम् ॥

श्रीगुरुभ्यो नमः । शुभमस्तु ।

Author—Com: Śrīdharasvāmin.

Remarks—The commentator follows Śaṅkara in advocating devotion (Bhakti) as superior to knowledge (Jñāna).

॥ भारतम् (विवरणोपेतम्) ॥

376 A. BHĀRATAM
with Vivaraṇam.

Substance—Palm leaf. Size—16¾″ × 1½″. Leaves—6. 8—9 lines per page and 60—68 letters per line. Script—Tamil Grantha. No. of Granthas—200.

Subject—Same as No. 295.

Beginning of the commentary:

... ...सनं प्राह ... .

न्मन्यसे सुहृद्गुरुवधात् प्रायश्चित्तीयत इति । भवांनाढ्यः सत्रश्वमेधादिप्रायश्चित्तानुष्ठानसमर्थः किं परितप्यसे । यो ह्यनाढ्यः यः पुनरनाढ्यो दरिद्रः स पापानि कृत्वा पततिं प्रायश्चित्तासमर्थत्वात् तस्य । कुतः । तदुच्छिष्टं तस्यानाढ्यस्योच्छि(ष्टं)

शरीरयात्राशेषं कल्पकं प्रायश्चित्ता पर्याप्तमिति यावत् । ...ह्यपथ्ये अनेके अपथ्ये पापे बलवति गुरुतरं किञ्चिदाढ्यत्वाद् अन्यद् बलं सामर्थ्यं न त्रायते पुरुषम् । किञ्चाढ्यतैव यज्ञदानादिकारणतया त्रायत इत्यर्थः । तस्माद् राज्यमालम्ब्य अश्वमेधादिना पापहानिः कार्येत्याह ॥

End :

लोभादुद्भूतमज्ञानामित्यास्मिन् पक्षे । अवेक्षिणमिति पाठः । शेषः समानः ।

यच्च पैतामहं स्थानं ब्रह्मराशिसमुद्भवम् ।
गुहायां निहितं नित्यं तद्दमेनाधिगम्यते ॥

पैतामहं स्थानं इ...गतः पितॄणामपि पितुः परमो...णस्य नारायणस्य परस्य ब्रह्मणः स्थानं तस्य सर्वगतत्वे सत्यपि तत्र विशेषेणाविर्भवतीति यावत् । स्थानमित्युपचाराद् दृश्यते तद् गुहायां निहितं हृदयसरोजकोटर.... निहितं निगूढं तद् ब्रह्मराशिसमुद्भवं वेदराशिभिः समुद्भाव्यते प्रकाश्यत इति ब्रह्मराशिसमुद्भवं तद् दमेन मनोनिरोधेनाधिगम्यते ज्ञायत इत्यर्थः ।

Colophon :

इति यज्ञनारायणीये महाभारतविवरणे राजधर्मविवरणं समाप्तम् । हरि ॐ ।

Author—Com: Yajñanārāyaṇa.

Remarks—The Ms. begins on Fol. 16. It is much worn out but the script is legible.

॥ भारतम् (दीपिकोपेतम्) ॥

376 B. BHĀRATAM with Dīpikā.

Substance—Palm leaf. Size—16¾" × 1½". Leaves—58. 8—9 lines per page and 60—68 letters per line. Script—Grantha. No. of Granthas—1850.

Beginning :

अथातो मोक्षधर्मेषु श्लोकान् स्वाशयशुद्धये ।
निगूढपदवाक्यार्थान् विवरिष्यामि कांश्चन ॥
सन्तो यद्यनुगृह्णीयुर्वृत्तिमेनां मयेरिताम् ।
कृत .... स्यामहं नो चेत् तेभ्यः श्रोष्यामि तत्त्वतः ॥
धर्माः पितामहेनोक्ताः ... ... मं ... शुभाः ।
धर्म .... श्रेष्ठं वक्तुमर्हसि भारत ॥

इति युधिष्ठिरो भीष्मं पृच्छति स्म । पितामहेन भवता धर्माः सर्वेषां वर्णानामाश्रमिणां च राजधर्माश्रिता उक्ताः । राज्ञा हि वर्णानां धर्मा .... रा ... ... परिपाल्या इत्युक्तानुभाषणं कृत्वा पूर्वार्धेन, अपरार्धेनापूर्वमर्थं पृच्छति स्म । धर्ममाश्रमिणां .... सर्वेषामुपदिष्टा धर्मास्ते ... ... पि श्रेष्ठ....धर्मम .... दीनां वक्तुमर्हसि । अथवा तेषामसाधारणधर्मा इति गुरुशुश्रूषाध्ययनयज्ञ- .. ... दीनि कर्माणि धर्मसाधन ... ... मंलाक्षि .... नीत्य- दो.... । सर्वे धर्माः शुभा एव न त्वशुभाः सन्ति शुभा इति ।

End :

प्राधानिकं प्रधानाज्जातमव्यक्तवत् सर्वतत्त्वं प्रधानमित्यभि-

प्रायः। महत्तत्त्वतश्चाप्यहङ्कारा... उत्पद्य ... ... नराधिप ... ... त्याहुरेतद् बुद्ध्यात्मकं स्मृतम्। बुद्ध्यात्मकं महत्तत्त्वात्मकं महत्तत्त्वज्ज्ञानात्मकमित्यभिप्रायः। अहङ्काराच्च सम्भूत.... .... नोद्यतगुणात्मकम्। .... इत्येष अहं .... उच्यते। भूतगुणात्मक .... शब्दादयः तदात्मकं विषयपरवशमिति यावत्।

Colophon :

इति श्रीनन्दविरचितायां मोक्षधर्मदीपिकायां त्रयस्त्रिंशच्छततमोऽध्यायः।

Author—Com : Nanda.

Remarks—Many leaves have been eaten away by white ants.

॥ भारतम् (भावदीपोपेतम्) ॥

377 A. BHĀRATAM

with Bhāvadīpa.

Substance—Palm leaf. Size—21¾″ × 2¼″. Leaves—5. 11—12 lines per page and 58—70 letters per line. Script—Grantha. No. of Granthas—200.

Beginning—End—Author—Colophon—Same as No. 376 A.

Remarks—This seems to be a copy of No. 376 A. Vivaraṇa and Bhāvadīpa are evidently one and the same commentary.

॥ भारतम् (दीपिकोपेतम्) ॥

377 B. BHĀRATAM
with Dīpikā.

Substance—Palm leaf. Size—21¾" × 2¼". Leaves—76. 11—12 lines per page and 58—60 letters per line. Script—Grantha. No. of Granthas—3450.

Beginning—End—Colophon and Author—Same as No. 376 B.

Remarks—This work is a reproduction of No. 376 B.

॥ भारतम् ॥

378. BHĀRATAM.

Substance—Palm leaf. Size—20¾" × 1¾". Leaves—31. 7 lines per page and 58—66 letters per line. Script—Malayāḷam. No. of Granthas—1000.

Colophon:

इत्युद्योगे भगवद्याने षट्चत्वारिंशच्छततमोऽध्यायः ।

Remarks—This damaged Ms. is a promiscuous collection of leaves from various works. It comprises *interalia* fragments of *parvas* Bhagavadyāna Sainyaniryāṇa and the Prajāgara. The following lines in the first Fol. disclose

that this composition belongs to a different Purāṇa:

'यमुनायां स्वयं तोयं गङ्गातुल्यं भविष्यति ।'
'दक्षिणेनेह तपती प्रवहिष्यति ।'
''तथा पुष्पजया सार्धं सङ्गं प्राप्स्यति शोभना ॥'.

The Ms. is almost unreadable.

॥ भारतम् (भावदीपोपेतम्) ॥

379. BHĀRATAM
with Bhāvadīpa.

Substance—Palm leaf. Size—$21\frac{1}{2}'' \times 2\frac{1}{4}''$. Leaves—385. 9—12 lines per page and 54—64 letters per line. Script—Malayāḷam. No. of Granthas—13900.

Beginning:

हरिः ओं । अविघ्नमस्तु ।

युधिष्ठिर उवाच—

यया बुद्ध्या महीपालो भ्रष्टधीर्विचरेन्महीम् ।
कालदण्डविनिष्पिष्टस्तन्मे ब्रूहि पितामह ॥

भीष्म उवाच—

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
वासवस्य च संवादं बलेर्वैरोचनस्य च ॥
पितामहमुपागम्य प्रणिपत्य कृताञ्जलिः ।
सर्वानेव सुरान् हित्वा बलिं पप्रच्छ वासवः ॥

इन्द्रियनिग्रहोऽहंकर्तृत्वाभिमानत्यागश्च कार्य इत्यध्यायद्वयेनोक्त्वा सम्पदां चाञ्चल्यात् तत्प्राप्तिनाशयोर्हर्षशोकौ न कर्तव्याविति त्याख्यायिकामुखेनाध्यायद्वयेनाह—यया बुद्ध्येत्यादिना। कालदण्डविनिष्पिष्टो विषग्रस्तः। ३ ॥

End :

यदयं परमो धर्मो यन्मां पृच्छसि भारत।
आसीद्धीरो ह्यनाकाङ्क्षी धर्मार्थकरणे नृप ॥

परकृतिं सरूपेणार्थवादेन निष्कामं स्वकर्मैव जितेन्द्रियेण कर्तव्यं तदेव यो...... रमित्याशयेनाहार्धेन—आसीदिति।

स च किल कृतनिश्चयो द्विजो भुजगपतिप्रतिदर्शितात्मकृत्यः।
यमनियमसहो वनान्तरं परिगणितोञ्छशिलाशनः प्रविष्टः ॥

उपसंहरति—स चेति। यमाः अहिंसादयः। नियमाः शौचादयः। वनान्तरं वनमध्यम्। प्रविष्टः। 'उञ्छः कणश आदानं कणिशाद्यार्जनं शिलम्'। परिगणितम् उञ्छशिला(तिंन? जित)मन्नमश्नन् कणिपत्युक्तामुञ्छवृत्तेर्गतिं प्रापेति शेषः ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणज्ञमर्यादाधुरन्धरचतुर्धरवंशावतंसश्रीगोविन्दसूरिसूनोः श्रीनीलकण्ठस्य कृतौ भारतभावदीपे मोक्षधर्मार्थप्रकाशे अष्टाशीत्यधिकशततमोऽध्यायः। शुभमस्तु।

वक्ष्यन्ते? लक्ष्मणार्यं क्रतुविधिविवृतौ तीर्थनारायणार्थं
तर्के धीरेशमिश्रान् फणिपतिभणितौ चोलगङ्गाधरार्यम्।
वेदे साङ्गे पितृव्यं शिवमथ पितरं दक्षिणामूर्त्युपास्तौ
श्रौते चिन्तामणिं यः शरणमुपगतो भूम्नि गोपालदेवम् ॥

व्याकरोन्मोक्षधर्मान् स नीलकण्ठः समासतः
अनेन प्रीयतां देवो गिरिजापतिरव्ययः ॥

सम्पूर्णेयं मोक्षधर्मटीका ।

Author—Com : Nīlakaṇṭha.

Remarks—The Ms. breaks off after chapter 49 leaving a few blank leaves in the middle. Then it begins again with verse 3, chapter 50 and extends to its end. This has been printed at the Veṇkaṭeśvara Press, Bombay.

॥ भारतम् (भावदीपोपेतम्) ॥

380. BHĀRATAM
with Bhāvadīpa.

Substance—Palm leaf. Size—19″ × 2¼″. Leaves—86. 14—17 lines per page and 64—72 letters per line. Script—Grantha. No. of Granthas—5500.

Beginning :

श्रीगुरुभ्यो नमः । श्रीगणपतये नमः ।
तरणिमुकुरनेत्रोत्तेजनाभां शरीर-
प्रतिकृतिमनमायी भूमिचन्द्रान्तराभम् ।
स्थिरदृगणुमसङ्गं यन्नयत्यन्यथात्वं
तदभयममृतं सत् प्रत्यगीडे गवेन्द्रम् ॥

कणभक्षमक्षचरणं जैमिनिकपिलौ पतञ्जलिं च नुमः ।
श्रीमद्व्यासवचोम्बुधिमधुसीकरवर्षिणो मुदिरान् ॥
सर्वविघ्नेशतामाविश्चिकीर्षू पूर्वपूरुषौ ।
श्रीनारायणधीरेशरूपौ हरिहरौ नुमः ॥

बहून् समाहृत्य विभिन्नदेशान्
कोशान् विनिश्चित्य च पाठमग्र्यम् ।
प्राचां गुरूणामनुसृत्य वाचं
व्याकुर्महे भारतमोक्षधर्मान् ॥

उत्तानेऽपिह कोशविग्रहबलं पद्येषु नैव श्रितं
गम्भीरेषु न सेतवो न विहिताः कूटा न न स्फोटिताः ।
न च्छिन्ना न तमश्वराननततिर्भक्ता न नाह्लादिता
नो दीनाश्च विभीषणा न विहिताः श्रीलक्ष्मणार्यश्रुतैः

ननु मोक्षो नाम शरीरनाशादन्यो नास्ति । 'अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशत' इति श्रुतेः । स च स्वयमेवो-षनमतीति किं तदर्थं शास्त्रेणेति चेन्न ।

End:

अनात्मनः कर्तृत्वमुपपाद्योपसंहरति—स्वभावादेवेति । विद्याविद्या मुक्तिश्च मायिकैवेत्यर्थः । यथोक्तं श्रीमद्भागवते—

विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणाम् ।
मोक्षबन्धकरी आद्ये मायया मे विनिर्मिते ॥

इति । मम माया... ... ...

Colophon:

इति नैलकण्ठीये भारतभावदीपे शान्तौ मोक्षधर्मेषु

पिङ्गलगीतार्थप्रकाशः । इति श्रीमहाभारते शान्तिपर्वणि मोक्ष-धर्मे पिङ्गलगीताप्रथमोऽध्यायः ।

Remarks—The script is legible and attractive.

॥ भारतव्याख्या ॥

381. BHĀRATAVYĀKHYĀ.

Substance—Palm leaf. Size—15½″ × 1½″. Leaves—26. 7—8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—585.

Subject—The teachings of the sage Sanatsujāta imparted to Dhṛtarāṣṭra.

Beginning:

ततो राजेत्यादि । ततः धृतराष्ट्रः सनत्सुजातं पप्रच्छेत्य-न्वयः । ततः त्रिवर्गश्रवणानन्तरमपवर्गजिज्ञासयेत्यर्थः । तर्ह्यनुष्ठानाधिकारमस्ति वा न वे ति चेत् तन्नास्त्येव । राजा रजस्वी । विरक्तस्य मोक्षेऽधिकारः । साधनचतुष्टयहीन इत्यर्थः । नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, शमदमादि-साधनसम्पत्तिः, मुमुक्षा इति साधनचतुष्टयम् । एभिर्गुणैर्वि-हीनत्वात् तस्यानुष्ठानत्वं न सम्भवतीत्यभिप्रायः ।

तन्नास्तीति वदति ज्योतिरित्यनेन । ज्योतिः प्रकाशकरं प्रकृतेः प्रकाशकरत्वं जडत्वान्नास्तीत्यभिप्रायः । तर्हि प्रकाशकरत्वमा-दित्यादीनां विद्यते, तस्मात् तेषां कारणत्वमस्तीति चेत्, तन्नेति

वदति—दीप्यमानमित्यनेन । दीप्यमानं सदा द्योतनशीलम् । तदादित्यादीनां नास्तीत्यभिप्रायः । तर्हीन्द्रियैः सर्वं प्रकाश्यते तस्मात् तेषां कारणत्वमस्तीति चेत्, तन्नेति साधयति—महदित्यनेन । महत् व्याप्तम् । इन्द्रियाणां तथा व्याप्तत्वं नेत्यभिप्रायः । तर्हि शश.... ..,.. ....दीनामपि व्यवहारतो व्याप्तत्वमस्ति, तस्मात् तेषां कारणत्वमस्तीति चेत्, तन्नेति वदति यश इत्यनेन । यशः यशोरूपमनुभवरूपम् । शशविषाण... ......नां तथानुभवो नास्तीत्यभिप्रायः । यस्मै देवा उपासते । यस्मै यमित्यर्थः ।

Colophon :

सप्तचत्वारिंशः ।

॥ भारतव्याख्या ॥

382. BHĀRATAVYĀKHYĀ.

Substance—Palm leaf. Size—15½" × 1½". Leaves —27. 7 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—660.

Beginning—Same as No. 381.

End :

पितामह इति । पिता पुत्रश्चेत्यनुवादः । ममैवेति । यूयं ममात्मस्थाः, युष्माकमात्मस्थोऽहं चेति सिद्धम् । अथ एवं वा यूयं मे न । अहं युष्माकं च नेति । ममात्मैव स्थानं, ममाहमेवाधार इति यावत् जन्म चात्मा ममोपादानभूतश्चाहमेव । वेदप्रोक्तः वेदप्र-

तिपाद्यः अजरः जरारहितः अप्रतिष्ठः नाशरहितः अणोः परमाणोरणीयान् सूक्ष्मः । सुमनाः प्रसन्नमनस्कः । सर्वभूतेषु जागृमीत्युक्तं विवृणोति—"आत्मानं सर्वभूतेषु पुष्करे निहितं विदु"रिति । सर्वभूतेषु पुष्करे हृदयकमले निहितमात्मानं मां विदुरिति । मामित्यध्याहारः । एवमृषेर्धृतराष्ट्रं प्रति कथयतः सतः कृकवाकोर्नादादिप्रभातलक्षणान्यासन् । ततश्च श्रीसनत्कुमारश्च प्रायात् । पुनर्धृतराष्ट्रो मुनेर्नादं नाश्रौषीत् ॥

Colophon:

इति सनत्सुजातव्याख्या समाप्ता ।

Remarks—The Ms. is very much damaged. The commentary covers all the five chapters of Sanatsujātīyaparva.

॥ भारतसंग्रहः ॥

383. BHĀRATASAMGRAHA.

Substance—Palm leaf. Size—16½" × 2¼". Leaves—459. 8—10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—12400. Complete.

Subject—An abbreviated account of the Mahābhārata.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु ।

आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतम् ।

ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनम् ॥

नमः... ...

श्रीमान् पौराणिकः सूतः कदाचिद् रोमहर्षणिः ।

उग्रश्रवा नाम पुण्यं नैमिशारण्यमाविशत् ॥

वर्तमाने शौनकस्य सत्रे द्वादशवार्षिके ।

तत्रासीनान् मुनीन् सर्वान् प्राणमत् स प्रहृष्टधीः ॥

कथाश्चित्राः श्रोतुकामा मुनयः सूतनन्दनम् ।

परिवव्रुश्च तान् प्रीतान् पप्रच्छ स च कौशलम् ॥

तेऽभिनन्द्यासनासीनास्तमाहुः संश्रितासनम् ।

कुत आयाति को देशस्त्वया चरित इत्यपि ॥

विप्रान् स प्राह सुप्रीतांस्तत्रागच्छं यदृच्छया ।

सर्पसत्रं यत्र राजा चकार जनमेजयः ॥

या वैशम्पायनात् तत्र शुश्राव जनमेजयः ।

कथास्ता व्यासकथिताः प्राश्रौषं भारताश्रिताः ॥

End:

एतत् ते सर्वमाख्यातं विस्तरेण महामते ।

कुरूणां चरितं कृत्स्नं पाण्डवानां च धीमताम् ॥

एतच्छ्रुत्वा द्विजश्रेष्ठात् स राजा जनमेजयः ।

हृष्टस्तक्षशिलायास्तु पुरमागाद् गजाह्वयम् ॥

एतद् वः सर्वमाख्यातं व्यासशिष्येण धीमता ।

इतिहासं महापुण्यं पवित्रमिदमुत्तमम् ॥

य इदं शृणुयाद् विद्वान् पर्वसु द्विजसत्तमः ।

विधूतपापो निर्द्वन्द्वो ब्रह्मभावं स गच्छति ॥

एवं व्यासकृतं देव शृणुयाद् यः समाहितः ।

ब्रह्महत्याकृतं पापं तत्क्षणात् तस्य नश्यति ॥

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥

श्रीमद्वैशम्पायनः सर्पयागे
तस्मै राज्ञे प्राह पारीक्षिताय ।
सूतः प्राह श्रीमहाभारताख्यं
तत् पापघ्नं शौनकायेतिहासम् ॥

Colophon :

इति सदाशिवकृते महाभारतसंग्रहे सम्भवपर्वणि खाण्डवदहनं नाम पञ्चत्रिंशोऽध्यायः ।

इति श्रीमहाभारतसंग्रहे सदाशिवकृते सौप्तिकपर्वणि प्रथमोऽध्यायः । सौप्तिकपर्व समाप्तम् । गुरुभ्यो नमः । श्रीगणपतये नमः । श्रीकृष्णाय नमः । वासुदेवाय नमः । संकर्षणाय नमः । प्रद्युम्नाय नमः । अनिरुद्धाय नमः ।

इति श्रीमहाभारतसंग्रहे स्वर्गारोहणपर्व समाप्तम् । श्रीमहाभारतसङ्ग्रहः समाप्तः । हरिः । गुरुभ्यो नमः । इदं मध्यार्जुनं वेङ्कटपतिशास्त्रिणा लिखितम् । हरिः । कृष्णाय नमः ।

Author—Sadāśiva.

Remarks—The leaves are much damaged.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

384. BHĀVĀRTHADĪPIKĀ.

Bhāgavatavyākhyā.

Substance—Palm leaf. Size—19″ × 2″. Leaves—

187. 10 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—8000. Incomplete.

Colophon :

इति भावार्थदीपिकायां श्रीधरस्वामिविरचितायां पञ्चमस्कन्धे षड्विंशोऽध्यायः । पञ्चमस्कन्धः समाप्तः । हरिः श्रीगुरुभ्यो नमः । श्रीकृष्णाय नमः ।

Author—Same as No. 283.

Remarks—This Ms. covers *skandhas* 1—5 of the Bhāgavata.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

385. BHĀVĀRTHADĪPIKĀ.

Bhāgavatavyākhyā.

Substance—Palm leaf. Size—$21\frac{1}{2}'' \times 2''$. Leaves—194. 9 lines per page and 84 letters per line. Script—Malayāḷam. No. of Granthas—10500.

Author—Same as No. 283.

Remarks—This is a commentary on *skandhas* 5, 6 and 10 of the Bhāgavata.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

386. BHĀVĀRTHADĪPIKĀ.
Bhāgavatavyākhyā.

Substance—Palm leaf. Size—24″ × 1½″. Leaves—101. 9 lines per page and 90 letters per line. Script—Malayāḷam. No. of Granthas—5000.

Author—Same as No. 283.

Remarks—The Ms. is very old. The commentary begins from verse 9, chapter 1, *skandha* 7 and extends to verse 36, chapter 29, *skandha* 10.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

387. BHĀVĀRTHADĪPIKĀ.
Bhāgavatavyākhyā.

Substance—Palm leaf. Size—23″ × 1½″. Leaves—11. 7—9 lines per page and 85 letters per line. Script—Malayāḷam. No. of Granthas—500.

Remarks—The Ms. is worn out. It covers chapters 1—5 of the 1st *skandha*.



॥ भावार्थदीपिका (भागवतव्याख्या) ॥

388. BHĀVĀRTHADĪPIKĀ.
Bhāgavatavyākhyā.

Substance—Palm leaf. Size—18″ × 2″. Leaves—

85. 8—11 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas —3500.

Remarks—This Ms. comprises *skandha* 4, and 18 chapters in *skandha* 5.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

389. BHĀVĀRTHADĪPIKĀ.

Bhāgavatavyākhyā.

Substance—Palm leaf. Size—14″ × 1½″. Leaves—124. 10 lines per page and 50 letters per line. Script—Grantha. No. of Granthas—3500.

Remarks—The Ms. contains *skandhas* 1 and 2, and 12 chapters in *skandha* 3. The Ms. is in good condition.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

390. BHĀVĀRTHADĪPIKĀ.

Bhāgavatavyākhyā.

Substance—Palm leaf. Size—22¾″ × 2″. Leaves—97. 8—9 lines per page and 80—96 letters per line. Script—Malayāḷam. No. of Granthas—4300.

Remarks—The letters are legible. The Ms. is

damaged. It contains the commentary on *skandhas* 1 & 2 and 19 chapters in the 3rd *skandha*. From the colophon it is evident that the Ms. is 300 years old.

Colophon :

इति श्रीमद्भागवतव्याख्यायां पदभावार्थदीपिकायां श्रीधरस्वामिविरचितायां द्वितीयस्कन्धे दशमोऽध्यायः । समाप्तश्चायं द्वितीयस्कन्धः ।

൧൭ അദ്ധ്യായം ഗ്രന്ഥം ൧൰൯, ൫൬ ചില്വാനം ഉണ്ടു്. ഈ ഗ്രന്ഥം തൃശ്ശിവപേരൂർ തെക്കേമഠത്തിൽ മങ്ങലത്തുസ്വാമിയുടെ ശിഷ്യൻ കോതമങ്ങലത്തു സ്വാമിക്കു എഴുതുവാൻ മിത്രാനന്ദപുരത്തു മകിട്ടമങ്ങ്ഗലത്തു നാരായണചാത്തൻ തനിക്കൊള്ള ഗ്രന്ഥം. ഈ ഗ്രന്ഥത്തിൽ ഓല ൻ൮ പ്രഥമാദി തൃതീയത്തിൽ ൧൯ അദ്ധ്യായം ഇരിക്കുന്നപ്പോൾ കൊടുത്തു. അതിന്റെ പിന്നിൽ ഏകാദശംമൂലം ശ്രീധരീയം വ്യാഖ്യാനം ൧൨ ഓല ൧൦-ാം അദ്ധ്യായം ഗ്രന്ഥം ൫൫൦ ആക ഓല ൧ ആക ഓല ൧൧൧ ഗ്രന്ഥം ഗ്രന്ഥത്തിൽ ചില്വാനവും ഉണ്ടു്. ൮൦൦-ാമാണ്ടു മിഥുനമാസം ൨൧-ാം൹ തിട്ടമങ്ങലത്തു ചാത്തനാരായണൻകൂടെ കൊടുത്തതു് ചാത്തനാരായണൻ ൮൧൦-ാമാണ്ടു ആടിമാസത്തിൽ മക്കാട്ടുതെമുറിയമങ്ങലത്തു തിരുമുല്പാടൊടു നോക്കുവാൻ കൊടുത്തിതു. മുറിയമങ്ങലത്തു തിരുമുമ്പിനൊടവനെ കൊടുത്തിതുവാങ്ങിച്ചു ഈ ഗ്രന്ഥംതന്നെ മുമ്പിലൊരിക്കൽ നോക്കുവാൻ ഇളയൻമുൻചൊന്നോർക്കു കൊടുത്തിതു.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

391. BHĀVĀRTHADĪPIKĀ.

Bhāgavatavyākhyā.

Substance—Palm leaf. Size—21½" × 2". Leaves—32. 12—14 lines per page and 96—102 letters per line. Script—Malayāḷam. No. of Granthas—3000.

Remarks—The Ms. is written in small neat hand. It contains the commentary on *skandhas* 1 and 2.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

392. BHĀVĀRTHADĪPIKĀ.

Bhāgavatavyākhyā.

Substance—Palm leaf. Size—17" × 2". Leaves—8. 9—11 lines per page and 54—58 letters per line. Script—Malayāḷam. No. of Granthas—3050.

Remarks—Same as No. 391.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

393. BHĀVĀRTHADĪPIKĀ.

Bhāgavatavyākhyā.

Substance—Palm leaf. Size—19¼" × 2". Leaves-

230. 8—11 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas —10350.

Remarks—The Ms. contains the first 3 skandhas, 30 chapters in skandha 4, chapters 1—22 in skandha 5, 12—19, in skandha 6 and 10 verses in the first chapter of skandha 8. It is much damaged and worm-eaten.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

394. BHĀVĀRTHADĪPIKĀ.
Bhāgavatavyākhyā.

Substance—Palm leaf. Size—21″ × 1¾″. Leaves—53. 8 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—700.

Remarks—The commentary covers only the 1st skandha. The Ms. is old and damaged.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

395. BHĀVĀRTHADĪPIKĀ.
Bhāgavatavyākhyā.

Substance—Palm leaf. Size—26″ × 2″. Leaves—188. 8—10 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas —7514.

Remarks—The Ms. contains the commentary on chapters 1—7 in *skandha* 1, on *skandha* 4 complete, 1—18 chapters in *skandhas* 6 and 7 complete and 1—22 chapters in *skandha* 8.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

396. BHĀVĀRTHADĪPIKĀ.

Bhāgavatavyākhyā.

Substance—Palm leaf. Size—14½″ × 1½″. Leaves—44. 10 lines per page and 58 letters per line. Script—Malayāḷam. No. of Granthas—1600.

Remarks—The Ms. is old and worn out. The letters are not legible. The commentary covers chapters 1—90 in *skandha* 10 excluding chapters 4—68.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

397. BHĀVĀRTHADĪPIKĀ.

Bhāgavatavyākhyā.

Substance—Palm leaf. Size—21″ × 1¼″. Leaves—111. 7 lines per page and 110 letters per line. Script—Malayāḷam. No. of Granthas—5500.

Remarks—The Ms. contains the commentary on *skandha* 10 only.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

398. BHĀVĀRTHADĪPIKĀ.

Bhāgavatavyākhyā.

Substance—Palm leaf. Size—14″ × 2″. Leaves—158. 11 lines per page and 66 letters per line. Script—Malayāḷam. No. of Granthas—7000.

Remarks—The Ms. is very old and much decayed and contains the commentary on *skandha* 10.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

399. BHĀVĀRTHADĪPIKĀ.

Bhāgavatavyākhyā.

Substance—Palm leaf. Size—18″ × 2″. Leaves—46. 10 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—1840.

Remarks—The Ms. begins from the 25th verse in chapter 63 of *skandha* 10 and extends to the end of the *skandha*.

भावार्थदीपिका (भागवतव्याख्या) ॥

400. BHĀVĀRTHADĪPIKĀ.

Bhāgavatavyākhyā.

Substance—Palm leaf. Size—14″ × 1½″. Leaves—

149. 6—8 lines per page and 54 letters per line. Script—Malayāḷam. No. of Granthas—3875.

Remarks—This Ms. comprises *skandhas* 1 and 3 complete and a fragment of *skandha* 4.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

401. BHĀVĀRTHADĪPIKĀ.

Bhāgavatavyākhyā.

Substance—Palm leaf. Size—13″ × 2″. Leaves—63. 11—13 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—2800.

Remarks—This Ms. contains chapter 26 and a part of chapter 27 in *skandha* 11.

॥ मत्स्यपुराणम् ॥

402. MATSYAPURĀṆAM.

Substance—Palm leaf. Size—21″ × 2″. Leaves—281. 7—9 lines per page and 60 letters per line. Script—Grantha. No. of Granthas—8500. Complete.

Subject—Description of the Matsyāvatāra of Viṣṇu.

Beginning:

श्रीमहागणपतये नमः । अविघ्नमस्तु ।

पातालादुत्पातिष्णोर्मकरवमतयो यस्य पुच्छाभिघाता-
दूर्ध्वं ब्रह्माण्डखण्डव्यतिकरकरणव्यत्ययेनापतन्ति ।
विष्णोर्मत्स्यावतारः सकलवसुमतीमण्डलं व्याश्नुवान-
स्तस्यास्योद्गीरितानां ध्वनिभिरपहतादश्रियं वः श्रितानाम् ॥

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो ग्रन्थमुदीरयेत् ॥

अजोऽपि यः क्रियायोगान्नारायण इति स्मृतः ।
त्रिगुणाय त्रिवेदाय नमस्तस्मै स्वयम्भुवे ॥

सूतमेकाग्रमासीनं नैमिशारण्यवासिनः ।
मुनयो दीर्घसत्रान्ते पप्रच्छुर्दिव्यसंहिताम् ॥
प्रवृत्तासु पुराणासु धर्म्यासु ललितासु च ।
कथासु शौनकाद्यास्तमभिनन्द्य मुहुर्मुहुः ॥
कथितानि पुराणानि यान्यस्माकं त्वयानघ ।
तान्येवामृतकल्पानि श्रोतुमिच्छामहे पुनः ॥
कथं ससर्ज भगवान् लोकनाथश्चराचरान् ।
कस्माच्च भगवान् विष्णुर्मत्स्यरूपत्वमाश्रितः ।
केन वा हेतुना सूत विष्णुः सर्वजगन्मयः ।
नारसिंहं वपुर्धृत्वा कं वारक्षज्जगत्प्रभुः ॥
भैरवत्वं भवस्यापि पुरारित्वं च गद्यते ।
कस्य हेतोः कपालित्वं जगाम वृषभध्वजः ।
कस्माच्च देवदेवेशः सच्चिदानन्दलक्षणः ॥
धृत्वा लोके वपुर्दिव्यं कुमार इति विश्रुतः ।
सर्वमेतत् समाचक्ष्व सूत विस्तरशः क्रमात् ॥
त्वद्वाक्यामृतपाने तु न तृप्तिरिह जायते ।

सूत उवाच—

पुण्यं पवित्रमायुष्यमिदानीं शृणुत द्विजाः ।
मात्स्यं पुराणमखिलं यज्जगाद गदाधरः ॥

End :

पित्र्ये रात्र्यहनी मासः प्रविभागस्तयोः पुनः ।
कृष्णपक्षसहस्राणि जीवन्ते ह्यजराव्यथाः ॥
असङ्गा गतयस्तेषां चतस्रश्चक्रवर्तिनाम् ।
अन्तरिक्षे समुद्रेषु पाताले पर्वतेषु च ॥
इज्या दानं तपः सत्यं तेषां धर्मानुवर्तिनाम् ।
तदा प्रवर्तते धर्मो वर्णाश्रमविभागतः ॥
मर्यादास्थापनार्थं च दण्डनीतिः प्रवर्तते ।
कृष्णप्रजननाः सर्वे अरोगाः पूर्णमानसाः ॥
एको धर्मश्चतुष्पाच्च त्रेतायां तु त्रिधिः स्मृतः ।
त्रीणि वर्षसहस्राणि तथा जीवन्ति ताः प्रजाः ॥
पुत्रपौत्रसमाकीर्णा म्रियन्ते च क्रमेण ताः ।
एष त्रेतायुगे भागस्त्रेतासंख्यां निबोधत ॥
त्रेतायुगा स्वभावानां सन्ध्यां .... निवर्तते । ?
सन्ध्यांशयोः स्वभावश्च सोंऽशः पादेन तिष्ठति ॥

Colophon:

इति श्रीमत्स्यपुराणे त्रयोदशसाहस्रिकायां मन्वन्तरानुकीर्तनं नामाष्टपञ्चाशच्छततमोऽध्यायः । ... ...

Remarks--The Ms. contains 158 chapters. It is old but well preserved.

॥ माघमाहात्म्यम् (पाद्मगतम्) ॥

403. MĀGHAMĀHĀTMYAM.

(from Pādmapurāṇa.)

Substance—Palm leaf. Size—14¾" × 1¾". Leaves—61. 10 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—1900. Incomplete.

Subject—The importance of the month of Māgha.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

आरब्धुं नैमिशारण्ये सत्रं द्वादशवार्षिकम् ।

आजग्मुरखिलास्तत्र मुनयो ब्रह्मवादिनः ॥

... ...

द्वितीयं पाद्ममित्युक्तं पुराणं रोमहर्षणे ॥

पञ्च पञ्चाशदित्युक्तं सहस्रग्रन्थसंख्यया ।

तस्मिन् पुराणे भवता माघमासस्य वैभवः ॥

अग्रतो वर्णितोऽस्माकं तं भूयो वक्तुमर्हसि ।

End :

पृथिव्यां यानि तीर्थानि तेषु मज्जति यो नरः ।

जितेन्द्रियो जिताहारो न स याति यमालयम् ॥

न तीर्थे पातकं कुर्यात्त्यजेत् तीर्थोपजीवनम् ।

तीर्थे प्रतिग्रहस्त्याज्यस्त्याज्यो धर्मस्य विक्रयः ॥

दुर्जरं पातकं तीर्थे दुर्जरश्च प्रतिग्रहः ।

तीर्थे हि दुर्जरं सर्वमेतत् किं नरकं व्रजेत् ॥

सकृद् गङ्गाम्भसि स्नात्वा पूतो गाङ्गेन वारिणा ।
नरो न निरयं याति अपि पातकराशिकृत् ॥

व्रतं दानं तपो यज्ञाः पवित्राणीतराणि च ।
गङ्गाबिन्द्वभिषेकस्य न समा इति विश्रुतम् ॥

अन्यतीर्थसमां गङ्गां यो ब्रवीति नराधमः ।
स याति रौरवं वैश्य नरकं दारुणं महत् ॥

अर्थवादमिदं सर्वं पुराणमिति यो वदेत् ।
पच्यते रौरवे घोरे कुलानामेकविंशतिम् ॥

Colophon :

इति पाद्मे पुराणे माघमाहात्म्ये सप्तविंशोऽध्यायः ॥
नमः शिवाय । नारायणाय नमः । षण्मुखाय नमः ।

प्रभ्वभ्वृत्त्रधृतस्वभृष्यद् भृभ्वभ्वधृतस्वृत ।
स्वृद्धगृश्विद्धसुश्भ्रवन्यश्रुत्यृद्ध्यृद्धिमृच्छ नः ॥

प्रत्यर्थिकामदानप्रवीणभुजदण्डविधृतजगद्दण्ड ।
दक्षिणबिम्बलिराष्ट्रत्वाष्ट्रारिपो जय परश्शतं शरदाम् ॥

अधिराज्ञि भवत्समीपवर्ति-
मधुरा मुञ्चति नैव मां कथञ्चित् ।
ज्ञपयामि तथापि दक्षिणाशां
सकृदालोक्य पुनः समाश्रये त्वाम् ॥

Remarks—The Ms. is very old. In the closing Fol. occurs a verse full of rhymes in praise of the king of Dakṣiṇabimbali (Tekkumkūr). The date

of the Ms. may consequently be assigned to the days before the annexation of Tekkumkūr to Travancore State by Śrī Vīramārtāṇḍa Varmā.

॥ माघमाहात्म्यम् (पाद्मगतम्) ॥

404. MĀGHAMĀHĀTMYAM.
(from Pādmapurāṇa.)

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 2''$. Leaves—124. 8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—3000. Complete.

Subject—Beginning—Same as No. 403.

End:

इत्थं जगादोन्नतबाहुरुच्चै-
द्विजोत्तमानां कुशलानि सन्तु ॥
परमिदमितिहासं पावनं तीर्थभूतं
वृजिनविलयहेतुं यः शृणोतीह नित्यम् ।
स भवति परिपूर्णः सर्वदा सर्वकामैः
व्रजति च सुरलोकं दुर्लभं धर्महीं(नम्? नैः) ॥
उवाच सूतो गुरुवाग्विभूतिः
श्रीमाघमाहात्म्यमिदं मुनीनाम् ।
श्रुत्वा च ते श्रोत्रसुखं मुनीन्द्रा-
स्तद् दीर्घसत्रं विधिवद् वितेनुः ॥

Colophon :

इति श्रीमाघमाहात्म्ये वसिष्ठदिलीपसंवादे पञ्चत्रिंशोऽध्यायः । श्रीपद्मनाभाय परब्रह्मणे नमः । श्रीगुरुभ्यो नमः ।

Remarks—This Ms. contains chapters 1—35.

॥ माघमाहात्म्यम् (पाद्मगतम्) ॥

405. MĀGHAMĀHĀTMYAM.

(from Pādmapurāṇa.)

Substance—Palm leaf. Size—14¼″ × 2″. Leaves—106. 8—9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—2703.

Subject—Same as No. 403.

End :

कुरुध्वममलं सर्वे माघस्नानं यथाविधि ।
इति सूतवचः श्रुत्वा नैमिशारण्यवासिनः ॥
तथेत्युक्त्वा महात्मानं सूतं पौराणिकोत्तमम् ।
माहात्म्यैः कलशैश्चापि सत्रान्ते समपूजयन् ॥
यथाशक्ति च धान्यैश्च स्रग्भिश्चाप्यभ्यपूजयन् ।
स तेभ्यः प्राप्य (ते ? तां) पूजां प्रहृष्टमनसा तदा ॥
सूत उत्थाय तान् सर्वान् भुजमुद्यम्य दक्षिणम् ।
अब्रवीच्च सभामध्ये गन्तुमिच्छन् पुनः पुनः ॥
कुरुध्वं सङ्गतिं साद्भिः शृणुध्वं वैष्णवीः कथाः ।

मैत्रीं भजध्वं सर्वत्र ज्ञात्वा विष्णुमयं जगत् ॥
इत्युक्त्वा स तु तान् सर्वान् सूतः पौराणिकोत्तमः ।
आमन्त्र्य प्रययौ... ...कैलासं पर्वतोत्तमम् ॥

Colophon:

इत्युद्यापनं समाप्तम् ।
इति माघमाहात्म्ये त्रिंशोऽध्यायः ।

Remarks—This Ms. contains only chapters 1—31.

॥ मार्कण्डेयपुराणम् ॥

406. MĀRKAṆḌEYAPURĀṆAM.

Substance—Palm leaf. Size—15″ × 1¾″. Leaves—136. 10 lines per page and 44—50 letters per line. Script—Grantha. No. of Granthas—4000. Complete.

Subject—The creation, dissolution etc. of the Universe.

Beginning:

हरिः ओम् ।
मार्कण्डेयपुराणम् ।
ओम् नमो भगवते वासुदेवाय ।

यद्योगिभिर्भवभयार्तिविनाशयोग्य-
मासाद्य वन्दितमतीव विविक्तचित्तैः ।
तद्वः पुनातु हरिपादसरोजयुग्म-
माविर्भवत्क्रमविलङ्घितभूर्भुवःस्वः ॥

पायात् स वः सकलकल्मषभेददक्षः
क्षीरोदकुक्षिफणिभोगनिविष्टमूर्तिः ।
श्वासावधूतसलिलोत्कलिकाकरालः
सिन्धुः प्रनृत्यमिव यस्य करोति सङ्गात् ॥
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥
तपःस्वाध्यायनिरतं मार्कण्डेयं महामुनिम् ।
व्यासशिष्यो महातेजा जैमिनिः पर्यपृच्छत ॥ १ ॥
भगवन् भारताख्यानं व्यासेनोक्तं महात्मना ।
पूर्णमस्तमलैः शुभ्रैर्नानाशास्त्रसमुच्चयैः ॥ २ ॥

End :

परदारपरद्रव्यपरहिंसादिकिल्बिषैः ।
मुच्यतेऽनेकदुःखेभ्यो नित्यं चैवोरगोत्तम ॥
ऋद्धिर्वृद्धिः स्मृतिः शान्तिः श्रीः पुष्टिस्तुष्टिरेव (च) ।
नित्यं चैव भवेद्विप्र यः शृणोति कथामिमाम् ॥
मार्कण्डेयपुराणमेतदखिलं शृण्वन्नशोच्यः पुमान्
यो वा सम्यगुदीरयेद्रसमयं शोच्यो न सोऽपि द्विजः ॥
योगज्ञानविशुद्धसिद्धिसहितः स्वर्गादिलोकोऽप्यसौ ।
शक्राद्यैश्च सुरा(रि?दिभिः) परिवृतः स्वर्गे सदा पूज्यते ॥
पुराणमेतच्छ्रुत्वा च ज्ञानविज्ञानसंयुतम् ।
विमानवरमारुह्य स्वर्गलोके महीयते ॥

Colophon :

इति श्रीमार्कण्डेयपुराणं समाप्तम् ।
सप्तत्रिंशदधिकशततमोऽध्यायः । शुभमस्तु ।

Remarks—Readings different from those in the printed edition are to be observed herein.

॥ रामायणम् ॥

407. RĀMĀYAṆAM.

Substance—Palm leaf. Size—21″×3″. Leaves—299. 13 lines per page and 88 letters per line. Script—Malayāḷam. No. of Granthas—20000.

Colophon :

इत्युत्तरश्रीरामायणे अष्टशततमः सर्गः ।

Remarks—The Ms. contains only 108 sargas in the Uttarakāṇḍa. The leaves are held together by two ivory boards embellished with beautiful carvings.

॥ रामायणम् ॥

408. RĀMĀYAṆAM.

Substance—Palm leaf. Size—$9\frac{3}{4}″ \times 2\frac{1}{2}″$. Leaves—250. 25 lines per page and 60—64 letters per line. Script—Malayāḷam. No. of Granthas—242000. Complete.

Colophon :

सुग्रीवमित्रं सुकुमारगात्रं राजीवनेत्रं रघुराजपुत्रम् ।
सीताकलत्रं शिशिरांशुवक्त्रं श्रीरामभद्रं कलये दयार्द्रम् ॥

श्रीरामलक्ष्मणभरतशत्रुघ्नसुग्रीवहनुमद्विभिषणादिसमस्तपरिवार-
सहिताय श्रीरघुकुलभूषणाय श्रीरामचन्द्राय नमः ।

श्रीगुरुभ्यो नमः शुभमस्तु ।

൧൦൮൬ാമാണ്ടു തുലാമാസം ൨൩ാം൬ ആദിത്യവാരം രോഹിണി നക്ഷത്രത്തുനാൾ അനന്തകൃഷ്ണസൂനുനാ രാമേണ ലിഖിതം.

ശ്രീമദ്രാമായണം സമ്പൂർണ്ണം.

Remarks—The script is good. The frames of the Ms. are made of ivory.

रामायणम्

409. RĀMĀYAṆAM.

Substance—Palm leaf. Size—21″ × 1¾″. Leaves—341. 10—14 lines per page and 60—78 letters per line. Script—Malayāḷam. No. of Granthas—24000. Complete.

Remarks—The first Fol. is damaged and the last Fol furnishes the following information:

എണ്ണൂറ്റിനാൽപത്തൊമ്പതാമാണ്ടു് മീനമാസം ഒന്നാംതെതി എളംബൈലെ പണ്ടാലെക്കെ പിള്ളെക്കടി പുത്രൻ ചന്ദ്രശേഖരൻ.................................

The date corresponds to 1674 A. D. The frames of the Ms. are of ivory.

॥ रामायणम् ॥

410. RĀMĀYAṆAM.

Substance—Palm leaf. Size—19¾″ × 2″. Leaves—286. 14—18 lines per page and 76 letters per line. Script—Grantha. No. of Granthas—20000.

End:

आदिकाव्यमिदं काव्यं पुरा वाल्मीकिना कृतम् ।
यः शृणोति पठेद्वापि स पापैः परिमुच्यते ॥
पतिकामा पतिं कन्या लभते तन्मनोगतम् ।
प्रवासिनोऽपि च तथा लभन्ते चापि बान्धवान् ॥
कुटुम्बवृद्धिं धनधान्यवृद्धिं यशश्च मुख्यं सुखमुत्तमं च ।
श्रुत्वा महत् काव्यमिदं च दिव्यं प्राप्नोति सर्वां भुवि चार्थसिद्धिम् ॥
रामायणमिदं दिव्यं शृण्वतः पठतः सदा ।
प्रीयते सततं रामः स हि विष्णुः सनातनः ॥

Colophon:

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये चतुर्विंशतिसाहस्रिकायां संहितायां श्रीमत्युत्तररामायणे दशोत्तरशततमः सर्गः । ......

Remarks—The Ms. contains many variant readings. The Phalaśruti is quite different from that in other Mss.



॥ रामायणम् ॥

411. RĀMĀYAṆAM.

Substance—Palm leaf. Size—$21\frac{1}{2}'' \times 2''$. Leaves—122. 10 lines per page and 88 letters per line. Script—Malayāḷam. No. of Granthas—7000.

Remarks—The script is squarely and old. Bāla and Ayodhyā kāṇḍas alone are included in this Ms.

|| रामायणम् ||

412. RĀMĀYAṆAM.

Substance—Palm leaf. Size—20¾" × 2". Leaves—285. 8 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—7400.

Colophon :

കരമനൈ അപ്പാവയ്യൻ എഴുതിനതു.

Remarks—The Ms. covers Sargas 1—40 in Bālakāṇḍa in addition to Ayodhyākāṇḍa. The script is bold and beautiful. The Ms. is old and worn out.

|| रामायणम् ||

413. RĀMĀYAṆAM.

Substance—Palm leaf. Size—21½" × 2". Leaves—87. 10—12 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—4300.

Remarks—The Ms. covers Bālakāṇḍa and 62 Sargas in Ayodhyākāṇḍa. The readings differ much from those in the Nirṇayaśāgar edition.

|| रामायणम् ||

414. RĀMĀYAṆAM.

Substance—Palm leaf, Size—21" × 2", Leaves—96,

6—10 lines per page and 64—72 letters per line. Script—Malayāḷam. No. of Granthas—3300.

Remarks—The Ms. covers Bālakāṇḍa and 10 Sargas and 23 verses in Ayodhyākāṇḍa. The script is neat and legible.

॥ रामायणम् ॥

415. RĀMĀYAṆAM.

Substance—Palm leaf. Size—14″×2″. Leaves—78. 8—10 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—3000.

Remarks—This Ms. comprises the whole of Bālakāṇḍa. The first Fol. contains certain verses relating to the *pūrvāṅga* for *pārāyaṇa*. They begin from "कूजन्तं रामरामेति" and end with "श्रीराघवं दशरथात्मजमप्रमेयम्...". After colophon the scribe's name is given as "त्रिविक्रमै".

॥ रामायणम् ॥

416. RĀMĀYAṆAM.

Substance—Palm leaf. Size—21½″×2″. Leaves—129. 7—8 lines per page and 80 letters per

line. Script—Malayāḷam. No. of Granthas —4850.

Remarks—This Ms. comprises the Ayodhyākāṇḍa only.

॥ रामायणम् ॥

417. RĀMĀYAṆAM.

Substance—Palm leaf. Size—18″ × 1½″. Leaves —47. 10—12 lines per page and 56 letters per line. Script—Grantha. No. of Granthas —1650.

Remarks—The Ms. comprises the first 74 chapters in Bālakāṇḍa and that of the first three is damaged.

॥ रामायणम् ॥

418. RĀMĀYAṆAM.

Substance—Palm leaf. Size—21″ × 2″. Leaves—9. 11 lines per page and 54 letters per line. Script—Malayāḷam. No. of Granthas—350.

Remarks—The Ms. is damaged. It comprises a portion of Bālakāṇḍa.

॥ रामायणम् ॥

419. RĀMĀYAṆAM.

Substance—Palm leaf. Size—22″ × 2″. Leaves—28. 8—11 lines per page and 64—84 letters per line. Script—Malayāḷam. No. of Granthas—1300.

Remarks—The Ms. is worn out and written in old Malayāḷam. It comprises a portion of Kiṣkindhākāṇḍa.

॥ रामायणम् ॥

420. RĀMĀYAṆAM.

Substance—Palm leaf. Size—20½″ × 2″. Leaves—337. 8 lines per page and 46—56 letters per line. Script—Malayāḷam. No. of Granthas—9500.

Remarks—The Ms. is held together by ivory plates. It is written in legible hand and it comprises the Āraṇya, Kiṣkindhā, and Sundara kāṇḍas. It is used by H. H. The Mahārāja of Travancore on the day of Vijayadaśami for Vidyārambha.

॥ रामायणम् ॥

421. RĀMĀYAṆAM.

Substance—Palm leaf. Size—14¾″ × 2″. Leaves-

84. 8—9 lines per page and 60—74 letters per line. Script—Malayāḷam. No. of Granthas —3200.

Remarks—The Ms. covers Āraṇyakāṇḍa and 12 chapters in Kiṣkindhākāṇḍa. Leaves 1—8 are written in a different hand.

॥ रामायणम ॥

422. RĀMĀYAṆAM.

Substance—Palm leaf. Size—$9\frac{3}{4}'' \times 1\frac{3}{4}''$. Leaves—181. 10—12 lines per page and 24—26 letters per line. Script—Malayāḷam. No. of Granthas—2700.

Remarks—The script is neat and legible. The Ms. comprises the Sundarakāṇḍa only. The following verse is added at the end:

"मदीयवाक्यैस्तव कीर्तनोज्ज्वलै-
विमुक्तशोका जनकेश्वरात्मजा ।
बभौ चकोरीव विमुक्ततापा
समुद्यतैः शीतमरीचिरश्मिभिः ॥"

॥ रामायणम् ॥

423. RĀMĀYAṆAM.

Substance—Palm leaf. Size—$21'' \times 2''$. Leaves—

279. 9 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—10000.

Remarks—The Ms. comprises Kiṣkindhā, Sundara and Yuddha kāṇḍās. The Kiṣkindhākāṇḍa begins on Fol. 273 (ञ ञ ञु न्य) and ends on Fol. 334 (ञ ञ ञ ल क्क). The work is resumed on Fol. 1 (श्री न). The last 20 leaves are not numbered.

॥ रामायणम् ॥

424. RĀMĀYAṆAM.

Substance—Palm leaf. Size—21¼″ × 2″. Leaves—205. 12—13 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—12000.

Remarks—The readings vary much from those in the printed editions. The Ms. is held fast by ivory boards. After the colophon occur the following lines :

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥
सुग्रीवमित्रं सुकुमारगात्रं राजीवनेत्रं रघुराजपुत्रम् ।
सीताकलत्रं शिशिरांशुवक्त्रं श्रीरामभद्रं कलये दयार्द्रम् ॥

श्रीसीतालक्ष्मणभरतशत्रुघ्नसुग्रीवहनुमद्विभीषणादिसमस्तपरि-

वारसहिताय श्रीरघुकुलभूषणाय श्रीरामचन्द्राय नमः। हरिहर-ब्रह्मादिसमस्तदेवताभ्यो नमः।

൯൦൩-ാമാണ്ട് കന്നിമാസം ൧-ാം൹-എഴുതിത്തീൎന്നു

शैलोपरि द्विजसुताकरकल्पितेयं
रम्यैर्गुणैर्विरहितापि च वर्णमाला।
युष्मत्कराम्बुरुहमेलनगन्धयोगात्
सन्तुष्टये भवतु वः कृपया बुधेन्द्राः।
श्रीगुरुभ्यो नमः। शुभमस्तु। हरिः।

॥ रामायणम् ॥

425. RĀMĀYAṆAM.

Substance—Palm leaf. Size—14″—1¾″. Leaves—42. 6 lines per page and 42 letters per line. Script—Malayāḷam. No. of Granthas—700.

Remarks—The Ms. begins from Sarga 121 in Yuddhakāṇḍa.

॥ रामायणम् ॥

426. RĀMĀYAṆAM.

Substance—Palm leaf. Size—21″ × 1¾″. Leaves 176. 9—10 lines per page and 70—80 letters per line. Script—Malayāḷam. No. of Granthas—7400.

Remarks—The Ms. comprises Yuddhakāṇḍa only. Many leaves are damaged. After colophon occur the following verses :

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥
रामं रत्नकिरीटकुण्डलधरं केयूरहारान्वितं
सीतालंकृतवामभागममलं सिंहासनस्थं प्रभुम् ।
सुग्रीवादिसमस्तवानरगणैः संसेव्यमानं सदा
विश्वामित्रपराशरादिमुनिभिः संस्तूयमानं भजे ॥
श्रीकृष्णशिष्येण नाराय......स्तकम् ।

॥ रामायणम् ॥

427. RĀMĀYAṆAM.

Substance—Palm leaf. Size—22″ × 1¾″. Leaves—140. 7—10 lines per page and 54—90 letters per line. Script—Malayāḷam. No. of Granthas—3200.

Remarks—The Ms. contains Yuddhakāṇḍa alone. It is much damaged. The readings differ much from those in the printed editions. Towards the close of the Ms. are written the following verses :

श्यामावदातमरविन्ददलायताक्षं
बन्धूकपुष्पसदृशाधरपाणिपादम् ।
सीतासहायमजितं धृतचापबाणं
रामं नमामि शिरसा रमणीयरूपम् ॥

कालाम्भोधरकान्तिकान्तमनिशं वीरासनाध्यासितम्
मुद्रां ज्ञानमयीं दधानमपरं हस्ताम्बुजं जानुनि ।
सीतां पार्श्वकरां सरोरुहकरां विद्युन्निभां राघवं
पश्यन्तं मकुटाङ्गदादिविविधाकल्पोज्ज्वलाङ्गं भजे ॥

राजा राजार्चिताङ्घ्रेरनुपचितकलो यस्य चूडामणिस्त्वं
नागानागाधिगात्रं नभसितधवलं यद्वपुर्भूषयन्ति ।
माराभारागिणी भून्मतिरिति यमिनां येन वोऽद्राहि माराः
सप्ताः सप्ताश्वनुन्नारुणकिरणसमाः पातु बिभ्रत् त्रिणेत्रः ॥
अम्बरमम्बुनि पत्रमरातिः पीतमहीशगणस्य ददाह ।
यस्य वधूस्तनयं गृहमब्जा पातु स वः शिवलोचनवह्निः ॥
कौसल्यानयनेन्दुं दशरथहृदयारविन्दमार्ताण्डम् ।
सीतामानसहंसं रामं राजीवलोचनं वन्दे ॥
श्रीरामाय नमः ।

॥ रामायणम् ॥

428. RĀMĀYAṆAM.

Substance—Palm leaf. Size—20½" × 2". Leaves—321. 8 lines per page and 42—52 letters per line. Script—Malayāḷam. No. of Granthas—7000.

Remarks—The Ms. contains Yuddhakāṇḍa and 56 sargas in Uttarakāṇḍa. It is written in neat legible hand and preserved in a fairly good condition.

॥ रामायणम् ॥

429. RĀMĀYAṆAM.

Substance—Palm leaf. Size—21¾″ × 2″. Leaves—43. 11 lines per page and 81—96 letters per line. Script—Malayāḷam. No. of Granthas—2500.

Remarks—The Ms. begins on Fol. 348 and ends on Fol. 390. It extends to the 3rd verse in *sarga* 92 of Uttarakāṇḍa. The arrangement of *Sargas* and readings differ from those in the printed edition.

॥ रामायणम् ॥

430. RĀMĀYAṆAM.

Substance—Palm leaf. Size—14¼″ × 2″. Leaves—98. 10—11 lines per page and 58 letters per line. Script—Malayāḷam. No. of Granthas—3400.

Remarks—The Ms. covers the whole of Uttarakāṇḍa. It is in good condition. The script is neat and legible. Variants in readings are noteworthy.

॥ रामायणतात्पर्यनिर्णयः ॥

431. RĀMĀYAṆATĀTPARYANIRṆAYA.

Substance—Palm leaf. Size—14″ × 2″. Leaves—11.

8 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—240. Complete.

Subject—A critical review of the Rāmāyaṇa.

Beginning:

गणपतये नमः । अविघ्नमस्तु । श्रीनारायणाय नमः ।

जीयान्मण्डोदरीकण्ठकाण्डभूषणदूषणम् ।
जानकीजन्मफलदं जलदश्यामलं महः ॥

मनः खेलतु मे रम्ये सीतानामनि भूमनि ।
रघुनाथकथाकाशराकापीयूषधामनि ॥

लक्ष्मणो जयतान्नित्यं जानकीजानिवल्लभः ।
मेघनादसरिन्नाथविलासकलशीसुतः ॥

अनुगृह्णातु मे रामे भरतो भक्तिमुत्तमाम् ।
यथार्थनामा शत्रुघ्नो भूयाद् भूदेवभूतिदः ॥

हनूमन्तमचिन्त्यानां निधिमाश्चर्यकर्मणाम् ।
रक्षोनाथविपन्नाट्यसूत्रधारमुपास्महे ॥

यश्चकार सरस्वत्याः स्वयंवरपतिर्भवन् ।
रामायणं महाकाव्यं तस्मै वाल्मीकये नमः ॥

पितुराज्ञां पुरस्कृत्य रामायणकथामिमाम् ।
इच्छाम्यहं परिच्छेत्तुं जाह्नवीमिव नाविकः ॥

ईश्वरावेक्षणात् क्षुब्धात् प्रधानादभवन्महान् ।
महतोऽहङ्कृतिर्जज्ञे त्रिधाभूत् सापि कालतः ॥

... ...

... ...

... ...

... ...

... ...

सरस्वतीकराम्भोजप्रमृष्टश्रमवारिणा ।
चत्वारः कविना भागाः प्रतिकाण्डं प्रपञ्चिताः ॥
प्रतिप्रकरणं कर्तुरभिप्रायः परश्शतम् ।
संक्षिप्तेनैव मार्गेण ततः प्रस्तूयते मया ॥
आदौ तावद् गभीरार्थसन्दर्भोन्मुखचेतसा ।
मुनिना बालकाण्डोऽयं चतुष्प्रकरणीकृतः ॥
कथापुरुषनिष्पत्तिर्विश्वामित्राध्वरावनम् ।
त्रैयम्बकधनुर्भङ्गः सीतापाणिपरिग्रहः ॥

End:

निर्भिद्य वालिनं सीतां बुद्ध्वा विरहविह्वलाम् ।
बद्ध्वा महार्णवे सेतुं हत्वा राक्षसनायकम् ॥
साकेते सीतया साकमभिषिक्तस्य भूपतेः ।
प्राणनाथापरित्यागो लक्ष्मणस्य विसर्जनम् ॥
एवमादिविचारेण मुमुक्षुत्वं नृणां भवेत् ।
श्रीरामायणतात्पर्यपर्यालोचनयुक्तिषु ॥
निर्णीतिरेषा स्थेमानमुपगन्तुं प्रगल्भते ।

श्रीरामाय नमः ।

Colophon:

Author:

Remarks—The Ms. is old and damaged. The number of Sargas and the stanzas epitomising the subject-matter of each **Kāṇḍa** as

furnished at the close of the work are noted below :

Bālakāṇḍa	77	Sargas
Ayodhyākāṇḍa	120	,,
Āraṇyakāṇḍa	75	,,
Kiṣkindhākāṇḍa	67	,,
Sundarakāṇḍa	68	,,
Yuddhakāṇḍa	139	,,
Uttarakāṇḍa	110	,,

श्रीवाल्मीकये नमः ।

जातो वंशे रघूणां मुनिवरवचनात् ताटकां ताडयित्वा
कृत्वा पुण्यामहल्यां स्फुटितहरधनुर्जानकीवल्लभोऽभूत् ।
प्राप्तोऽयोध्यां नियोगात् पितुरटविमगात् व्यक्तसीतोऽस्तबाली
बद्धाब्धिर्ध्वस्तलङ्कादलितदशमुखः सीतया राज्यमाप ॥
भूत्वा घर्मांशुवंशे मुनिवरवचनात् ताटकां ताडयित्वा
. . . .
हित्वा राज्यं च गत्वा वनमनुजसखोऽवाप्य सुग्रीवसख्यं
हत्वा रक्षांस्यरक्षत् त्रिभुवनमखिलं सोऽस्तु रामः श्रिये वः ॥
... ...

The last verse in the work mentions the title of the work as "Śrī Rāmāyaṇatātparyaparyālocanayuktinirṇīti"

॥ रामायणव्याख्या ॥

432. RĀMĀYAṆAVYĀKHYĀ.

Substance—Palm leaf. Size—16" × 1¼". Leaves—76. 8 lines per page and 48 letters per line. Script—Grantha. No. of Granthas—1825. Incomplete.

Beginning:

अथ श्रीमदयोध्याकाण्डे प्रथमे सर्गे व्याख्येयानि व्याक्रियन्ते। गच्छतेति । मातुलकुलं मातुलगृहम् । 'कुलं गृहेऽपी'त्यमरः। अनघः सोदरो लक्ष्मणो बलवन्तं राममाश्रितः। मयापि महदाश्रयः कर्तव्य इत्येवंविधकलुषबुद्धिरूपपापरहित इत्यर्थः। नित्यशत्रुघ्नः नित्यशत्रवः कामादयः । नीतः मातुलगृहवासजनितसौख्यादिकमनेन विनासत्कल्पमिति धिया नीत इति भावः । प्रीतिपुरस्कृतः भरतविषयस्नेहेन पुरस्कृतः । प्रीतिप्रेरित इत्यर्थः । स इति।

End:

न शोच्या इति। ते रामादयः। इदं चरितं पितृवचनपरिपालनरूपं चरित्रम्। शाश्वतम् आचन्द्रार्कम्। विभूयेति। महर्षियाते महर्षिभिः प्राप्ते।

एकषष्टितमे सर्गे।

वनमिति। स्वार्ता सुतरामार्ता । यदिति। राघवः दशरथः । 'सानुक्रोशो वदान्यश्च प्रियवादी च राघवः' इति ते महद्यशस्त्रिषु लोकेषु प्रथितं यद्यपि, ततोऽप्यतिशयितायशस्करं कृत्यं कृतमिति वाक्यशेषः।

Colophon:

Author:

Remarks—A few leaves here and there in the Ms. are worn out. The commentary covers the first 60 sargas and 2 verses of the 61st in Ayodhyākāṇḍa.

॥ रामायणव्याख्या ॥

433. RĀMĀYAṆAVYĀKHYĀ.

Substance—Palm leaf. Size—14″×2″. Leaves—31. 12 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—1150.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु ।

राममिन्दीवरश्यामं राजीवायतलोचनम् ।
ज्याघोष(ग?नि)र्जितारातिं जानकीरमणं भजे ॥
वाल्मीकिनामधेयाय मुहुर्वाग्मुचे नमः ।
यः श्रीरामकथावर्षैर्जगत्तापमशीशमत् ॥
जानकीहरिसैन्यानां जीवातुरजनिष्ट यः ।
तं रामवीर्यकालाग्नेर्मारुतं मारुतिं भजे ॥
श्रीरामाय नमस्तस्मै सीतायै लक्ष्मणाय च ।
भरताय च शत्रुघ्ननाम्ने सौमित्रये मुहुः ॥
श्रीमद्रामायणार्थश्रवणसमयतः स्वान्तगूढार्थतुष्टैः
शिष्टैरेतत्प्रबन्धं विशदय निजसूक्त्येति सम्प्रार्थितः सन् ।
व्यालोच्योपक्रमादीन् विबुधजनमुदे शब्दतात्पर्यहेतून्
विद्वान् कन्दालरामानुज इति विदितो व्याकरो (र्दी?)-
त्यादिकाव्यम् ॥

अथ भगवान् वाल्मीकिः स्वेच्छया स्वाश्रमं प्रत्यागतात् स्वमहिम्नावगतत्रिलोकीवृत्तान्ताद् भगवतो नारदाल्लब्धरामगुणविषयकथासुधानुभवमुदितान्तःकरणः सन् स्वाश्रमे सुखेनावतिष्ट । * *

* * * * *

तत्राद्यकाण्डव्याख्यानं क्रियते विदुषां मुदे ।
रामानुजेन विदुषा रामभक्त्येकसिन्धुना ॥

तप .. .. .. पुङ्गवमिति तपःस्वाध्यायनिरतम् । अत्र तपः-शब्देन चित्तप्रसादहेतुभूतं व्रतनियमोपवासादिकर्मोच्यते । स्वाध्यायशब्देनार्थविवेधपर्यन्ताध्ययनमुच्यते । तयोर्निरन्तम् ।

End :

प्रिया त्वित्यादि । सीता रामस्य पितृकृतेति पितृप्रतिपादिता भार्येति प्रिया बभूव । पितृकारितो विवाहः श्लाघनीयः । गुणाद् रूपगुणाच्चापि तस्यां प्रीतिर्भूयो व्यवर्धत । तस्याश्चेत्यादि । सीताया हृदये भर्तृद्विगुणं भृशं वर्तते । तस्मात् स तस्या अन्तर्जातमपि हृदयमभिप्रायं हृदा मनसा व्यक्तमाख्याति जानाति । इदं तूत्तरश्लोकस्य विशेषः । तस्य हृदयं भूयो विशेषणातिशयेन परिवर्तते । तस्मात् तस्य हृदयं भावं मैथिली मनसा जानाति । परस्परहृदयान्तर्वर्तनेन परस्परभावमुभौ जानीतः । तया च राजर्षिसुत इति पाठः । अभिकामया सौन्दर्यातिकामया भर्तर्यधिकस्नेहया ॥

Colophon :

इति श्रीरामायणबालकाण्डव्याख्याने श्रीरामानुजीये सप्तसप्तति(तमः) सर्गः । ശ്രീരാമജയം.

Author—Kandāḷa Rāmānuja.

Remarks—The Ms. is in good condition. From the introductory verse beginning with "श्रीमद्रामायणर्णवे" it is evident that the commentator was an expounder of the Rāmāyaṇa.

॥ रामायणव्याख्या ॥

434. RĀMĀYAṆAVYĀKHYĀ.

Substance—Palm leaf. Size—20″ × 2½″. Leaves—189. 13 lines per page and 80—86 letters per line. Script—Malayāḷam. No. of Granthas—11800. Incomplete.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु ।

'इक्ष्वाकुवंशप्रभवः' इत्यारभ्य 'दण्डकान् प्रविवेश ह' त्यन्तेन संक्षिप्य नारदोक्तं रामचरितं काण्डद्वयेनोपवर्ण्याधुना रामस्य दण्डकारण्यसमुद्भूतानद्भुतविशेषान् विस्तरेण वक्तुं तृतीयकाण्डमारभते— प्रविश्येति । आत्मवान् धृतिमान् । महागहनप्रवेशे निश्शङ्कताभिप्रायार्थमिदमुक्तम् । निश्शङ्कत्वे हेतुर्दुर्धष इति । द्विषाद्भिरप्रधृष्यः । तिरस्कर्तुमशक्य इति यावत् । महारण्यमिति सामान्येनोपात्तस्य विशेषेण संज्ञा दण्डकारण्यमिति । दण्डनाम्ना राज्ञा परिपालितो देशः शुक्रशापादरण्यमभूदित्युत्तरकाण्डे वक्ष्यते । मण्डलं समूहम् ।

End:

आतिष्ठेति । वनवासे आत्मना समं दुःखानुभवात् लक्ष्मणं प्रति यौवराज्यप्रार्थना कृता । पूर्वराजाध्युषितां पूर्वराजा मन्वादयः । पितृभिः पितृपितामहप्रपितामहैः । सर्वात्मना पर्यनुनीयमान इत्यनेन ज्येष्ठे भरते वर्तमाने अहं यौवराज्यानर्ह इति लक्ष्मणेन निषेधे कृते रामेण पुनः पुनरनुनयनं कृतमित्यवगम्यते । राघव इति । वापीति निपातसमुदायोऽवधारणार्थो भिन्नक्रमः । ससुहृज्ज्ञातिबान्ध-

वेत्यर्थः । राममेवानुपश्यन्तो नाभ्यहिंसन् परस्परं धार्मिकं राममेवानुचिन्तयन्तः अन्योन्यं वैराणि प्रजहुरित्यर्थः । आदिकाव्यमिति । आर्षम् ऋषिः वेदः तत्सम्बन्धि वेदोपकरणम् उपबृंहणमिति यावत् । पुरा अवतारात्पूर्वम् । पुत्रकाम इति । रामाभिषेचनं रामाभिषेकावधिकमित्यर्थः । श्रवणेनेति । सम्प्रति शृण्वतामित्यर्थः । विनायका इति । विघ्नकारिणो ग्रहविशेषाः । आयुष्यमिति । सौभ्रात्रकं भ्रातृसुखकरम् । भक्त्येति । संहितायां संहितार्थत्वात् संहितेति व्यपदेशः ।

Colophon:

इति श्रीकन्दालरामानुजीये श्रीमद्युद्धकाण्डव्याख्याने द्वात्रिंशच्छततमः सर्गः । श्रीमद्युद्धकाण्डव्याख्यानं समाप्तम् ।

श्रीकृष्णाय परब्रह्मणे नमः । सोमेश्वरी रक्षतु । शुभमस्तु । श्रीरामाय नमः ।

रामं रामानुजं सीतां भरतं भरतानुजम् ।
सुग्रीवं वायुसूनुं च प्रणमामि पुनः पुनः ॥

941-ാമാണ്ടു പാൎത്ഥിവവൎഷം മകരമാസം 4-ാം എഴുതിമുകിഞ്ഞു അനന്തശംകരനെ ലിഖിതമിദം പുസ്തകം.

Author—Kandāḷarāmānuja.

Remarks—The Ms. contains the Āraṇya, Kiṣkindhā, Sundara and Yuddha kāṇḍas. It is in a fairly good condition.



॥ रामायणमाहात्म्यम् (उमासंहितागतम्) ॥

435. RĀMĀYAṆAMĀHĀTMYAM.
(From Umāsamhitā.)

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 2''$. Leaves—

153. 8 lines per page and 18 letters per line. Script—Grantha. No. of Granthas—1400. Incomplete.

Subject—The excellencies of the Rāmāyaṇa.

Beginning:

अविघ्नमस्तु ।

विघ्नेश्वरमहं वन्दे गिरिजागात्रसम्भवम् ।
दन्तावलनिभं वन्दे विघ्नाद्रिच्छेदनेऽपि वा ॥
कैलासशिखरे रम्ये पार्वत्या सह शङ्करः ।
विचचार महायोगी स्वरूपमनुचिन्तयन् ॥

... ...

ऋषिभिः सनकाद्यैश्च स्तूयमानापदानकम् ।
देवी प्रणम्य पप्रच्छ देवदेवं पिनाकिनम् ॥
जय देव महादेव जय चन्द्रार्धशेखर ।
जय मन्नाथ लोकस्य सृष्टिस्थित्यन्तकारक ॥
जय वेदान्तसंवेद्य जय वाचामगोचर ।
जय ब्रह्मादिदेवानामाद्य कर्तृविधायक ॥
संहारकारिणे तुभ्यं नमो विश्वस्वरूपिणे ।
त्वं वेदस्त्वं वषट्कारस्त्वमोङ्कारस्तथा स्वधा ॥
यज्ञश्च यज्ञकर्ता च हुतभुक् सोमपास्तथा ।
चन्द्रसूर्यौ तथा वायुः पृथिवी जलमेव च ॥
आकाशश्च प्रशान्तात्मा समुद्रश्च सरीसृपः ।
वृक्षाश्च मनुजाताश्च सिंहाद्या मृगजातयः ॥
सर्वं त्वद्रूपतोऽभिन्नं न पश्यामि मनागपि ।
इति स्तुतो गिरिजया प्रसादमकरोच्छिवः ॥

किं विवक्षास्ति ते देवि उभे सर्वाङ्गसुन्दरि ।
शृणु वक्ष्यामि तत्त्वेन मनसा समवगीरितान् ॥
देवी—

... ...

मन्नाम्ना सहिता शम्भो प्रोक्ता काचन संहिता ।
तां पुनः श्रोतुमिच्छामि रघुनाथकथाफलाम् ॥

End :

सह्यजाया जले स्नात्वा श्रीरङ्गनिलयं हरिम् ।
वैशाख्यामाम्रफलकं फलोपेतं निवेदय ॥
तेन वत्सरपूजायाः फलं प्राप्नुहि राक्षस ।
वर्षे वर्षे राक्षसेन्द्रो वैशाख्यां रङ्गमन्दिरे ॥
पूजयत्यनिशं देवि संवत्सरफलाप्तय ।
रङ्गधाम्नो राक्षसेन्द्रो मन्दिरं विश्वकर्मणा ॥
कारयामास विधिवत् सप्तप्राकारशोभितम् ।
चन्द्रपुष्करिणीतीरे श्रीदेवीश्रीधरोरमि ॥
सम्पूज्य हरिणादिष्टो लोकं प्राप्य विभीषणः ।
स्नात्वा कवेरजातोये दृष्ट्वा श्रीरङ्गवासिनम् ॥
मोक्षलक्ष्मीपरिणता मुक्ताः स्युरमरा भवात् ।
न्यायेन कारयामास राज्यस्य परिपालनम् ॥
प्रच्छन्नाः सञ्चरन्त्येव मानुषा इव राक्षसाः ।
काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ॥
देशोऽयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः ।

Colophon:

हरिः । ॐ । शुभमस्तु । श्रीरामचन्द्राय नमः

Author :

Remarks—The work furnishes the details of the purification of Vibhīṣaṇa and other devotees of Śrī Rāma, by their visit to the Śrī Raṅga Temple.

॥ रामायणमाहात्म्यम् (उमासंहितागतम्) ॥

436. RĀMĀYAṆAMĀHĀTMYAM.
(from Umāsaṃhita.)

Substance—Palm leaf. Size—18″×2″. Leaves—21. 13 lines per page and 76 letters per line Script—Malayāḷam. No. of Granthas—1200. Incomplete.

Subject—Beginning—Same as No. 435.

End :

अभेद्यकवचं धत्ते रावणेर्हृदयस्य तु ।
नप्तारं ब्रह्मणो रामो हत्वा लोकस्य गुप्तये ॥
सेतौ तीर्थं धनुष्कोट्या कृतवान् पापशान्तये ।
विभीषणाद्याः सुहृदो हतामित्रं रघूत्तमम् ॥
विधिवत् पूजयामासुः पाद्यार्घ्यासनवन्दनैः ।
रावणान्तकमावृत्य वृन्दारकगणा दिवि ॥
सप्तमौलौ रघुवरं दशशीर्षरिपुं रणे ।
ववर्षुः पुष्पवर्षेण सन्तानकसमुद्भवैः ॥
निधाय बाहुं त्रिणतस्य कोट्या-
मायोधनोद्भूतरजोषिताङ्गम् ।

जटाश्चितं फुल्लमुखारविन्दं
पश्यन्ति रामं कृतपुण्यपुञ्जाः ॥

मित्रैः समेतं गतशत्रुसङ्गं कृपाकरं श्यामळदेहयुक्तम् ।
कोदण्डदीक्षागुरुमादरेण भजन्ति ये धन्यतमा वरेण्यम् ॥
जटाधरं फुल्लमनोज्ञहासं सौमित्रिणा सेवितवामभागम् ।

Colophon :

इति श्रीमदुमासंहितायां श्रीमद्रामायणमाहात्म्ये सुन्दरकाण्डमहिमानुवर्णनं नाम एकादशोऽध्यायः ।

Author :

Remarks—Same as No. 435.

॥ रामायणामृतकतकटीकासारसंग्रहः ॥

437. RĀMĀYAṆĀMṚTAKATAKAṬĪKĀ-SĀRASAṄGRAHA.

Substance—Palm leaf. Size—14″ × 2″. Leaves—147. 12—15 lines per page and 46 letters per line. Script—Grantha. No. of Granthas—6250. Incomplete.

Beginning :

गणपतये नमः ।

वैदेहीतटिदुज्ज्वलः प्रविलसच्चापोत्तमेनाङ्कितो
वित्रस्ताखिललोकभीतिहरणश्रीवाक्यमञ्जुध्वनिः ।

दोग्धा निर्मलभक्तचातकततीसञ्जीवनं जीवनं
पायाद् दुःखितकामिसौख्यफलदः श्रीरामकालाम्बुदः ॥

भो भोः किमिदं रामायणं व्याख्येयम् उत न । यदि प्रयोजनं व्याख्येयम् यदि नो न । प्रयोजनमप्यैहिकमामुष्मिकं वा स्यात् । न तावत् कृषिवाणिज्यसेवादिना धनधान्यादिवदैहिकं किञ्चित् प्रयोजनं रामायणपाठात् पश्यामः । नाप्यामुष्मिकम् । निरयं निस्तितीर्षुः (संसारात् स्वर्गारुरुक्षुर्वा मुमुक्षुर्वा रामायणमाम्नायादिति श्रुतिः स्मृतिर्वास्ति । पारलौकिके चार्थे ते एव प्रमाणम् । अपि च विशिष्यामुष्मिकश्रेयोर्थिभिरिदमनादर्तव्यम् । काव्यत्वात् । 'काव्यालापांश्च वर्जयेदिति च घण्टाघोषः ।

End :

तद् दृष्ट्वेति । जृम्भमाणं वर्धमानं । समाविध्य आस्फाल्य । अम्बरीषं भ्राष्ट्रम् । तस्य मुखम् । विधूमः पावक इवाशोभत । आरुजन् अत्यर्थं भिन्दानः । मे भूमिसङ्गेन मध्ये विश्रमाय क्वचित् पादविक्षेपसङ्गराहित्येनैव । सहस्रशः परिगन्तुमुत्सह इति सहस्रवारमेकयत्नेन प्रदक्षिणं कर्तुं शक्नोमीत्यर्थः । वैनतेयं परिगन्तुमिति जातिस्वाभाव्यात् प्रदक्षिणाकारपरिगमनवन्तमहमपि सहस्रशः परिगन्तुं शक्तः । उदयादिति । उदयगिरेः प्रस्थितमादित्यं प्राप्य तेन सह प्रस्थितं तमादित्यमनस्तमितमण्डलं तमेव

Colophon :

इति श्रीमत्किष्किन्धाकाण्डे सप्तषष्टितमः सर्गः ।

Author :

Remarks—This commentary epitomises the Amṛtakatakavyākhyā wherein the commentary on Bāla, Ayodhyā, Āraṇya kāṇḍas and 68 *sargas* in Kiṣkindhākāṇḍa is embodied. The last Fol. is missing.

॥ रामायणामृतकतकटीकासारसंग्रहः ॥

438. RĀMĀYAṆĀMṚTAKATAKATĪKĀ-SĀRASAṄGRAHA.

Substance—Palm leaf. Size—16″ × 1½″. Leaves—31. 9—10 lines per page and 75—80 letters per line. Script—Grantha. No. of Granthas—1500. Incomplete.

Beginning:

आमुष्मिकं हि तावत्को विद्वान् आत्मानात्मसकलपरमार्थतत्वज्ञा......व्यवहारे प्रजारञ्जनादौ सामर्थ्यं चातुर्यं तद्वान् एकप्रियदर्शनः इति, कामसौन्दर्यतो नित्यसौमुख्यत एकरूपतया प्रियदर्शनं यस्य स तथा । आत्मवान् वशीकृतान्तःकरणः । क्रोधं विजि......जिघांसा जितक्रोधः विगीतव्यर्थहिंसार...प्रसङ्गराहित इति यावत् । द्युतिः सर्वलोकसदादिदृक्षाजननी देहसौन्दर्यकान्तिविशेषलहरी तद्वान् । अनसूयकः विद्यैश्वर्य.........रौन्नत्यसङ्ग......सूयातद्राहित इति यावत् । संयुगे यथा प्रासयुद्धकाले जातरोषस्य कस्य रोषाद् देवा इन्द्रादयोऽपि बिभ्यति ।

यदेतदुक्तगुणजातं तदेतादृशस्यास्तीति श्रोतुमिच्छामि । हे महर्षे अपरोक्षादिति इन्द्रियाशेषार्थं भुर्भुवस्सुवर्लक्षणान् त्रीन् लोकान् तत्रत्यवृत्तान्तं जानातीति तथा । वाल्मीकिशब्दः.....वल्मीक-गर्भान्निर्गतत्वोपाधिना वल्मीकापत्यत्वस्य द्रोणीपुत्रकलशीसुतादि-वत् सुवचनत्वात् ।

End :

तदा मनोजवं पादवेगमास्थाय महेन्द्रं केरलभूरूपं गमिष्या? समुद्रान्मया वासाय याचता अतो ये लो.......निर्मितास्तान् जहि । धनुषः परं ग्रहणाकर्षणादिव्यापारं............लोकप्र-तिबन्धाय मोक्तुमर्हसि । शरमोक्षे मति दत्तशरत्व.....अप्र-तिबन्धो महेन्द्रं गमिष्यामि । स जामदग्निः । शरक्षेपान-न्तरं तथा कथितान् स्वर्लोकान् रामेण तेन शरेण...दृष्ट्वा महेन्द्रं जगाम । आत्मगतं रामो मदन्तर्यामीति तत्त्व-ज्ञानं प्राप्तवान् । आत्मगतिं च स्वस्थानं च जगा........

Colophon :

पञ्चसप्तति(तमः)सर्गः ।

इति श्रीमद्रामायणे टीकाव्याख्यासङ्ग्रहे प्रथमः सर्गः ।

Author :

Remarks—The Ms. contains the commentary on sargas 1—76 of Bālakāṇḍa. The leaves are damaged.

॥ ललितोपाख्यानम् (ब्रह्माण्डगतम्) ॥

439. LALITOPĀKHYĀNAM.

(from Brahmāṇḍapurāṇa.)

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 2''$. Leaves—132. 9 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—2970. Complete.

Subject—The *Avatāra* of Lalitā, the slaying of Bhaṇḍāsura etc.

Beginning:

हरिः ॐ

श्रीगणपतये नमः । अविघ्नमस्तु ।

ओङ्कारमूर्तिमव्यक्तमनन्तं सत्यचिद्घनम् ।
द्वादशान्तस्थितं श्रीमन्मीनाक्षीशं शिवं भजे ॥

अस्तु वः श्रेयसे नित्यं वस्तु वामाङ्गसुन्दरम्
यतस्तृतीयो विदुषां तुरीयं तु परं महः ॥

श्रीमत्सुन्दरमीशानं श्रीमत्सिद्धिविनायकम् ।
षण्मुखं स्कन्दमानन्दं विष्णुं ब्रह्माणमाश्रये ॥

अगस्त्यो नाम देवर्षिर्वेदवेदाङ्गपारगः ।
सर्वसिद्धान्तसारज्ञो ब्रह्मानन्दरसात्मकः ॥

चचाराद्भुतहेतूनि तीर्थान्यायतनानि च ।
शैलारण्यापगा मुख्याः सर्वान् जनपदानपि ॥

तेषु तेष्वखिलान् जन्तूनज्ञानतिमिरावृतान् ।
शिश्नोदरपरान् दृष्ट्वा चिन्तयामास तान् प्रति ।

तस्य चिन्तयमानस्य चरतो वसुधामिमाम् ।
प्राप्तमासीन्महापुण्यं काञ्चीनगरमद्भुतम् ॥
तत्र वारणशैलेन्द्रमेकाम्रनिलयं शिवम् ।
कामाक्षीं कलिदोषघ्नीमपूजयद्यथात्मवान् ॥
लोकहेतोर्दयार्द्रस्य चिन्तयानस्य धीमतः ।
चिरकालेन तपसा तोषितोऽभूज्जनार्दनः ॥
हयग्रीवतनुं कृत्वा साक्षाच्चिन्मात्रविग्रहाम् ।
शङ्खचक्राक्षवलयपुस्तकोज्ज्वलबाहुकाम् ॥
पूरयित्रीं जगत् कृत्स्नं प्रभया देहजातया ।
प्रादुर्बभूव पुरतो मुनेरमिततेजसः ॥
तं दृशानन्दभरितः प्रणम्य च मुहुर्मुहुः ।
विनयावनतो भूत्वा स तुष्टाव जगत्पतिम् ॥

End:

यत्रेदं ललितापुस्तं वर्तते कुम्भसम्भव ।
तस्मिन् देशे न रोगः स्यान्न च दुर्भिक्षसम्भवः ॥
पूजाविधानमखिलं शास्त्रोक्तं कुम्भसम्भव ।
खण्डान्तरे तु वक्ष्यामि तदाकर्णय शाश्वतः ॥
य इदं पाठकं सम्यक्पूज्य वित्तानुसारतः ।
वस्त्रैश्च भूषणैश्चैव कर्णामात्रा? ङ्गुलीयकैः ॥
नमस्कृत्य च सन्तोष्य गन्धपुष्पैश्च भोजनैः ।
समाप्तौ च विशेषेण ब्राह्मणान् वेदपारगान् ॥
भोजयित्वा दाक्षिणाद्यैः श्रीदेवीभक्तिमान् नरः ।
शृणुयात् सावधानेन चा समाप्तेः कथामिमाम् ॥
तस्य देवी प्रसन्ना तु सर्वसिद्धिं च दास्यति ॥
आरोग्यं सन्ततिं चैव भुक्तिं मुक्तिं च दास्यति ।

श्रीहयग्रीवः—

आख्यानमेतदवदातगुणाः पठन्ति
सम्पत्प्रदायकमपाकृतसर्वदुःखम् ।
विज्ञानदीपिकलिकां ललिताप्रसादा-
दासाद्य चेतसि भ(त्र?ज)न्ति परं प्रसादम् ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसंवादे ललितो(-पा)ख्याने मन्त्रराजप्रकाशकथनं नाम द्वात्रिंशोऽध्यायः ।
श्रीदेव्यै नमः ।

ലളിതോപാഖ്യാനം ആയിരത്തി അറുപത്തി മൂന്നാംമാണ്ട തുലാമാസം ഇരുപത്തി നാലാംതീയതി ഗ്രന്ഥം സുകക്ഷിട്ടു രാമാശാസ്ത്രികൾ എഴുതിതീർത്തു. ശുഭം.

Author :

Remarks—This Upākhyāna is in the form of a dialogue between Hayagrīva and Agastya. It comprises 32 chapters only. The date of transcription as noted under colophon is 1063 M. E.

॥ वराहपुराणम् ॥

440. VARĀHAPURĀṆAM.

Substance—Palm leaf. Size—22″ × 2″. Leaves—145. 8 lines per page and 62 letters per line. Script—Malayālam. No. of Granthas—4300.

Subject—The evolution of the Universe, the secondary creation etc.

Beginning :

... ... मम
वेदा नष्टा ममाचक्ष्व मुने प्रब्रूहि कारणम्
.... ॥
....
.... विस्मयेन तपोधन ।
पृष्टा क एते पुरुषा एतत् कथय शोभने ॥
... ...
... ... भो नारायणः स्वयम् ॥
वह्निभू. . . . . .हत्याशु पापमुच्चारणादनु ॥
एतस्य हृदये ....

End :

यथाशक्त्या नृपो ग्रामैः पूजयेद्वाचकं धरं ।
अवज्ञया श्रुतेनेत्थमपूज्य च धरा ....॥
....
...............मूर्खश्च मानवः ॥
श्रुत्वा च पूजयेत् ....शास्त्रं वाराहसंज्ञितम् ।
सर्वपापविनिर्मुक्तो विष्णुसायुज्यतां व्रजेत् ॥

Colophon :

इति वाराहपुराणे . . . . .पाख्याने पञ्चशततमोऽध्यायः ।
....श्वतोपाख्यानं समाप्तम् ।
संहिता चेयं समाप्ता... ....

जज्ञे बहुज्ञं परमात्युदारं
यं द्वीपमध्ये सुतमात्मवन्तम् ।
पराशराद् गन्धवती महर्षिं
तस्मै नमो ज्ञानतमोनुदाय ॥ हरिः ॥

नीलकण्ठेन लिखितमिदं पुस्तकम् ।
गोविन्दाय श्रीवासुदेवाय श्रीपार्वत्यै नमः ।
शिवाशिवशिवाभ्यां नमः । परमात्मने....... ॥

Remarks—The Ms. is much decayed. Three leaves at the beginning and two at the close are missing. The story of the three-fold births of Jaya and Vijaya, the *dvārapālakas* of Vaikuṇṭa is also narrated.

॥ वराहपुराणम् ॥

441. VARĀHAPURĀṆAM.

Substance—Palm leaf. Size—19½″×2″. Leaves—45. 12—14 lines per page and 96 letters per line. Script—Malayāḷam. No. of Granthas—3250. Incomplete.

Subject—Same as No. 440.

Beginning:

.......ह्मणः कश्चिद्वेदाभ्यासरतो मुने ।
वसत्यविरतं प्रातःस्नायी त्रिषवणे रतः ॥

नाम्ना संयमनः पूर्वमेकस्मिन् दिवसे नदीम् ।
धर्मारण्ये गतः स्नातुं तथा भागीरथीं शुभाम् ॥
तत्रासन्नं महायूथं हरिणानां विचक्षणः ।
लुब्धो निष्ठुरको नाम धनुष्पाणिः कृतान्तवत् ॥
आययौ तज्जिघांसुः संस्तस्थौ संयोज्य सायकम् ।
ततः संयमनो विप्रो दृष्ट्वा तं मृगयारतम् ॥
वारयामास्य मा भद्र जीवघातमिमं कुरु ।
एतच्छ्रुत्वा वचो व्याधः स्मितपूर्वमिदं वचः ॥
उवाच नाहं हिंसामि वृथा जीवान् द्विजोत्तम ।
परमात्मा स्वयं भूतैः क्रीडत्यर्भकवत्स्वयम् ॥
कृत्वा मृदा बलीवर्दं तद्वदेव न संशयः ।

End :

एकैका दानवास्तत्र वज्रहस्तसमा युधि ॥
एकैकं स्पर्धता देवा जेतुं तेन बलेन ह ॥
तेषां प्रधानभूतानामयुतानि च कोटयः ।
एषामेकस्यानुयाति नावद्बलमथोर्जितम् ॥
तेषां दैत्यसहस्राणि बलिनां तु महात्मनाम् ।
समितिं चक्रुरव्यग्रास्तदा दैत्याः प्रहारिणः ।
प्रयाणं रोचयामासुर्देवसैन्यजिघांसवः ॥
विचित्रनानाविविधा ध्वजाग्रा विचित्रशस्त्रा विविधोग्ररूपाः ।
दैत्याः सुरान् जेतुमीषुस्तथोच्चैर्ननर्दु.... .... ॥

Colophon :

इत्यादिवाराहे धरणीव्रते सप्तचत्वारिंशोऽध्यायः ।

Remarks—Chapters first and last are incomplete. The work is written in neat hand.

॥ वल्कलक्षेत्रमाहात्म्यम् (स्कान्दगतम्) ॥

442. VALKALAKṢETRAMĀHĀTMYAM.

(from Skāndapurāṇam)

Substance—Palm leaf. Size—6″ × 1¾″. Leaves—138. 10 lines per page and 16—24 letters per line. Script—Malayāḷam. No. of Granthas—1725.

Subject—The origin etc. of the Janārdanakṣetra in Travancore.

Beginning:

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

बालेन्दुमौलितनयस्य महाविभूते-
विघ्नेश्वरस्य चरणद्वयमम्बुजाभम् ।
ध्यायामि चेतसि भवार्णववस्वभावं
तापत्रयप्रशमनं बुधबृन्दलीलम् ॥

ऋषयः —

बादरायणसच्छिष्यप्रियं पूर्णकथारसम् ।
पृच्छामि त्वामिदं तत्त्वं सूत पौराणिकोत्तम ॥

कल्पक्रोडस्य माहात्म्यं श्रुतं कर्णरसायनम् ।
श्रुतं श्रोतव्यतत्त्वार्थं परमं त्रिभिसम्मितम् ॥
इदानीं श्रोतुमिच्छामः कथाश्रवणलालसाः ।
जनार्दनस्थलस्याग्र्यं माहात्म्यं मङ्गलायनम् ॥
जनार्दनमिदं क्षेत्रं कदाभूत् केन निर्मितम् ।
कथं श्रुतं किमाश्चर्यं तद्वर्णय सुविस्तरम् ॥
व्यासप्रसादसम्पन्नो भवान् सर्वविदां वरः ।
तदविज्ञा न ते किञ्चिल्लोके वेदे च विद्यते ॥
इति पृष्टस्तदा सूतो नैमिशारण्यवासिभिः ।
मुनिभिः शौनकाद्यैरिदमाह हसन्मुनीन् ॥

End :

इत्युक्तं निगमागमाद्वयरसं वेदान्तसारं शुभं
माहात्म्यं परमं जनार्दनपतेः क्षेमावहं मोक्षदम् ।
ये शृण्वन्ति पठन्ति सन्ततममी सौभाग्यकूलंकषा
भोगस्वर्गरसापवर्गफलिनः स्युः कल्पवृक्षा इव ॥

Colophon :

इति श्रीकाशखिण्डे जनार्दनमाहात्म्ये एकत्रिंशोऽध्यायः । शुभमस्तु । ... ...

Remarks—Varkala, the seat of Janārdanakṣetra, is a well-known place of pilgrimage in Travancore. The work is only a part of the Kāśikāṇḍa in Skāndapurāṇa.

॥ वल्कलक्षेत्रमाहात्म्यम् (ब्रह्माण्डगतम्) ॥

443. VALKALAKṢETRAMĀHĀTMYAM.

(from Brahmāṇḍapurāṇa.)

Substance—Palm leaf. Size—14″ × 2″. Leaves—27. 9 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—750.

Subject—Same as No. 442.

Beginning:

हरिः ॐ ।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
वन्दे सुन्दरराजं तं श्रीवराहात्मकं विभुम् ।
पावनागारनिलयं जनार्दनतनुं हरिम् ॥
सुपुण्ये नैमिशारण्ये शौनकाद्या महर्षयः ।
प्रातःसवनहोमान्ते सूतं पप्रच्छुरादरात् ॥

ऋषयः—

व्यासशिष्य महाप्राज्ञ सूत तद्वद विस्तरात् ।
वल्कलाख्ये महापुण्ये क्षेत्राणामुत्तमोत्तमे ॥
दक्षिणाम्बुनिधेस्तीरे रामक्षेत्रे जनार्दनः ।
नित्यं वसति सर्वेषां दर्शनान्मुक्तिदो नृणाम् ॥
इत्युक्तं हि त्वया पूर्वं क्षेत्रं तद्वल्कलाभिधम् ।
कुतोऽभूत् सर्वदेवेशः कुतोऽत्रास्ते जनार्दनः ॥
क्षेत्रस्यास्य च माहात्म्यं श्रोतुमिच्छामहे वयम्
कति तीर्थानि सन्त्यत्र तत् सर्वं वद नो मुने ॥

इत्युक्तो मुनिभिस्तत्र स्मृत्वा सूतो जनार्दनम् ।
रोमाञ्चिताङ्गो नत्वा तं प्राह तान् रौमहर्षणिः ॥

End :

इत्युक्तास्ते महाभागा ऋषयस्तु तपोधनाः ।
सन्तोषमतुलं प्राप्य मत्र्कर्मसमर्पणम् ॥
समर्पयन्तो देवेशे ब्रह्मण्यस्मिन् जनार्दने ।
सन्तुष्टचित्तास्ते सर्वे पूर्ववत् सत्रमासत ॥

Colophon :

इति श्रीमद्ब्रह्माण्डपुराणे क्षेत्रखण्डे वल्कलक्षेत्रमाहात्म्ये त्रयोदशोऽध्यायः । श्रीजनार्दनाय नमः ।

Remarks : Refer to No. 442.

॥ वल्लभक्षेत्रमाहात्म्यम् ॥

444. VALLABHAKṢETRAMĀHĀTMYAM.

Substance--Palm leaf. Size—$9\frac{3}{4}'' \times 1\frac{7}{8}''$. Leaves—12. 9 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—216. Incomplete.

Subject—The glory of ŚrīVallabhakṣetra.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

पायाद् वश्चक्रपाणिर्द्विजवरगृहिणीभक्तिभारातिहृष्ट-
श्चक्रेणैकेन हत्वा दितिजमसुहृदं तोलियाख्यं महान्तम् ।

कृत्वा तत्रारमद्रावुपतटिनि महादेवलिङ्गप्रतिष्ठां
भूयश्चक्रेण सार्द्धं सपदि वसति यो वल्लभक्षेत्रमुख्ये ॥

शौनक उवाच—

सूत जीव चिरं साधो वद नो वदतां वर ।
वल्लभक्षेत्रमाहात्म्यं येन सन्तुष्यते हरिः ॥

सूतः—

वल्लभक्षेत्रमाहात्म्यं वक्तुं कः शक्नुयाद् भुवि ।
यत्र साक्षाज्जगन्नाथः शिलारूपेण वर्त्तते ॥
यत्र शास्त्रानुसारेण रक्षा नित्यं प्रवर्त्तते ।
यत्राधिपतयो विप्राः शस्त्रशास्त्रविशारदाः ॥
द्रोणतुल्या विराजन्ते कृष्णप्रीणनतत्पराः ।
यत्र तन्त्रिवराः सर्वे श्रौतस्मार्तविशारदाः ॥
यत्र राजवराः सर्वे दासतां बिभ्रति स्वयम् ।
यत्र क्षत्रियराजस्य साम्राज्यं स्पष्टमीक्ष्यते ॥
श्रीदुर्वासा मुनिर्यत्र सर्वकार्यप्रवर्त्तकः ।
शापभीत्या च यत्रैव तण्डुलादिर्न चोर्यते ॥

End :

अलङ्कारस्य दानं च भक्त्या चालङ्क्रिया विभोः ।
कषायस्य च वस्त्रस्य तथा कौसुम्भपट्टयोः ॥
दानं यन्मुनिशार्दूल तदनन्तफलं भवेत् ।
तथा शङ्करमङ्गल्याः पूजायाः सन्ततिर्द्विज ।
विच्छिन्नाया हरिप्रीतेर्हेतुः स्यान्नात्र संशयः ॥
तथा तत्रैव पूजायां तण्डुलप्रस्थपूरकम् ।
नमस्कारस्य भुक्तिश्च विष्णोः प्रीतिकरी परा ॥
प्राकारस्य बहिर्देशे स्वारामोद्यानसाधनम् ।

तत्सेचनं शोधनं च हरिप्रीतिकरं महत् ॥
श्रीवल्लभसमाख्यस्य विष्णोरुत्कर्षकीर्तनात् ।

Colophon :

इति वल्लभक्षेत्रमाहात्म्ये तृतीयोऽध्यायः ॥

Author :

Remarks--This work is in the form of a dialogue between Sūta and Śaunaka. It consists of four chapters of which the last is incomplete. Śrī Vallabha is the presiding deity of the temple at Tiruvallā in Travancore.

॥ वल्लभक्षेत्रमाहात्म्यम् ॥

445. VALLABHAKṢETRAMĀHĀTMYAM.

Substance—Palm leaf. Size—$7\frac{1}{4}'' \times 2''$. Leaves—18. 9 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—243. Incomplete.

Subject—Beginning—Same as No. 444.

End :

श्रीवल्लभसमाख्यस्य विष्णोरुत्कर्षकीर्तनम् ।
निन्दनाश्रवणं चैव तस्य प्रीतिकरं भवेत् ।
श्रीवल्लभ हरे विष्णो वासुदेव जनार्दन ॥
इति नामाभिधा चापि हरिप्रीतिकरीदृशी ॥
पुरा काश्चिद् द्विजो नाम्ना दुर्दमोऽभून्महामुने ।

अतीतजन्मपुण्यात्मो मात्रादिभिरशिक्षितः ॥
स यौवनादिमारभ्य गणिकागृहमाश्रितः ।
सदाचारविहीनश्च दुराचारपरिग्रहः ॥
मातरं पितरं चापि दुरात्मा ... ...

Colophon :

इति वल्लभक्षेत्रमाहात्म्ये तृतीयोऽध्यायः ।

Author :

Remarks—The Ms. is in good condition.

॥ वायवीयसंहिता (शैवगता) ॥

446. VĀYAVĪYASAMHITĀ.

(from Śaivapurāṇa.)

Substance—Palm leaf. Size—23½" × 2". Leaves—46. 6—7 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—900. Incomplete.

Subject—The slaying of the Tripuras.

Beginning :

गणपतये नमः ।

नमः शिवाय सोमाय सगणाय ससूनवे ।
प्रधानपुरुषेशाय सर्गस्थित्यन्तहेतवे ॥
शक्तिमप्रतिघां यस्य वैराग्यं चापि सर्वगम् ।
स्वामित्वं च पितृत्वं च स्वभावं संप्रचक्षते ॥

तमजं विश्वकर्माणं शाश्वतं ध्रुवमव्ययम् ।
महादेवं महात्मानं व्रजामि शरणं शिवम् ॥
धर्मक्षेत्रे महातीर्थे गङ्गाकालिन्दिसङ्गमे ।
प्रयागे परमे पुण्ये ब्रह्मलोकस्य वर्त्मनि ॥
मुनयः संशितात्मानः सत्यव्रतपरायणाः ।
महौजसो महाभागा महासत्रं वितेनिरे ॥
तत्र सत्रं समाकर्ण्य तेषामक्लिष्टकर्मणाम् ।
साक्षात्सत्यवतीसूनोर्वेदव्यासस्य धीमतः ॥
शिष्यो महात्मा मेधावी त्रिषु लोकेषु विश्रुतः ।
पञ्चावयवयुक्तस्य वाक्यस्य गुणदोषवित् ॥
उत्तरोत्तरवक्ता च ब्रुवतोऽपि बृहस्पतेः ।
मधुरश्रवणानां च मनोज्ञपदपर्वणाम् ॥
कथानां निपुणो वक्ता कालविन्नयवित् कविः ।
आजगाम स तं देशं सूतः पौराणिकोत्तमः ॥
तं दृष्ट्वा सूतमायान्तमृषयो हृष्टमानसाः ।
तस्मै समाजपूजां च यथावत् प्रत्यपादयन् ॥
प्रतिगृह्य स तां पूजां मुनिभिः प्रतिपादिताम् ।
उद्दिष्टमासनं भेजे नियुक्तो युक्तमात्मनः ॥
ततस्तत्सङ्गमादेव मुनीनां भावितात्मनाम् ।
सोत्कण्ठमभवच्चित्तं श्रोतुं पौराणिकीं कथाम् ॥
तदा तमनुरूपाभिर्वाग्भिरर्च्य महर्षयः ।
अतीवाभिमुखं कृत्वा वचनं चेदमब्रुवन् ॥

End :

भगवन् भद्र भद्रं ते भगवानिन्दुभूषणः ॥

आज्ञ .... यम् ।
रैभ्याश्रमसमीपस्थस्त्र्यम्बकोऽम्बिकया सह ॥
पश्यत्येव महाबाहो दुस्सहं ते पराक् .... ॥
....न कुञ्जरः ।
आरुरोह रथं दिव्यमनुगृह्य पितामहम् ॥
तदा रथवरे तस्मिन् स्थिते ब्रह्मणि सार.... ।
....पुरद्विषः ॥
ततः शङ्खवरं दिव्यं चन्द्रकुन्दसमप्रभम् ।
प्रदध्मौ वदने कृत्वा भानुकल्पो महाबलः ॥

Colophon :

इति वायवीयसंहितायाम् अष्टादशोऽध्यायः ।

Author :

Remarks—This Ms. is very old. The leaves are decayed.

॥ वायवीयसंहिता (शैवगता) ॥

447. VĀYAVĪYASAMHITĀ.

(from Śaivapurāṇa).

Substance—Palm leaf. Size—$19\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—74. 8—9 lines per page and 76 letters per line. Script—Malayāḷam. No. of Granthas—3000.

Subject and Beginning—Same as No. 446.

End :

पश्चाद् ज्ञानं समासाद्य शिवसायुज्यमाप्नुयात् ।
अर्धार्धचरितो यस्तु देही देहक्षयात् परम् ॥
अण्डान्तर्बद्धमव्यक्तमतीत्य भुवनद्वयम् ।
सम्प्राप्य पौरुषं रौद्रं स्थानमद्रीन्द्रजापतेः ॥
अनेकयुगसाहस्रं भुक्त्वा भोगाननेकधा ।
पुण्यक्षये क्षितिं प्राप्य कुले महति जायते ॥
तत्रापि पू.... ....

Colophon :

श्रीवायवीयसंहितायाम् उपरिभागे एकत्रिंशोऽध्यायः ।

Author :

Remarks—The Ms. is old and worn out.

॥ वासिष्ठरामायणम् ॥

448. VĀSIṢṬHARĀMĀYAṆAM.

Substance—Palm leaf. Size—10½" × 2½". Leaves—80. 12—15 lines per page, and 40 letters per line. Script—Malayāḷam. No. of Granthas—2800.

Subject—Vedānta philosophy as explained to Śrī Rāma by Vasiṣṭha.

Colophon :

इत्यार्षे श्रीरामायणे देवदूतोक्ते द्वात्रिंशत्साहस्र्यां संहि-

तायां वासिष्ठे वाल्मीकीये मोक्षोपाये मुमुक्षुव्यवहारप्रकरणे सदाचारनिरूपणं नाम विंशतितमः सर्गः ।

समाप्तमिदं प्रकरणम् ।

Author—Vālmīki.

Remarks—The Ms. covers the Vairāgya and Mumukṣuprakaraṇas only.

॥ वासिष्ठरामायणम् ॥

449. VĀSIṢṬHARĀMĀYAṆAM.

Substance—Palm leaf. Size—21″ × 2½″. Leaves—341. 9 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—15000. Incomplete.

Subject—Same as No. 448.

Colophon :

इति श्रीमद्रामायणे शतसाहस्र्यां संहितायां बालकाण्डे वासिष्ठे मोक्षोपाये उपशमप्रकरणे समदर्शनं नाम त्रिनवतितमः सर्गः । उपशमप्रकरणसंख्या टीकामूलमलियै दशहजा ।

Author—Same as No. 448.

Remarks—The work contains chapters dealing with the origin, preservation and destruction of the Universe.

॥ वासिष्ठरामायणम् ॥

450. VĀSIṢṬHARĀMĀYAṆAM.

Substance—Palm leaf. Size—20″ × 2½″. Leaves—310. 11 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas 13500. Incomplete.

Colophon :

इति श्रीमद्वासिष्ठरामायणे बालकाण्डे मोक्षोपाये निर्वाणप्रकरणे उत्तरार्धे वासिष्ठब्रह्मदर्शने देवदूतोक्तशतसाहस्र्यां संहितायां षोडशोत्तरद्विशततमः सर्गः ।श्रीगुरुभ्यो नमः ।

आलोक्येदं विलिखितं नागराक्षरमातृकाम् ।
नागरेषु च वर्णेषु नातिनैपुण्यशालिभिः ॥
अविज्ञातानि यानीह ग्रन्थे वर्णानि यानि तु ।
कृतावकाशान्यपि च मातृकायामितस्ततः ॥
कृतानि तेषां सर्वेषां स्थानान्यत्र पृथक् पृथक् ।
सम्यगालोच्य संशोध्य स्वीकुर्वन्तु मनीषिणः ॥

Remarks—The Ms. is in good condition. The verse beginning with "ब्रह्मानन्दं परमसुखदं—" is omitted in it.

॥ वासिष्ठरामायणम् (तात्पर्यप्रकाशोपेतम्)॥

451. VĀSIṢṬHARĀMĀYAṆAM with Tātparyaprakāśa.

Substance—Palm leaf. Size—22½″ × 2″. Leaves—245.

10 lines per page and 82 letters per line. Script—Malayāḷam. No. of Granthas—12000. Subject—Same as No. 448.

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसर्वज्ञसरस्वतीपूज्यपादशिष्यश्रीमद्रामचन्द्रसरस्वतीपूज्यपादशिष्यश्रीमद्गङ्गाधरेन्द्रसरस्वतीपूज्यपादशिष्यश्रीसदानन्दबोधेन्द्रसरस्वत्याख्यभिक्षुणा विरचिते श्रीवासिष्ठतात्पर्यप्रकाशे स्थितिप्रकरणे द्विषष्टितमः सर्गः। स्थितिप्रकरणं सम्पूर्णम्। श्रीगुरुभ्यो नमः। शुभम्। श्रीवाल्मीकये नमः। श्रीवसिष्ठाय नमः। श्रीरामाय नमः। श्रीरामाय नमः।

Author: Text—Vālmīki. Commentary—Ānandabodhendrasarasvatī.

Remarks—The commentator was a disciple of Gaṅgādharasarasvatī. The work comprises Vairāgya, Mumukṣu and Sthiti prakaraṇas.

॥ वासिष्ठरामायणम् (तात्पर्यप्रकाशोपेतम्) ॥

452. VĀSIṢṬHARĀMĀYAṆAM with Tātparyaprakāśa.

Substance—Palm leaf. Size—12″ × 2″. Leaves—135. 10 lines per page and 37—47 letters per line. Script—Malayāḷam. No. of Granthas—3400. Incomplete.

Remarks—The Ms. contains only the Vairāgya-

prakaraṇa. The author mentions many Ācāryas. The first Fol. contains the following two verses, probably composed by the scribe, eulogising the King of Vañci (Travancore).

" वृद्धिं कलाभिः सह संप्रपन्नं बुधाश्रयं विष्णुपदावगाढम् ।
भवन्तमेत्यामृतगुं धरित्री श्रीवञ्चिभूपाल सुनिर्वृतेयम् ॥
वञ्चीश दोषापगतः समुद्यन् कलङ्कहीनः सततं सुवृत्तः ।
समेधयन् सत्सु रुचिं निकामं राजा भवान्नः सुकृतैरवाप्तः ॥"

॥ वासिष्ठरामायणम् (तात्पर्यप्रकाशोपेतम्) ॥

453. VĀSIṢṬHARĀMĀYAṆAM
with Tātparyaprakāśa.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—116. 9—10 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—2500.

Remarks—The Ms. contains the Mumukṣuprakaraṇa only.

॥ वासिष्ठरामायणम् (तात्पर्यप्रकाशोपेतम्) ॥

454. VĀSIṢṬHARĀMĀYAṆAM
with Tātparyaprakāśa.

Substance—Palm leaf. Size—$2\frac{1}{2}'' \times 2''$. Leaves—

290. 9—13 lines per page and 68—75 letters per line. Script—Malayāḷam. No. of Granthas—13600. Incomplete.

Remarks—The readings in the Ms. accord with those in the printed edition. The Ms. embodies the Utpattiprakaraṇa only.

॥ वासिष्ठरामायणम् (तात्पर्यप्रकाशोपेतम्) ॥

455. VĀSIṢṬHARĀMĀYAṆAM

with Tātparyaprakāśa.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{7}{8}''$. Leaves—374. 8—12 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1200. Incomplete.

Remarks—The Ms. contains Sargas 1—75 of the Utpattiprakaraṇa. The creation of the Universe and the Māyātatva are dealt with and illustrated with appropriate stories.

॥ वासिष्ठरामायणम् (तात्पर्यप्रकाशोपेतम्) ॥

456. VĀSIṢṬHARĀMĀYAṆAM

with Tātparyaprakāśa.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves

—215. 8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—5160. Incomplete.

Remarks—The Ms. contains Sargas 76—122 of the Utpattiprakaraṇa. Nos. 455 and 456 together comprise the Utpattiprakaraṇa completely.

॥ वासिष्ठरामायणम् (तात्पर्यप्रकाशोपेतम्) ॥

457. VĀSIṢṬHARĀMĀYAṆAM with Tātparyaprakāśa.

Substance—Palm leaf. Size—$21\frac{1}{2}'' \times 2''$. Leaves—243. 8—10 lines per page and 64—80 letters per line. Script—Malayāḷam. No. of Granthas—9842. Incomplete.

Remarks—The Ms. comprises 93 *sargas* of the *Upaśamaprakaraṇa* with commentary. The introductory portion of the commentary furnishes a summary of the subject-matter contained in the *prakaraṇa.*

॥ वासिष्ठरामायणम् (तात्पर्यप्रकाशोपेतम्) ॥

458. VĀSIṢṬHARĀMĀYAṆAM with Tātparyaprakāśa.

Substance—Palm leaf. Size—$17'' \times 2''$. Leaves-

306. 10—11 lines per page and 50 letters per line. Script—Malayāḷam and Grantha. No. of Granthas—10000.

Remarks—The first 92 leaves are written in Malayāḷam and the rest in Grantha characters. The Ms. comprises the Upaśamaprakaraṇa only.

॥ वासिष्ठरामायणम् (तात्पर्यप्रकाशोपेतम्) ॥

459. VĀSIṢṬHARĀMĀYAṆAM with Tātparyaprakāśa.

Substance—Palm leaf. Size—21″ × 2″. Leaves—473. 10—12 lines per page and 68 letters per line. Script—Malayāḷam. No. of Granthas—22110.

Remarks—The Ms. contains the latter part of the Nirvāṇaprakaraṇa.

॥ वासिष्ठरामायणम् (तात्पर्यप्रकाशोपेतम्) ॥

460. VĀSIṢṬHARĀMĀYAṆAM with Tātparyaprakāśa.

Substance—Palm leaf. Size—$17\frac{1}{2}$″ × $1\frac{7}{8}$″. Leaves—224. 9—10 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—8000.

Remarks—The Ms. contains Sargas 81—141 of the Nirvāṇaprakaraṇa.

॥ वासिष्ठरामायणम् (तात्पर्यप्रकाशोपेतम्) ॥

461. VĀSIṢṬHARĀMĀYAṆAM
with Tātparyaprakāśa.

Substance—Palm leaf. Size—$7\frac{1}{8}'' \times 2\frac{1}{8}''$. Leaves—253. 9—11 lines per page and 64 letters per line. Script—Grantha. No. of Granthas—10100.

Remarks—The Ms. comprises Nirvāṇaprakaraṇa only. The colophon in the text indicates 220 Sargas while the commentary 219. The last three leaves contain a Sarga which has been left out in the middle. The style of the commentary is dignified and scholarly.

॥ वासिष्ठलैङ्गयम् (भविष्योत्तरगतम्) ॥

462 A. VĀSIṢṬHALAIṄGAM.
(from Bhaviṣyottarapurāṇa.)

Substance—Palm leaf. Size—$13'' \times 1\frac{1}{2}''$. Leaves—20. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—300. Incomplete.

Subject—Glorification of the greatness of Śiva.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

शिवः—युगं चतुर्विधं प्रोक्तं कालतत्त्वविशारदैः ।
तेषामाद्यं कृतं विद्धि ततस्त्रेतायुगं मुने ॥
तृतीयं द्वापरं विद्धि चतुर्थं कलिरुच्यते ।
ब्रह्मा कृतयुगस्यै...देवता परिकल्पिता ॥
रविस्त्रेतायुगस्योक्तो द्वापरस्य मुने हरिः ।
रुद्रः कलियुगस्यापि चतुर्णामपि देवताः ॥

End:

यत्प्रसादेन संज्ञानं यथावज्ज्ञायेत नृणाम् ।
तं वन्दे षण्मुखं साक्षाज्ज्ञानशक्तिधरं परम् ॥
यस्य प्रसादलेशस्य लवलाभबलेन तु ।
सर्वसिद्धिरयत्नेन तं नमामि विनायकम् ॥ शिवम् ।

Colophon:

इत्युपपुराणे वासिष्ठलैङ्ग्ये द्वादशोऽध्यायः । इत्युपपुराणं वासिष्ठलैङ्ग्यं समाप्तम् ।

इति श्रीकालहस्तीश्वरसन्निधियிலிருந்தெழுதித் திர்த்தமைக்கு गोविन्दलिखितमिदं पुस्तकम् ।

ஆறுறு தத்துவத்துக்கப்பாலுமுருவி
மாறுத பேரொளியில் மண்டியதே
கூறும்கலவேடன் கானத்தி . . . . கப்
போற்றுாணில் நிலவேடன் கொப்பிளிக்கநீர்.

Author:

Remarks—This Ms. is much damaged. The Tamil

verse after the colophon is a panegyric of Kāḷahastinātha.

॥ अनन्तव्रतकथा ॥

462 B. ANANTAVRATAKATHĀ.

Substance—Palm leaf. Size—13″ × 1½″. Leaves—8. 7 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—168.

Subject—The observance of Anantavrata and its initiatory rite of fastening the Doraka on the observant's forearm.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

ततस्तु मूलमन्त्रेण नमस्कृत्य चतुर्भुजम् ।
फणसप्तकसंयुक्तं चतुर्बाहुं किरीटिनम् ॥
नवाम्रपल्लवाकारं पिङ्गलश्मश्रुलाञ्छितम् ।
पीताम्बरधरं देवं शङ्खचक्रगदाधरम् ॥
कराग्रे दक्षिणे पद्मं शङ्खं तस्याप्यधः करे ।
चक्रमूर्ध्वकरे वामे गदां तस्याप्यधः करे ॥
दधानं सर्वलोकेशं सर्वाभरणभूषितम् ।
अलंकृतं समुद्रस्थं तत्स्वरूपं विचिन्तयेत् ॥

इति ध्यानम् ।

अनन्ताय नमस्तुभ्यं सहस्रशिरसे नमः ।
नमोऽस्तु पद्मनाभाय नागाधिपतये नमः ॥

इति नमस्कारः ।

आगच्छानन्त देवेश तेजोराशे जगत्पते ।
क्रियमाणां मया पूजां गृहाण पुरुषोत्तम ॥
इत्यावाहनम् ।

End:

कृत्वा व्रतमिदं पुण्यं पापेभ्यो मुच्यते नरः ।
ये च शृण्वन्ति सततं पठ्यमानं नरोत्तमः ॥
तेऽपि पापैर्विनिर्मुक्ता मल्लोकं यान्ति मानवाः ।
संसारगह्वरगुहासु सुखं विहर्तुं
वाञ्छन्ति ये कुरुकुलोद्भव शुद्धसत्त्वाः ।
सम्पूज्य च त्रिभुवनेशमनन्तदेवं
ते यान्ति वाञ्छित... ...संशयस्ते ॥
न्यूनातिरिक्तान्यपरिस्फुटानि
यानीह कर्माणि मया कृतानि ।
क्षम्याणि चैतानि मम क्षमस्व
प्रयाहि तुष्टः पुनरागमाय ॥

Colophon :

इत्यनन्तव्रतकथा सम्पूर्णा । श्रीअनन्ताय नमः । श्रीकृष्णाय नमः । इति ।

കൊല്ലം 730-മാ- ചിങ്ങഞായിറു 26-നു പൂർവ്വപക്ഷത്തു ദ്വിതീയയും വെള്ളിയാഴ്ചയും രേവതിയും കൂടിയ ദിവസം വിജയനഗരത്തിലിരുന്നെഴുതിത്തീർത്തമെക്ക ഗോവിന്ദലിഖിതമിദം പുസ്തകം.

വിജയനഗരത്തിൽ—രാമരാജാവിനും സന്തതിക്കും രായക്കും ഗുണഭൂതനായിരുന്നതള്ളൻറ ശ്രീനിവാ.........ണ്ണൻമക്ക യാപ

നയി........രുന്നു അവരുടെ ധർമ്മം നമ........രുലഭിച്ചു
ളു അവതിരുമലത്താത്തയ്യനായ സംപ്രദായം.....ശ്രീവിരു
പാക്ഷവിംരലശ്വരാഭ്യാം നമഃ. पावदकं ണ്ണീ നിലഃരെ.........
........നാരങ്ങമാത്രം വിഴുങ്ങിയമാം കൈമെത്തെച്ചു.........
... ...

Author:

Remarks—The portion accompanying the colophon furnishes a fund of information regarding the history of Vijayanagar.

॥ अनन्तव्रतोद्यापनम् ॥

462 C. ANANTAVRATODYĀPANAM.

Substance—Palm leaf. Size—13″×1½″. Leaves—3. 7 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—70.

Subject—An account of the religious rites to bring the Anantavrata to a close.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अनन्तव्रतमित्युक्तं समग्रं परमेश्वर ।
उद्यापनं च कथय सम्यग्ज्ञानफलप्रदम् ॥

श्रीकृष्ण उवाच—

आदौ मध्ये तथान्ते वा व्रत(स्योद्या)पनं भवेत् ।

शुक्लपक्षे नभस्यस्य भवेत् पूर्णा चतुर्दशी ॥
तस्यां सम्पूजयेद्देवमनन्तं परमेश्वरम् ।
स्नानं कृत्वा विधानेन पितॄन् सन्तर्पयेत्ततः ॥
पुण्याहं वाचयेत् पश्चाद्व्रतस्योद्यापनं प्रति ।
व्रती सङ्कल्पयेद्देवमुपवासविधानतः ॥
चतुर्दश्यां निराहारः कुर्वन् जागरणं निशि ।
अपरेऽहनि भोक्ष्येऽहं शरणं मे भवाच्युत ॥
सङ्कल्पमन्त्रः ।

End:

न पूजयन्ति ये मूढा व्रते नष्टेऽस्य दोरकम् ।
दारिद्र्यं व्याधिदुःखं च लभन्ते नात्र संशयः ॥
एवं यः कुरुते तस्य पूजनं श्रद्धया सह ।
न चासौ पार्थ रोगी स्याद्दुःशीलो न भविष्यति ॥
एतत्ते कथितं पार्थ व्रतानामुत्तमं व्रतम् ।
कृत्वा व्रतमिदं पुण्यं पापेभ्यो मुच्यते नरः ॥

Colophon :

इति भविष्योत्तरपुराणे अनन्तव्रतोद्यापनकल्पं सम्पूर्णम् । इति । വിജയനഗരത്തിൽ ശ്രീനിവാസാഖ്യരാകിയ തിരുമലത്താത്തസ്യ സംപ്രദായപ്രവരർ വീട്ടിലിരുന്നെഴുതിത്തീത്തമൈക്കമലനാട്ടിൽ വെമ്പലനാട്ടു തെക്കിൻകൂറ്റിൽ പെരുനെയ്ക്കിൽ ഗ്രാമത്തിൽ കുടിയിരുക്കു അഴകഞ്ചേരി ഇട്ടുക്കോച്ചുന്നനെഴുത്തു.

Author:

Remarks—The revised catalogue of the Palace

Library points out that the following works are embodied in some damaged leaves at the close of the Ms.—

श्रीविद्यारहस्यचक्रोद्धारः (केरलभाषामिश्रः)
गरुडनामाष्टोत्तरशतस्तुतिः
श्रीकण्ठादिन्यासः
षडध्वशास्त्रम्
अध्यात्मविचारः
मन्त्रयन्त्रौषधकक्षपुटम्

॥ वासिष्ठलैङ्ग्यम् (भविष्योत्तरगतम्) ॥

463. VĀSIṢṬHALAIṄGYAM
(from Bhaviṣyottarapurāṇa).

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—22. 7 lines per page and 32—36 letters per line. Script—Malayāḷam. No. of Granthas—350.

Subject, Beginning, End, Colophon and Author—Same as No. 462.

Remarks—The Ms. is in good condition and written in neat legible hand.

॥ वासिष्ठसारसंग्रहः ॥

464. VĀSIṢṬHASĀRASAṄGRAHA.

Substance—Palm leaf. Size—14½″ × 2″. Leaves—

243. 13—14 lines per page and 54 letters per line. Script—Grantha. No. of Granthas—11000.

Subject—Same as No. 448.

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
यतः सर्वाणि भूतानि प्रतिभान्ति स्थितानि च ।
यत्रैवोपशमं यान्ति तस्मै सत्यात्मने नमः ॥
ज्ञाता ज्ञानं तथा ज्ञेयं द्रष्टा दर्शनदृश्यभूः ।
कर्ता हेतुः क्रिया यस्मात् तस्मै ज्ञप्त्यात्मने नमः ॥
स्फुरन्ति शीकरा यस्मादानन्दस्याम्बरेऽवनौ ।
सर्वेषां जीवनं तस्मै ब्रह्मानन्दात्मने नमः ॥
दिवि भूमौ तथाकाशे बहिरन्तश्च मे विभुः ।
यो विभात्यवभासात्मा तस्मै सर्वात्मने नमः ॥

वाल्मीकिः—

अहं बद्धो विमुक्तः स्यामिति यस्यास्ति निश्चयः ।
नात्यन्तमज्ञो नो तज्ज्ञः सोऽस्मिञ्छास्त्रेऽधिकारवान् ॥

End:

श्रीवाल्मीकिः—

भरद्वाज महाबुद्धे मम शिष्याधिनायक ।
इति रामादयो ज्ञातज्ञेया निश्शोकतां गताः ॥
त्वं च पुत्र भरद्वाज स्वयमेवासि मुक्तधीः ।
सत्यं मुक्ततरोऽस्यद्य श्रुत्वेमां मोक्षसंहिताम् ॥

मोक्षाभ्युपायान् सुमहानुभावान् शास्यन्ति ये तत्त्वविदां वरिष्ठाः।
पुनः समेष्यन्ति न संसृतिं ते कोऽर्थः स्वभावेन बहूदितेन ॥

ये वाचयिष्यन्त्यनपेक्षितार्था ये लेखयिष्यन्ति च पुस्तकं वा।
ये कारयिष्यन्त्यपि वाचकं वा व्याख्यातृयुक्तं शुभमार्यदेशे ॥

ते राजसूयस्य फलेन युक्ता मुहुर्दिवं स्वर्गमुदारसत्वाः।
मोक्षं प्रयास्यन्ति तृतीयजन्मलाभेन लक्ष्मीमिव पुण्यवन्तः ॥

एतत्ते कथितं कथाक्रमशतैर्बोधाय बुद्धेर्बृह-
च्छास्त्रं बृंहितब्रह्मतत्त्वममलं दृष्टान्तयुक्त्या चितम्।
श्रुत्वैतच्चिरनिर्वृतिं भज भृशं जीवन्विमुक्ताशयो
लक्ष्मीं ज्ञानतपःक्रियाक्रमयुतां भुक्त्वाक्षयामक्षयः ॥

Colophon :

श्रीवाल्मीकीये महारामायणे शतसहस्र्यां संहितायां बालकाण्डे देवदूतोक्ते मोक्षोपायनिर्वाणप्रकरणे वासिष्ठे ब्रह्मदर्शने सर्गः १।

निर्वाणप्रकरणं सम्पूर्णम्। शुभमस्तु

उत्तरनिर्वाणप्रकरणम् सर्गः १११ श्लोकः ௬௲௬௱௫௰௪
आद्यन्तसंग्रहं श्लोकः ௰௯௲ शुभमस्तु दादारस्थाने ௨௱௫

Author:

Remarks—This work is a compendium of the Vāsiṣṭha Rāmāyaṇa.

॥ वासिष्ठसारसंग्रहः ।

465. VASIṢṬHASĀRASAṄGRAHA.

Substance—Palm leaf. Size—13½"×1¾". Leaves—113. 13—15 lines per page and 48 letters per line. Script—Grantha. No. of Granthas—4900.

Subject—Same as No. 448.

Beginning—Same as No. 464.

End:

इदं कालकुलालेन चक्रं संपरिवर्त्यते ।
असंख्यातानि कल्पानि सञ्जातान्यचले पदे ॥
जगज्जाङ्गलजालानि दग्धानि युगवह्निना ।
भावाभावैरपर्यन्तैः सुखदुःखदशाशतैः ॥
वैपरीत्यं प्रयात्येवमजस्रं जागती स्थितिः ।
क्षुब्धैर्युगपरावर्तैर्वासिना भृङ्गलोहिता ॥
महाशनिनिपातैश्च न भग्ना ध्रुवधीरता ।
शतशो विद्रुतारीन्द्रैर्दनुपुत्रैरभिश्रुता ॥
भगभद्रत्रपामैन्द्रीं तनुं चेहति वासना ।
विशता त्रितरङ्गतसर्गपांसुपरम्परा ॥
नित्यं नियातिपात्येयं कालव्यालगलान्तरम् ।

... ...

... ...

Colophon:

इति निर्वाणप्रकरणे मोहाख्ये अष्टपञ्चाशत्सर्गः ।

Author:

Remarks—Many leaves are damaged.

॥ वासिष्ठसारसंग्रहः ॥

466. VĀSIṢṬHASĀRASAṄGRAHA.

Substance—Palm leaf. Size—$11\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—124. 12 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—4500.

Subject—Same as No. 448.

Beginning—Same as No. 464.

End:

सदा समग्रेऽपि हि वस्तुजाले समाश्रयोऽप्यन्तरवस्तुजालः ।
व्यापारमात्रान् सहजान् क्रमस्थान्न किञ्चिदप्यन्यदसौ करोति ॥
यदेव किञ्चित् प्रथितं क्रमस्थं कर्तव्यमात्मीयमसौ तदेव ।
स सङ्गसम्बन्धविहीनयैव कुर्वन्नदेहे रमते धियान्तः ॥
अव्यापदं प्राप्य सुसम्पदं वा महामतिः स्वं प्रकृतं स्वभावम् ।
जहाति नो मन्दरवेल्लितोऽपि शौक्ल्यं यथा क्षीरमिवाम्बुराशिः ॥
सम्प्राप्य साम्राज्यमथापदं वा सरीसृपत्वं सुरनाथतां वा ।
तिष्ठत्यखेदादयमस्तहर्षं क्षयोदयेष्विन्दुरिवैकरूपः ॥
निरस्तसंरम्भमपास्तभेदं प्रशान्तनानाफलफल्गुवेषम् ॥
विचारयात्मानमदीनसत्वो यथा भवस्युत्तमकार्यनिष्ठः ।
तथोदितप्रपरविलासशुद्धया गतज्वरं पदमवलोकयामलम् ॥
धियेद्धया पुनरिह जन्मबन्धनैर्न बध्यसे समधिगतात्मदृश्यया ॥

Colophon:

इति त्रिपञ्चाशत्सर्गः । उपशमप्रकरणं समाप्तम् ।

Author:

Remarks—The Ms. is well preserved within a pair carved boards. The script is neat and legible.

॥ वासिष्ठसारसमुच्चयः ॥

467. VĀSIṢṬHASĀRASAMUCCAYA.

Substance—Palm leaf. Size—$11\frac{1}{2}'' \times 1\frac{7}{8}''$. Leaves—40. 9—11 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—2125. Incomplete.

Subject—Same as No. 448.

Beginning:

... ...मान् सिद्धश्रमहरो महान् ।
महत्यत्राश्रमे तस्मिन् तापसौ द्वौ बभूवतुः ॥
कौचिदेव नभोमार्गे इव शुक्रबृहस्पती ।
तयोरथैकास्पदयोस्तत्राभूतां सुतावुभौ ॥
विलासभासनामानौ वृद्धिमाययतुः क्रमात् ।
आस्तामन्योन्यसुस्निग्धौ सुरक्ताविव दम्पती ॥
एकं द्वित्वमिवापन्नं सममासीत् तयोर्मनः ।
जग्मतुर्देहमुत्सृज्य ततस्तौ पितरौ तयोः ॥
तत्रौर्ध्वदेहिकं कृत्वा चक्राते परिदेवनम् ।
वियुक्तौ विपिने कालं क्षपयामासतुः पृथक् ॥

End:

बहुनात्र किमुक्तेन संक्षेपादिदमुच्यते ।
सङ्कल्पनं परो बन्धस्तदभावो विमुक्तता ॥
सर्वमेकमजं शान्तमनन्तं ब्रह्ममव्ययम् ।
पश्यन् भूतानि चिद्रूपं शान्त आस्स्व यथासुखम् ॥

अवेदनं विदुर्योगं शान्तमासितमक्षयम् ।
योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा रघूद्वह ॥
अवेदनं विदुर्योगं चित्तक्षयमकृत्रिमम् ।
अत्यन्तं तन्मयो भूत्वा यथा तिष्ठ तथाशु भो ॥
इदं ममेति संविदन् न दुःखतो विमुच्यते
असंविदन् विमुच्यसे यदीप्सितं तदाचरः ॥
शिवं सर्वगतं शान्तं बोधात्मकमजं शुभम् ।
तदेकभावनं राम कर्मत्याग इति स्मृतः ॥

Colophon :

इति श्रीवाल्मीकीये महाकाव्ये शतसाहस्रिकायां संहितायां ज्ञानखण्डे वसिष्ठरामसंवादे मोक्षोपाये काश्मीरपण्डितेनोद्धृतः सारसमुच्चयः समाप्तः ।

एष धातृहृदब्जार्क एषा रामश्रवःसुधा ।
एतद् वाल्मीकिवाक्तत्त्वमेतद् वासिष्ठमुत्तमम् ॥
नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः ।
विकटोऽक्षरबन्धश्च सर्वमत्रैव सम्मतम् ॥
महाकाव्यं महाशास्त्रं महाविद्या महामतिः ।
महापूरुषसंसेव्यं महाकारुणिकामृतम् ॥
महाभागवताख्यस्य भगवत्पदसेविनः ।
आस्तेऽस्मिन् पुस्तके शास्त्रं वासिष्ठं षट्सहस्रकम् ॥
... ...

Author—Kāśmīra Paṇḍita.

Remarks—This work is an epitome of the Vāsiṣṭharāmāyaṇa. The Ms. begins from

the 20th verse in Sarga 65 of the Upaśamaprakaraṇa on Fol. 84 and ends on Fol. 169.

विष्णुधर्मः ॥

468. VIṢṆUDHARMA.

Substance—Palm leaf. Size—$22\frac{3}{4}'' \times 2\frac{1}{8}''$. Leaves—84. 7—9 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—2700. Incomplete.

Subject—The fruits resulting from devotion to Viṣṇu.

Beginning :

... ... दायति देवार्चां हृदयालम्बनं हरेः ।
स नरो विष्णुसालोक्यमुपैति गतकल्मषः ॥
यः कश्चिदालयं भक्त्या विष्णोः कारयति स्थिरम् ।
स सप्तपुरुषान् लोकान् विष्णोर्नयति मानवः ॥
यावन्त्यब्दानि देवार्चा हरेस्तिष्ठति मन्दिरे ।
तावद् वर्षसहस्राणि विष्णुलोके स मोदते ॥
देवार्चा लक्षणोपेता यद्गृहे सन्ततं हविः ।
निष्कामं च मनो यस्य स यात्यक्षरसाम्यताम् ॥
पुष्पाण्यतिसुगन्धीनि मनोज्ञानि च यः पुमान् ।
प्रयच्छति हृषीकेशे तद्भावगतमानसः ॥
धूपांश्च विविधांस्तांस्तान् गन्धाढ्यं चानुलेपनम् ।
दीपान् बल्युपहारांश्च यश्चाभीष्टमथात्मनः ॥
नरः सोऽनुदिनं यज्ञं करोत्याराधनाद्धरेः ।
यज्ञेशो भगवान् विष्णुर्मखैरपि च तोष्यते ॥

End :

विषयाक्षिप्तचित्तानां कृष्णभक्तिमकुर्वताम् ।
कर्मभूमौ मनुष्याणां तद् देव विकलं दिनम् ।
यदच्युतकथालापध्यानार्चारहितं गतम् ॥
इत्युक्त्वा तेऽसुरा भूयस्तं प्रसाद्य तथा वसुम् ।
विष्णोर्भक्तिपरा यातास्तीव्रं सर्वे हिमालयम् ॥
स चापि चेदिराट् तस्माद्देवदेवेन चक्रिणा ।
पाताळादुद्धृतः पश्चात् संसारगहनादपि ॥
इत्येतत् सर्वमाख्यातं यस्मात् त्वं परिपृच्छसि ।
यथाऽसीदन्ति नरा भक्तिमन्तोऽपि केशवे ॥
दृढा जनार्दने भक्तिर्यदैवाव्यभिचारिणी ।
तदा कियत् स्वर्गसुखं सैव निर्वाणहेतुकी ॥
इत्येवमसुरैः सार्धं संवादं यः पुरा वसोः ।
पठिष्यत्यखिलं भक्त्या स तल्लोकमुपैष्यति ॥

Colophon :

इति श्रीविष्णुधर्मे वसुदानवसंवादो नाम सप्ततितमोऽध्यायः ।

Author :

Remarks—The work covers chapters 5—70. The Ms. is old and worn out.

॥ विष्णुधर्मः ॥

469. VIṢṆUDHARMA.

Substance—Palm leaf. Size—$19\frac{3}{8}'' \times 2''$. Leaves—87. 8 lines per page and 60 letters per line.

Script—Malayāḷam. No. of Granthas—2610. Incomplete.

Subject, Beginning and End—Same as No. 468.

Colophon :

इति श्रीविष्णुधर्मे वसुदानवसंवादो नाम एकसप्ततितमोऽध्यायः ।

Author :

Remarks—This Ms. is a copy of No. 468 and is in good condition. The writing is neat and legible. It begins on chapter 3 and extends to chapter 71.



॥ विष्णुधर्मोत्तरम् (गारुडम्) ॥

470. VIṢṆUDHARMOTTARAM.

(Gāruḍam).

Substance—Palm leaf. Size—17″ × 1″. Leaves—50. 4—6 lines per page and 66 letters per line. Script—Grantha. No. of Granthas—1000.

Subject—Exposition of Vaiṣṇavadharma.

Beginning :

... ... धर्मे नैष्ठिकी मतिः ।

एवमेव... ... ...महालक्ष्म्या जनार्दनः ।

विष्णुधर्मोत्तरं नाम शास्त्रं भागवतोत्तमम् ।

तदा श्रुतं मया सर्वं स्मारितं तदिह त्वया ॥
तं प्रणम्य महाविष्णुं तन्मे निगदितं शृणु ।
दानं व्रतं तपो यज्ञो देवतातिथिपूजनम् ॥
अनुष्ठेयानि कर्माणि भक्त्या कार्याणि सुव्रत ।
श्रद्धापूर्वाः क्रियाः सर्वा इहामुत्र फलप्रदाः ॥
श्रद्धाहीनाः क्रिया नृणां विफला दुःखदायकाः ।
श्रद्धया साध्यते धर्मो भक्त्या तु......दैवतम् ॥
श्रद्धया स्वर्गमाप्नोति भक्त्या मोक्षं च विन्दति ।
भक्तिर्जनित्री धर्माणां भक्तिः सर्वसुखावहा ॥
तस्मात् सर्वात्मना विद्वान् भक्तियुक्तो भवेत् सदा ।

End:

हरे पीताम्बरोपेन्द्र पाहि मां शरणागतम् ।
समस्तजगदाधार लोकानुग्रहतत्पर ॥
परात्मन् परमेश त्वं पाहि मां शरणागतम् ।
चक्रपाणे परानन्द लीलाविग्रहतत्पर ॥
देवादिदेव देवेश पाहि मां शरणागतम् ।
माधव श्रीपते कृष्ण विष्वक्सेन जनार्दन ॥
अप्रमेय मुरध्वंस पाहि मां शरणागतम् ।
कंसासुरप्राणहर दैत्यदानवमर्दन ॥
सद्भक्तभावप्रत्यक्ष पाहि मां शरणागतम् ।
दयापर दयासिन्धो सर्वसम्पत्प्रदायक ॥
भगव........लोकेश पाहि मां शरणागतम् ।
... ...प्रणम्य च पुनः पुनः ॥
स्तुत्वा च विनतापुत्र मरीचिर्ध्यानमास्थितः ॥

ध्यानेन दृष्ट्वा चिद्रूपं वासुदेवं जनार्दनम् ।
......तनं शान्तं सम्प्राप्तो निर्वृतिं परम् ॥

Colophon :

इति श्रीगारुडे पुराणे विष्णुधर्मोत्तरे गरुडमरीचिसंवादे सप्तविंशोऽध्यायः । हरिः ओम् ।

വിരോധികൃദ്വർഷം ചിത്തിരൈ ശു എഴുതിച്ചു

Author:

Remarks—The first Fol. is missing. The text is a portion of the Gāruḍapurāṇa. It is different from the printed edition. The Ms. is much decayed.

॥ विष्णुपुराणम् ॥

471. VIṢṆUPURĀṆAM.

Substance—Palm leaf. Size—21″×2″. Leaves—160. 10 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—7000. Incomplete.

Subject—The creation, protection and dissolution of the Universe &c.

Colophon :

इति श्रीविष्णुपुराणे ब्रह्माण्डे पाराशर्यायां संहितायां श्रीविष्णुपुराणे षष्ठेंऽशे नवमोऽध्यायः । श्रीविष्णुपुराणं समाप्तम् ।

Remarks—The first three leaves are lost. The Ms. is much worn out.

॥ विष्णुपुराणम् ॥

472. VIṢṆUPURĀṆAM.

Substance—Palm leaf. Size—21″ × 2″. Leaves—215. 8 lines per page and 66 letters per line. Script—Malayāḷam. No. of Granthas—7000.

Subject—Same as No. 471.

Colophon :

इति श्रीविष्णुपुराणे षष्ठेऽंशे नवमोऽध्यायः । श्रीविष्णुपुराणं समाप्तम् ।

Remarks—The first four leaves are missing. The Ms. is old and decayed.

॥ विष्णुपुराणम् (आत्मप्रकाशोपेतम्) ॥

473. VIṢṆUPURĀṆAM

with the commentary Ātmaprakāśa.

Substance—Palm leaf. Size—19⅜″ × 2⅛″. Leaves 325. 7—9 lines per page and 58—70 letters per line. Script—Malayāḷam. No. of Granthas—10400. Complete.

Subject—Same as No. 471.

Beginning :

हरिः । श्रीमहागणपतये नमः । अविघ्नमस्तु ।

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।

नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥

ॐ । श्रीबिन्दुमाधवं वन्दे परमानन्दविग्रहम् ।
तथा पुराणतत्त्वज्ञान् पराशरमुखान् मुनीन् ॥
श्रीमच्चित्सुखयोगिमुख्यरचितव्याख्यां निरीक्ष्य स्फुटं
तन्मार्गेण सुबोधसंग्रहवतीमात्मप्रकाशाभिधाम् ।
श्रीमद्विष्णुपुराणसारविवृतिं कर्ता यतिः श्रीधर-
स्वामी सद्गुरुपादपद्ममधुपः साधुः स्वधीशुद्धये ॥
श्रीमद्विष्णुपुराणस्य व्याख्या स्वल्पातिविस्तरा ।
प्राचामालोच्य तद्व्याख्या मयाद्येयं विधीयते ॥
अंशैः षड्भिः समाकीर्णमङ्गैर्वेदमिवापरम् ।
पुराणं वैष्णवं चक्रे यस्तं वन्दे पराशरम् ॥

अथ भगवान् पराशरमुनीश्वरो मैत्रेयं निमित्तीकृत्य श्रीविष्णुतत्वप्रतिपादकं पुराणमारभते—पराशरमित्यादिना ।

ओं
पराशरं मुनिवरं कृतपूर्वाह्निकक्रियम् ।
मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च ॥

स्वस्मिन्नेव परोक्षंनिर्देशो लोकोक्त्या देहाद्यनहङ्कारद्योतनार्थः । प्राणिपत्य दण्डवत् प्रणम्य पादग्रहणादिविधिना अभिवाद्य बुभुत्सितमर्थं प्रष्टुं तत्कृतमनुग्रहमनुवदति—त्वत्त इति द्वाभ्याम् ।

End:

इदानीमुक्तचतुःस्वरूपं भगवतः समस्तजीवानामेतत्पुराणश्रवणादिद्वारेण मोक्षमाशासानः पुराणं निगमयति—इतीति ।

इति विविधमजस्य यस्य रूपं
प्रकृतिपरात्ममयं सनातनस्य ।
प्रदिशतु भगवानशेषपुंसां
हरिरपजन्मजरादिकां स सिद्धिम् ॥

इति प्रकृतिपरमात्ममयं प्रकृतिर्व्यक्ताव्यक्तरूपा, पर ईश्वरः। आत्मा जीवः। अपगतजन्मजरादिकां मोक्षलक्षणां सिद्धिं प्रदिशत्विति आशीर्वादः।

अङ्गैः षड्भिरलंकृतो विजयते शब्दो यथा शाश्वतो
विद्या षड्भिरिवाक्षरैरनुगता विद्योतते वैष्णवी।
षड्भिः संभृतमंशकैर्विरचितं शास्त्रं सह श्रीधर-
व्याख्यानं भुवि वेङ्कटेशविदुषा संसेव्यतां वैष्णवम्॥

Colophon :

इति श्रीमच्छ्रीधरस्वामिविरचितायामात्मप्रकाशाख्यटीका-सहितायां श्रीमत्पाराशर्यसंहितायां षष्ठेऽंशेऽष्टमोऽध्यायः।

श्रीपरानन्दशब्दाब्जश्रीधरः श्रीधरो हरिः।
व्याख्यां विष्णुपुराणस्य स्वप्रकाशाह्वयां व्यधात्॥
स्वप्रकाशाख्यया विष्णुपुराणव्याख्ययानया।
परमानन्दरूपो मे माधवः सम्प्रसीदतु।
श्रीमते कृष्णाय नमः। श्रीमद्विष्णुपुराणं समाप्तम्।

Author—Commentary: Śrīdharasvāmin.

Remarks—The work is divided into six sections. The commentator follows Citsukhayogi. For further information refer to Viṣṇupurāṇa p. 591. C. C.

॥ विष्णुवल्लभा (विष्णुपुराणव्याख्या) ॥

474. VIṢṆUVALLABHĀ.

Commentary on Viṣṇupurāṇa.

Substance—Palm leaf. Size—19″ × 2⅛″. Leaves—120. 7—9 lines per page and 70 letters per line. Script—Malayāḷam. No. of Granthas—4320. Complete.

Subject—Same as No. 471.

Beginning:

श्री हरिः । श्रीगणपतये नमः । ॐ नमो निरुपमबोधाय ।

स जयति निरुपमबोधः श्रीधरकारुण्यपूर्णेन्दुः ।
विलसति यदुदयवर्द्धितधीवर्द्धनतत्त्वरत्नश्रीः ॥

स जयति कावेर्यां वाक्यश्रीरङ्गभासत (?)
ब्रह्मविद्यानन्तशयं सच्चित्सुखनिजं महः ॥

धीश्रीनिदानं गुणरत्नराजितं
पराशरं ब्रह्मसुधाम्बुधिं भजे ।
हृद्यो हरेर्विष्णुपुराणकौस्तुभो
यस्मादभूद् व्यासविधुश्च विश्वदृक् ॥

श्रीमद्विष्णुपुराणस्य प्राग्व्याख्याः प्रेक्ष्य योगिना ।
विधीयते स्वधीशुद्ध्यै व्याख्यैषा विष्णुवल्लभा ॥

अथ श्रीपराशरः प्रष्टारं मैत्रेयं निमित्तीकृत्य सर्वजनहितार्थं श्रीविष्णुपुराणं प्रणयन् प्रणिपातपरिप्रश्नादिभिरुपसन्नाय सच्छि-

ष्याय सदाचारवता तत्त्वनिष्ठेन तत्पृष्टेनैव रुणा (?) स्वधर्मानुष्ठानरुद्धे मनःप्रमादकरे समये पुराणाद्याख्येयमिति शास्त्रार्थं दर्शयितुं पुराणप्रस्तावकं तत्प्रश्नविधिं निबध्नाति—पराशरमिति श्लोकेन। पराशरं पप्रच्छेति परोक्षनिर्देशस्तु देहाद्यभिमानाभावप्रदर्शनार्थः। 'देवान् वसिष्ठो अमृतान् ववन्द' 'इत्याह भगवान् बोधायन' इत्यादिश्रुतिस्मृतिनिर्देशवत्। देववेदाचार्यमूलास्तीति... सद्देवाभिमानमि-......च स्मृतेर्गुरुं दण्डवत् प्रणिपत्य स्वगोत्रनामोक्त्यादिपूर्वमभिवाद्य च परितः कात्स्न्र्येन पप्रच्छ पुराणार्थमिति शेषः।

End:

अथैतत्पुराणप्रतिपादितादुक्तचतूरूपाद्विष्णोः सर्वजीवानां परं पुमर्थमाशासानः पुराणं पूरयति— इति त्रिविधमिति। प्रकृतिपरमात्मभयम्। प्रकृतिर्व्यक्ताव्यक्तात्मिका, पर ईश्वरः आत्मा पुरुषः ब्रह्मण एव षाड्गुण्योपहितस्येश्वरत्वादीश्वरोऽपि ब्रह्मणो रूपमित्युच्यते। हरिर्मनोहरः पापहरश्च एवं सर्वात्मकः सर्वशक्तिः सर्वेश्वरो भगवान् विष्णुः सर्वेषामात्मतया तत्रानिष्टं निवार्य सर्वेष्टसिद्धिं प्रसाधयत्विति सिद्धम्।

Colophon:

वल्लालात्मजनारसिंहतनयः श्रीसोमभूपात्मना
विष्णौ बिभ्रति भूसतीं यदुलतामाचन्द्रताराम्बरम्।
श्रीमान् कोव्यणनन्दनो निरुपमं बोधं प्रपद्याकरोद्
योगी विष्णुपुराणभावविवृतिं विष्णोरिमां वल्लभाम्॥

इति व्याख्यन्निरुपमबोधशिष्यः कुमारजः।
योगी विष्णुपुराणेंऽशे षष्ठं विष्णवेक्यवाचकम्॥

इति श्रीमत्परमहंसयोगीन्द्रपादपद्मोपजीविजगदाचार्यश्रीपर्यायश्रीमदनुपमसुखरूपश्रीपादाम्बुजरोलम्बश्रीमदनुपमबोधश्रीधरश्रीपादारविन्दमकरन्दमन्दाकिनीमहाप्रवाहावगाहमाहात्म्यपवित्रीकृतान्तःकरणयोगिनः कुमारेश्वरतनयस्य योगिनः कृतौ विष्णुवल्लभाख्यायां श्रीविष्णुपुराणव्याख्यायां अष्टमोऽध्यायः ।

ओं नमोभगवते वासुदेवाय । समाप्तश्च षष्ठांशः ।

अनुपमशुद्धबोधस्य श्रीकृष्णस्वरूपस्येदं पुस्तकम् । हरिः । ओं नमो गुरुभ्यः ।

ഇതു കൊല്ലം തുളായിരത്ത ഇരുപത്തുനാലാമതെ വൃശ്ചിക വി ധരംഞം ശനിയാഴ്ചയിൽചെന്ന നക്ഷത്രവും കരണവും നിത്യ യോഗവും അന്നുച്ചതിരിഞ്ഞു മീനരാശിനേരം കൊണ്ടു തിരുവ ല്ലുത്തു മുക്കാൽവട്ടത്തു മേക്കേഗോപുരവാതുക്കൽ ഇരുന്നെഴുതി തീൎത്ത. വിഷ്ണുപുരാണ വ്യാഖ്യാനം.

Author—Kumārajayogin.

Remarks—Many leaves are left blank after Fol. 110.

॥ वैशाखमाहात्म्यम् (स्कान्दगतम्) ॥

475. VAIŚĀKHAMĀHĀTMYAM.

(from Skāndapurāṇa).

Substance—Palm leaf. Size—10″ × 1¾″. Leaves—126. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—2016. Complete.

Subject—Glorification of the importance of Vaiśākha month.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

पुण्यवने नैमिशारण्ये ऋषयो दीप्ततेजसः ।
सत्रमारेभिरे कर्तुं मुक्तिलाभाय सुव्रताः ।
तदा मुनिं समायान्तं जटामण्डलमण्डितम् ॥
भस्मोद्धूलितसर्वाङ्गं त्रिपुण्ड्राङ्कितमस्तकम् ॥
रुद्राक्षमालाभरणं वेदवेदाङ्गपारगम् ।
तं दृष्ट्वा मुनयः सर्वे प्रत्युत्थानासनादिभिः ॥
संपूज्य श्रोतुकामास्ते विचित्राश्च शुभाः कथाः ॥
परिवव्रुश्च तं सर्वे पृष्टवन्तश्च तं मुनिम् ।

ऋषयः—

स्कान्दे पुरा पुण्यशालिन् वैशाखस्य च वैभवम् ।
अस्माकं कथितं पुण्यं श्रुतं चास्माभिरेव हि ॥
तद् भूयः श्रोतुकामानां विस्तराद् वक्तुमर्हसि ।

End:

इत्येतत् परमाख्यानमम्बरीष तवोदितम् ।
श्रवणात् सर्वपापघ्नं सर्वसम्पद्विधायकम् ॥
येन भुक्तिं च मुक्तिं च भक्तिं ज्ञानं च गम्यसे ।
इति तस्य वचः श्रुत्वा ह्यम्बरीषः सुनिर्मलः ॥
प्रहृष्टान्तःकरणश्च बाह्यव्यापारवर्जितः ।
प्रणनाम तदा मूर्ध्ना दण्डवत् पतितो भुवि ॥
विसर्जयित्वा चापि पूजयामास तं पुनः ।

सम्पूजितस्तमामन्त्र्य नारदो भगवान् ऋषिः ।
लोकान्तरं ययौ धीमान् शापान्निकल संस्थितिः ॥
अम्बरीषोऽपि राजर्षिर्नारदोक्तानिमान् शुभान् ।
धर्मान् कृत्वा विलीनोऽभूत् परे ब्रह्मणि निर्गुणे ॥

सूतः—

य इदं परमाख्यानं पापघ्नं पुण्यवर्धनम् ।
शृणुयाच्छ्रावयेद्वापि सोऽपि याति परां गतिम् ॥
लिखितं पुस्तकं येषां गृहे तिष्ठति मानदम् ।
तेषां मुक्तिः करस्था हि किमुत श्रवणात्मनाम् ॥

Colophon :

इति श्रीस्कान्दे पुराणे वैशाखमाहात्म्ये त्रिंशोऽध्यायः ।
श्रीकृष्णाय परब्रह्मणे नमः ।

൧൦൩൨-ാമാണ്ടു പുരട്ടാശിമാസം ൩-ാം വൈശാഖ പുരാണം സമാപ്തം.

Author :

Remarks—This Ms. extending over 30 chapters deals also with the worship of Mādhava etc.

॥ व्याख्यारत्नावली (भारतव्याख्या) ॥

476. VYĀKHYĀRATNĀVALĪ.

(Commentary on the Bhārata)

Substance—Palm leaf. Size—$12\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—46. 8—10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1380. Incomplete.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

आजाननिर्वाणगपि यत्प्रसादा-

दाजानगीर्वाणगिरामपीष्टे ।

आजाज्जगत्पुण्यतमामनन्ता-

मुपास्महे तामपि वागधीशाम् ॥

उद्योगान्ते कुरुक्षेत्रे कुरुपाण्डवसैन्यानि समवेतानीत्युक्तम् । तद्विस्ता(र)बुभुत्सया जनमेजयः पृच्छति— कथमिति । वीराः परिपन्थिनिरासेन (स्था ? सा) म्राज्यं स्वीकरिष्याम इति निश्चितवन्त इत्यर्थः । कुरुपाण्डवसोमकाः कुरवश्च पाण्डवसोमकाश्च इति विभागः । कुरुपाण्डवा इति वक्तव्ये पृथक् सोमकग्रहणं सोमकबाहुल्यादित्यवसेयम् । पार्थिवाश्चेति चकारेणान्ये राजानः समुच्चीयन्ते । महात्मानः श्रीमन्तः ।

End :

अक्षिगतो द्वेष्यः दर्शनमात्रे द्वेष्यः मन्युश्च देवकृत इत्याह— विदिताश्चेत् पुनस्तान् युधि निवारयथ । किमिति विवक्षायां वदति—अजेया इति । पश्चात् तान् सहामहे वयामहे । यद्येवं तद्युद्धं किमर्थं क्रियत इत्यपेक्षायां तन्मरणार्थमित्याह—सर्वपौत्रेषु वृत्तवान् समवर्ती । अहमपि रणे कृतकर्मा निर्मन्युर्गतसंरम्भश्चाभवम् । एवं ब्रुवन्नहमपि युद्धं कृत्वाशाम्यमित्यर्थः । त्वं च तथा कुर्विति भावेन वदति । तद्युद्धम् ।

इत्युक्तवन्तं गाङ्गेयमभिवाद्य प्रसाद्य च ।

राधेयो रथमारुह्य प्रायात् तव सुतं प्रति ॥

इत्यवसानश्लोकः ।

Colophon :

ङ्या—भीष्मपर्वव्याख्या समाप्ता ।

Author:

Remarks—The commentator is Vidyāsāgara according to the revised edition of the Palace Catalogue. The forepart of the Ms. containing a commentary on Mokṣa Dharma in Bhārata is separately catalogued in it as No. 185.

॥ शनिप्रदोषमाहात्म्यम् (स्कान्दगतम्) ॥

477. ŚANIPRADOṢAMĀHĀTMYAM.

(from Skāndapurāṇa.)

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—25. 9 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—240. Complete.

Subject—The glory of Śanipradoṣa.

Beginning :

हरिः । श्रीगणपतये नमः ।

शिवो गुरुः शिवो देवः शिवो बन्धुः शरीरिणाम् ।
शिव आत्मा शिवो जीवः शिवादन्यन्न किञ्चन ॥
शिवमुद्दिश्य यत्किञ्चिद् दत्तं जप्तं हुतं कृतम् ।
तदनन्तफलं प्रोक्तं सर्वागमविनिश्चितम् ॥
भक्त्या निवेदितं शम्भोः पत्रं पुष्पं फलं जलम् ।

अल्पाद्ल्पतरं वापि तदनन्ताय कल्पते ॥
विहाय सकलान् धर्मान् सकलागमचोदितान् ।
शिवमेव भजेद्यस्तु मुच्यते कर्मबन्धनात् ॥
या प्रीतिरात्मनः पुत्रे या कलत्रे धनेऽपि वा ।
कृता चेच्छिवपूजायां सिद्धिमेति न संशयः ॥

End :

एवमन्ये समाराध्य प्रदोषे गिरिजापतिम्
अलभन्तेप्सितां सिद्धिं देहान्ते च परां गतिम् ॥
सूतः—एतन्महाव्रतं पुण्यं प्रदोषे शङ्करार्चनम् ।
धर्मार्थकाममोक्षाणां तदेतत् साधनं परम् ॥
यस्त्वेतत्पुण्यमाख्यानं शृणुयात् परमार्थतः ॥
प्रदोषशिवपूजान्ते कथयेत् सुसमाहितः ॥
न भवेत् तस्य दारिद्र्यं जन्मान्तरशतेष्वपि ।
ज्ञानैश्वर्यसमायुक्तः सोऽन्ते शिवपुरं व्रजेत् ॥

ये प्राप्य दुर्लभमिमं मनुजाः शरीरं
कुर्वन्ति हन्त परमेश्वरपादपूजाम् ।
धन्यास्त एव निजपुण्यजितास्त्रिलोका
स्तेषां पदाम्बुजरजो भुवनं पुनाति. ॥

Colophon :

इति ब्रह्मोत्तरखण्डे शनित्रयोदशीप्रदोषमहिमानुवर्णनं नाम एकोनत्रिंशोऽध्यायः ।

Remarks—The Ms. is old and damaged.

॥ शार्ङ्गपाणिपुरमाहात्म्यम् (मार्कण्डेयगतम्) ॥

478. ŚĀRṄGAPĀṆIPURAMĀHĀTMYAM.

(from Mārkaṇḍeyapurāṇa.)

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—7. 7—8 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—1200. Incomplete.

Subject—Sūta's narration of the greatness of Śārṅgapāṇipura.

Beginning :

....

... . कान्तं स्वर्लोकभूषणम् ॥

यस्यास्तीरे कृतावासा मृगद्विजसरीसृपाः ।

.... याश्च स्नानपानादि कुर्वन्ति सलिले शुभे ॥

हिरण्यवर्णाः शुचयः स्निग्धच्छायाश्चिरायुषः ।

भवन्ति दैवतप्राया जरारोगविवर्जिताः ॥

तत्र देवाः सगन्धर्वाः सयक्षोरगचारणाः ।

क्रीडन्त्यप्सरसां सङ्घैर्दिवारात्रमतन्द्रिताः ।

तं वै भूतपतिर्देशं नित्यमेव निषेवते ॥

End.

अहो क्षेत्रस्य माहात्म्यं परितो योजनद्वयम् ।

दिविष्ठा यत्र पश्यन्ति सर्वानेव चतुर्भुजान् ॥

रतिर्भूयाद्रतिर्भूयाच्छार्ङ्गपाणिपदाम्बुजे ।

तद्भक्तैश्चापि सम्बन्धः पुनर्जन्मनि जन्मनि ॥

संसारोद्भूतभीतिप्रमथननिपुणं शार्ङ्गमाहात्म्यमग्र्यं
कृष्णद्वैपायनाय श्रुतिशतगदितं प्रोक्तवान् यो मुदैव ।
पूर्वब्रह्मस्वरूपं यदुकुलतिलकः फल्गुनायेव कृष्णो
मार्कण्डेयं कृपालुं तमहमुरुधियं नौमि मूर्ध्ना मुनीन्द्रम् ॥

इत्येतत्कथितं सर्वं मया वो द्विजसत्तमाः ।
शार्ङ्गपाणिपुराख्यानं किं भूयः श्रोतुमिच्छथ ॥

Colophon :

इति मार्कण्डेयपुराणे तृतीयभागे शार्ङ्गपाणिपुरमाहात्म्ये एकादशोऽध्यायः । श्रीशार्ङ्गपाणिवनवासिभ्यो नमः ।

शार्ङ्गपाणिवनं प्राप्ता वयं पातकयूथपाः ।
मत्पार्श्वतोऽनुयात्राद्य भवतामत्रकेशिनी ॥

श्रीदक्षिणामूर्तये नमः ।

नक्राक्रान्तैकपादं करिवरमकरोद्यः पुरा वीतशोकं
शक्राद्यैर्देवमङ्घैर्विनमितचरणश्चारणोद्गीतकीर्तिः ।
अक्रूरस्येष्टदाने परिकलितमतिः पद्मपत्रायताक्ष-
श्चक्रक्षेत्राधिवासी विहरतु हृदये चक्ररूपो मुरारिः ॥

Author :

Remarks—Śārṅgapāṇipura *alias* Kumbhakonam is one of the sanctified places of worship in South India, rendered holy by the residence of Kāñcikāmakoṭipīṭhādhipati — Śaṅkarācārya. This Ms. is wanting in two leaves at the beginning.

॥ शिवगीता (पाद्मगता) ॥

479. ŚIVAGĪTĀ.

(from Pādmapurāṇa.)

Substance—Palm leaf. Size—8″ × 1¾″. Leaves—52. 10 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—975.

Subject—Explication of the reality of soul.

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
वन्दे गुरुं गणपतिं स्कन्दमादित्यमम्बिकाम् ।
दुर्गां सरस्वतीं लक्ष्मीं सर्वकार्यार्थसिद्धये ॥
अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥
अथातः सम्प्रवक्ष्यामि शुद्धकैवल्यमुत्तमम् ।
अनुग्रहान्महेशस्य भवदुःखस्य भेषजम् ॥
न कर्मणामनुष्ठानैर्न दानैस्तपसापि वा ।
कैवल्यं लभते मर्त्यः किन्तु ज्ञानेन केवलम् ॥
रामाय दण्डकारण्ये पार्वतीपतिना पुरा ।
या प्रोक्ता शिवगीताख्या गुह्याद् गुह्यतमा हि सा ॥
यस्याः स्मरणमात्रेण नृणां मुक्तिर्ध्रुवं भवेत् ।
पुरा सनत्कुमाराय स्कन्देनाभिहिता हि सा ॥
सनत्कुमारः प्रोवाच व्यासाय मुनिसत्तमः ।
मह्यं कृपातिरेकेण प्रददौ बादरायणः ॥

End :

अस्यास्तु श्रवणादेव यस्मात् कैवल्यमाप्नुयात् ।
शिवगीतामतो नित्यं शृणुध्वं मुनिसत्तमाः ॥

ऋषयः—

अद्यप्रभृति नः सूत त्वमाचार्यः पिता गुरुः ।
अविद्यायाः परं पारं यस्मात्तारयितासि नः ॥
तस्मात् सूतात्मज त्वत्तः मगो नान्योऽस्ति नो गुरुः ।
इत्युक्त्वा प्रययुः सर्वे सायं सन्ध्यामुपासितुम् ॥
स्तुवन्तः सूतपुत्रं ते सन्तुष्टा गोमतीतटम् ।

Colophon :

इति श्रीपाद्मे पुराणे शिवगीतासूपनिषत्सु परब्रह्मविद्यायां योगशास्त्रे शिवराघवसंवादे अधिकारनिरूपणं नाम षोडशोऽध्यायः ।
श्रीशिवाय नमः । श्रीगुरुभ्यो नमः ॥

Author :

Remarks—The subject-matter contained in Bhagavad Gīta is depicted here in a characteristic way.

॥ शिवगीता (तात्पर्यप्रकाशिकोपेता) ॥

480. ŚIVAGĪTĀ
with Tātparyaprakāśikā.

Substance—Palm leaf. Size—14" × 1½". Leaves—207. 8 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—5500.

Subject—Same as No. 479.

Beginning:

उमापत्यमुमाजानिमुमां चोमासहोदरम् ।
उमाननान्दरं पद्मां त्रिधिं वयमुपास्महे ॥
पञ्चाक्षरतनुं पञ्चवदनं प्रणवं शिवम् ।
अपारकरुणारूपं गुरुमूर्तिमहं भजे ॥
नत्वा सर्वगुरुं साम्बं लीलामानुषविग्रहम् ।
रामं च शिवगीतायास्तात्पर्यं वर्ण्यते मया ॥
क्वेयं गीता शिवप्रोक्ता गम्भीरोपनिषन्मयी ।
क्वाहं मन्दमतिर्हन्त शम्भोराज्ञा गरीयसी ॥

इह खलु देवा रक्षःपीडिताः तत्परिचरणादिना मानभङ्गयुक्ताः वैकुण्ठवासिनं शिष्टपरिपालनदुष्टनिग्रहपरायणं नारायणमुपेत्य रावणादिनिग्रहं प्रार्थितवन्तः ।

End:

व्या—एवं सूतपुत्रं प्रशस्य ज्ञानप्राप्त्या सन्तुष्टा ऋषयः सायंसन्ध्यामुपासितुं गोमतीतीरं गता इत्याख्यानमुपसंहरति—इतीति—
मू—इत्युक्त्वा प्रययुः सर्वे सायंसन्ध्यामुपासितुम् ।
स्तुवन्तः सूतपुत्रं ते सन्तुष्टा गोमतीतटम् ॥

Colophon:

इति श्रीपाद्मपुराणोत्तरखण्डान्तर्गतशिवगीतातात्पर्यप्रकाशिकासङ्ग्रहे षोडशोऽध्यायः । शिवगीता समाप्ता । श्रीगुरुभ्यो नमः ॥

शुभम् ।

Author: Com:—Paramaśivendrasarasvatī.

Remarks—An elaborate explanation is aimed at throughout. The commentator surveys the whole theme in the introduction. His name is furnished in C. C, Part III, Page 134. Hz. 1074.

॥ शिवधर्मशास्त्रम् (स्कान्दगतम्) ॥

481. ŚIVADHARMAŚĀSTRAM (from Skāndapurāṇa.)

Substance—Palm leaf. Size—15″ × 1¾″. Leaves—7. 2—12 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—250. Incomplete.

Subject—The rules of propitiatory rites relating to Śiva.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

नान्दिकेश्वर उवाच—

अतः परमिदं गुह्यं रुद्रोद्गीतं महोदयम् ।
महाविघ्नप्रशमनं महाशान्तिकरं शुभम् ॥
अकालमृत्युशमनं सर्वव्याधिनिवारणम् ।
परचक्रप्रमथनं सदाविजयवर्धनम् ॥
स्तम्भनं परसैन्यस्य रिपूत्सादकरं सदा ।
सर्वदेवग्रहानीकं समस्ताभीष्टसाधकम् ॥
सर्वशान्त्यधिकाराख्यं धर्मं वक्ष्यामि शाश्वतम् ।

शशाङ्कार्धधरस्त्र्यक्षो नागयज्ञोपवीतवान् ॥

... ...

त्रैलोक्यनामितः श्रीमाञ्छान्तिमाशु करोतु मे ॥

End :

यत् पुण्यं सर्वतीर्थानां गङ्गादीनां विशेषतः ।
तत् पुण्यं कोटिगुणितं प्राप्नोति श्रवणादिह ॥
दशानां राजसूयानामग्निष्टोमशतस्य च ।
श्रवणात् फलमाप्नोति कोटिकोटिगुणोत्तरम् ॥
अवध्यः सर्वदेवानामन्येषां च विशेषतः ।
जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः ॥
गोघ्नश्चैव कृतघ्नश्च ब्रह्महा गुरुतल्पगः ।
शरणागतघाती च मित्रविस्रम्भघातकः ॥
कष्टपापसमाचारः पितृहा मातृहा तथा ।
श्रवणादस्य भावेन मुच्यते सर्वपातकैः ॥
शान्त्यध्यायमिदं पुण्यं न देयं यस्य कस्यचित् ।
दातव्यं शिवभक्तेभ्यः शिवेन कथितं पुरा ॥
सर्वकामसमृद्ध्यर्थं ये पठन्ति दिने दिने ।
तेभ्यः पुण्यमिदं देयमात्मनः शिवमिच्छता ॥

Colophon :

इति शिवधर्मशास्त्रे शिवार्चनजपोपवासप्रकारेण सह शान्त्यध्यायः षष्ठः । शिवो रक्षतु ।

Author :

Remarks—The Ms. contains only the 6th chapter of the Śivadharma Śāstra. A few leaves at

the end are devoted to miscellaneous topics such as omens, the effects of feeding the poor, Ādityahṛdaya etc.

॥ शिवधर्मशास्त्रम् (स्कान्दगतम्) ॥

482. ŚIVADHARMAŚĀSTRAM.

(from Skāndapurāṇa.)

Substance—Palm leaf. Size—$14\frac{3}{4}'' \times 2''$. Leaves—73. 6—8 lines per page and 32—47 letters per line. Script—Malayāḷam. No. of Granthas—1200. Complete.

Subject—Same as No. 481.

Beginning:

ओम् । गणपतये नमः । अविघ्नमस्तु ।
सर्वाकारमशेषस्य जगतः सर्वदा शिवम् ।
गोब्राह्मणनृपाणां च शिवं भवतु सर्वदा ॥
शिवमादौ शिवं मध्ये शिवमन्ते च सर्वदा ।
सर्वेषां शिवभक्ता(ना)मनुगानां च नः शिवम् ॥
मेरुपृष्ठे सुखासीनमृषिसंघैः समावृतम् ।
लोकानुग्राहिणं शान्तं सर्वज्ञं नन्दिकेश्वरम् ॥
तेषां मध्ये समुत्थाय मुनिर्ब्रह्मसुतोत्तमः ।
सनत्कुमारः सुतपाः पृच्छति स्म यथाविधि ॥
भगवन् सर्वधर्मज्ञ शिवधर्मपरायण ।
श्रोतुकामाः परं धर्ममिमे सर्वे समागताः ॥

End :

अनन्तं नादिमव्यक्तं देहस्थं देहवर्जितम् ।
हृदिस्थं सर्वभूतेषु व्योमस्थं च नमोऽस्तु ते ॥
अग्राह्यमिन्द्रियैर्वापि सर्ववस्तुनि चार्चितम् ।
सतेजोगूढमात्मानं गुह्यानां गूढगोचर ॥
गुहावास सदानित्यं गूढार्थं च नमोऽस्तु ते ।
महादेवं महात्मानं महामायापरापरम् ॥
महाज्ञानपरातीतं ज्ञानगम्य नमोऽस्तु ते ।
एकाक्षरश्चतुर्वेदश्चतुर्मात्रैरलंकृतः ॥
चतुष्कलं कलातीतं बिन्द्वतीत नमोऽस्तु ते ।
ईशान ईश्वरो ब्रह्मा सदाशिव नमोऽस्तु ते ॥
धर्मार्थकाममोक्षार्थं सर्वभूतानुक(म्पया) ।
सर्वं तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ॥
सर्वः सुखमवाप्नोतु सर्वस्य च भवेच्छिवम् ।

Colophon :

इति शिवधर्मशास्त्रे नन्दिके... ... ...गीतायां शिवाश्रमपूजा नाम द्वादशोऽध्यायः । शिवधर्मः समाप्तः ।

ओं नमः शिवाय । उमादेव्यै नमः । षण्मुखाय नमः । केशवाय नमः । मद्गुरुभ्यो नमः ।

Author :

Remarks—The Ms. is much worn out.

॥ शिवधर्मशास्त्रम् (स्कान्दगतम्) ॥

483. ŚIVADHARMAŚĀSTRAM.

(from Skāndapurāṇa.)

Substance—Palm leaf. Size—12¼" × 1¾". Leaves—73. 6—8 lines per page and 32—47 letters per line. Script—Malayāḷam. No. of Granthas—1200. Complete.

Subject—Same as No. 481.

Beginning—End: Same as No. 482.

Colophon:

इति शिवधर्मशास्त्रे नन्दिप्रोक्ते त्रिद्याशास्त्रोपशाखासुमुद्देशो नाम द्वादशोऽध्यायः। शिवधर्मशास्त्रं समाप्तम्। हरिः।

Author:

Remarks—The Ms. is much worn out.

॥ शिवधर्मोत्तरम् (स्कान्दगतम्) ॥

484. ŚIVADHARMOTTARAM.

(from Śkāndapurāṇa.)

Substance—Palm leaf. Size—12" × 1½". Leaves—123. 7—9 lines per page and 36—40 letters per line. Script—Malayāḷam. No. of Granthas—1500. Incomplete.

Subject—The worship of Śiva.

Beginning:

......................सेवितम् ।
कालत्रयेऽपि निखिलं तच्चाहमनुमोदये ॥
इति त्रिसन्ध्यमखिलं यत्पुण्यमनुमोदयेत् ।
असंशयमतिश्रद्धं तत्समं पुण्यमाप्नुयात् ॥ इति ॥
शिवधर्माः शिवेनोक्ताः सुसूक्ष्मास्तु महाफलाः ।
कीर्तितास्ते समासेन शिवार्चनांविधिं प्रति ॥

इति शिवधर्मोत्तरे गोषडङ्गविधिर्नाम प्रथमोऽध्यायः ।

अथ विद्या विदेर्धातोर्विद्या ज्ञानं शिवात्मकम् ।
तस्येयं दानं महादानं सर्वदानोत्तमोत्तमम् ॥
अध्याप्य यः शुभान् शिष्यान् शिवभक्तान् प्रबोधयेत् ।
शिवविद्यार्थसारेण विद्यादानं तदुच्यते ॥
संस्कृतैः प्राकृतैर्वाक्यैर्यैः शिष्याननुरूपतः ।
देशभाषाद्युपायैश्च बोधयेत् स गुरुः स्मृतः ॥
यथा शिवस्य नैवान्तः सम्पूर्णस्य महात्मनः ।
तथा विद्याप्रदानस्य नान्तः सर्वगुणात्मनः ॥
शिवाष्टगुणमैश्वर्यं तद्विद्यादानतः फलम् ।
इह कीर्तिं श्रियं ब्राह्मीं प्रज्ञावृद्धिं धनं सुखम् ॥

End:

ऊर्ध्वाकुञ्चितशृङ्गाग्रमल्पशृङ्गान्तरं तथा ।
स्थूलाग्रशृङ्गयुक्तं वा सर्वावयवशोभितम् ॥

रक्तपीतैश्च कुसुमैः कुङ्कुमाद्यैश्च वर्णकैः ।
यथाशोभं समालभ्य विभवैः पूजयेद् वृषम् ॥
किङ्किणीवक्रोपेतं घण्टिकाचामरान्वितम् ।
स्वस्तिकैरर्धचन्द्रैश्च नानारत्नैश्च शोभितम् ॥
अष्टाङ्गुलप्रविस्तीर्णां हेमपट्टविनिर्मिताम् ।
राजतीं च चणावापि ? मालामुरसि विन्यसेत् ॥
तद्विधां पृष्टमालां च पुच्छान्तक......... ।
.........लदं शिवभक्त्या दिने दिने ॥
न मारी न च दुर्भिक्षं न रक्षांसि न पन्नगाः ।
नाकाले म्रियते राजा पीड्यते न च शेरुभिः ॥
शृणोति यश्च सततं शिवधर्मं नराधिपः ।
तस्य देशे भवेन्नित्यं सर्वेषां देहिनां शिवम् ॥

Colophon :

इति शिवधर्मोत्तरे स्कान्दप्रोक्ते शिवागमे गोमाहात्म्यं नाम द्वादशोऽध्यायः । शिवधर्मोत्तरं समाप्तम् ।

नमश्शिवाय त्रिदशार्चिताय विनष्टदोषाय गुणार्णवाय ।
विमुक्तिमार्गप्रतिबोधनाय देवादिदेवाय नमश्शिवाय ॥

Author :

Remarks—A few leaves at the beginning are missing.

॥ शिवधर्मोत्तरम् (स्कान्दगतम्) ॥

485. ŚIVADHARMOTTARAM.

(from Skāndapurāṇa.)

Substance—Palm leaf. Size—13″ × 1½″. Leaves—

22. 8 lines per page and 45 letters per line. Script—Malayāḷam. No. of Granthas—500. Incomplete.

Subject—Same as No. 484.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । नमः शिवाय ।
ज्ञानशक्तिधरं शान्तं कुमारं शङ्करात्मजम् ।
देवारिसूदनं स्कन्दमगस्त्यः परिपृच्छति ॥
भगवन् दर्शनात् तुभ्यमन्त्यजस्यापि सद्गतिः ।
सप्तजन्मसु विप्रस्तु स्वर्गाद्भ्रष्टः प्रजायते ॥
येनाधिनाथ भूतानां सर्वेषामनुकम्पकः ।
अतः सर्वहितं धर्मं संक्षेपात् प्रब्रवीहि मे ॥
धर्मा बहुविधा देव्या देवेन कथिताः किल ।
केचिच्छ्रुतास्त्वया सर्वे पृच्छामि त्वामहं ततः ॥
किम्प्रधानाः शिवे धर्माः शिववाक्यं च कीदृशम् ।
लिङ्गेऽर्चितः शिवः केन विधिना सम्प्रसीदति ॥
विद्यादानं च दानानां सर्वेषामुत्तमं किल ।
तच्च श्रुतौ द्विजेन्द्राणां नान्येषां समुदाहृतम् ॥
तत्पुण्यं सर्ववर्णानां जायते केन कर्मणा ।
ज्ञेयं कतिविधं तच्च विद्यादानमनुत्तमम् ॥

End—Colophon—Same as No. 484.

Remarks—The Ms. comprises chapters 1, 11 and 12. It is worn out.

॥ शिवधर्मोत्तरम् (स्कान्दगतम्) ॥

486. ŚIVADHARMOTTARAM.

(from Skāndapurāṇa.)

Substance—Palm leaf. Size—14" × 2". Leaves—60. 10 lines per page and 56 letters per line. Script —Malayāḷam. No. of Granthas—2000. Incomplete.

Subject—Same as No. 484.

Beginning.

हरिः। श्रीगणपतये नमः। अविघ्नमस्तु ।

जयत्यनेकसिद्धान्तमन्त्रमाहात्म्यपूजितम् ।
खड्गादिसिद्धिहेतुत्वात् प्रत्यक्षं शिवसाधनम् ।
जयत्येकपदाभासमस्तभुवनत्रयः ।
द्वितीयपदविन्याससव्याकुलाभिनयः शिवः ।

उन्मीलने यस्य भवन्ति लोकाः
सम्मीलने च प्रलयं विशन्ति ।
स ईश्वरः सर्वजगत्प्रसूति-
र्ब्रह्मेन्द्रविष्णोरपि वन्दनीयः ॥

ज्ञानशक्तिधरं शान्तं कुमारं शङ्करात्मजम् ।

End—Colophon—Same as No. 484.

Author:

Remarks—All kinds of sins are enumerated here with their expiatory rites. The greatness of the "cow" is also glorified.

॥ शिवरात्रिमाहात्म्यम् (स्कान्दगतम्) ॥

487. ŚIVARĀTRIMĀHĀTMYAM.

(from Skāndapurāṇa.)

Substance—Palm leaf. Size—13″ × 2″. Leaves—19. 9—11 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—375. Incomplete.

Subject—Explanation of the rites to be observed on Śivarātri day and the benefits resulting therefrom.

Beginning:

अस्तु विघ्नप्रशमनमविघ्नोदीर्णवैभवम् ।
अपत्यमादिदम्पत्योरनेकपमुखं महः ॥

ओम् ।

परस्परतपःसम्पत्फलायितपरस्परौ ।
प्रपञ्चमातापितरौ प्राञ्चौ जायापती स्तुमः ॥

ओम् ।

यावद् ज्ञानं समुत्पन्नं तदारभ्य नरोत्तमः ।
शिवरात्रिव्रतं कुर्याद् ध्रुवमामरणान्तिकम् ॥

ओं शिवाशिवाय नमः । अविघ्नमस्तु । हरिः ।

यामे प्राथमिके सम्यक् पूजिते सेविते शिवे ।
अनुष्ठितं व्रतं सर्वं ब्रह्महत्यादयो हताः ॥
यामे द्वितीये मनसा पूजिते सेविते शिवे ।
अश्वमेधफलं लब्ध्वा पुत्रारोग्यमवाप्नुयात् ॥
तृतीये भक्तितो यामे पूजिते सेविते शिवे ।
अखण्डमायुः सम्प्राप्य शिवसायुज्यमाप्नुयात् ॥

तुरीये शाम्भवे यामे पूजिते सेविते शिवे ।
सर्वाभीष्टफलं प्राप्य मुच्यते शत्रुपीडया ॥

End:

मृगटङ्कधरं देवं नीलकण्ठमथापि वा ।
पञ्चाननमयीं मूर्तिं हृदि ध्यायन्ति ये जनाः ॥
मम पूज्यतमा ह्येते यदि पापान्विता अपि ।
पूजयेस्ता... ... ...छसि प्रियम् ॥
यथादृष्टजया (?) प्रोक्तं किं भूयः श्रोतुमिच्छसि ।
श्रुतं देव मया सर्व.... ....माहात्म्यमेव च ॥
त्वद्भक्तानां च माहात्म्यं मन्त्राणां च श्रुतं मया ।
रुद्राक्षाणां च माहात्म्यं.... ....

Colophon:

इति स्कान्दे पुराणे शतसहस्रिकायामीशानसंहितायां लिङ्गप्रादुर्भावे शिवरात्रिव्रतविधानोपदेशो नाम द्वितीयोऽध्यायः ।

Author:

Remarks—The Ms. is much crumbly. The invocatory verses at the beginning may be an interpolation of the scribe. The work is incomplete. The codex breaks off in the 2nd chapter.

॥ शुकसंहिता ॥

488. ŚUKASAMHITĀ.

Substance—Palm leaf, Size—$4\frac{1}{2}'' \times 1\frac{1}{4}''$. Leaves—

—22. 7 lines per page and 14 letters per line. Script—Malayāḷam. No of Granthas—135.

Subject—Śuka's account of Sīta's sports at Daṇḍakāraṇya.

Beginning:

श्रीरामाय नमः ।

रामं नवघनश्यामं जानकीप्राणवल्लभम् ।
नमस्कृत्य मुहुर्वक्ष्ये संहितां ब्रह्मरूपिणीम् ॥

जनकः—

रामस्य यत् परं तत्त्वं ब्रह्मणोऽव्यक्तरूपिणः ।
तत् त्वमाचक्ष्व सकलं ब्रह्मन् शुक महामुने ॥
त्वत्तोऽन्यः को विजानाति ब्रह्मतत्त्वं परात् परम् ।
रामं स(च्चित्सु)खाकारं सृष्टिस्थित्यन्तकारकम् ॥

श्रीशुकः—

शृणु राजन् परं गुह्यं वेद्यं यद् वि (दु) षामपि ।
रामतत्त्वं त्रयीतत्त्वं तारकं ब्रह्म यत् परम् ॥
पार्थिवा धारणा त्वाद्या द्वितीया कथ्यतेऽम्मयी ।
आग्नेयी तु तृतीया स्यात् तुरीया वायुधारणा ॥

End:

अतीव सु... ...रस्थाने सच्चिदानन्दमन्दिरे ।
(ए) वमुक्तस्तया सार्धं रेमे बृ(न्दा)वने प्रभुः ॥
यमुनायास्तटे त (स्मिन्) महावनविभूषिते ।

Colophon:

इति श्रीशुकसंहितायां प्रथमाध्याये तुरीयः पादः ।
शुभमस्तु । रामो... ...

Author:

Remarks—The beginning and closing leaves are damaged. 49 is the first page number and 70 the last. The work opens on the middle of Fol. 49 and the portion preceding its beginning is quoted below:—

... ...

....ध्यानमना अभूत् स्वयम् ।
स्मरन् स्मरन् रामरसं हृदब्जे
बाह्येन्द्रियज्ञानमतो निवृत्तम् ॥

इति श्रीहनुमत्संहितायां परमरहस्ये महारासोत्सवे पञ्चमोऽध्यायः ।

Śukasamhitā is a portion of Hanumatsamhitā.

॥ शुचीन्द्रस्थलमाहात्म्यम् (स्कान्दगतम्) ॥

489. ŚUCĪNDRASTHALAMĀHĀTMYAM.
(from Skāndapurāṇa.)

Substance—Palm leaf. Size—5½" × 1¼". Leaves—121. 10—11 lines per page and 22 letters per line. Script—Malayalam. No. of Granthas—1750.

Subject—The greatness of Śucindram in Travancore.

Beginning:

अविघ्नमस्तु ।
वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

तच्छ्रुत्वा मुनयः सर्वे जहृषुः सूतभाषितम् ।
अत्रेराश्रममाहात्म्यं नैमिशारण्यवासिनः ॥
अत्याश्चर्यमुपाविष्टाः पुनः पप्रच्छुरादृताः ।
वक्तारं मुनयः सूतं पुराणश्रवणोत्सुकाः ॥
पुनश्च श्रोतुकामाः स्मः सूतेदानीं वयं मुने ।
अत्रेराश्रममाहात्म्यं श्रवणानन्दकारकम् ॥
अष्टादशपुराणानां मध्ये सूत कथाम्बुधौ ।
पीयूषसदृशं स्कान्दं श्रवणान्मुक्तिदायकम् ॥
सारात् सारतमं तस्मिन् त्वयोक्तं स्थानवैभवम् ।
अत्रेराश्रममाहात्म्यमात्मज्ञानप्रदायकम् ॥
इदानीं श्रोतुकामाः स्मस्तदत्र्याश्रमवैभवम् ।
विस्तरेण मुनिश्रेष्ठ वद नः सूतनन्दन ॥
केनोक्तं मुनिशार्दूल केनेदं विश्रुतं पुरा ।
एवमाकर्ण्य वचनं मुनिश्रेष्ठैः प्रभाषितम् ॥
सूतः प्रीतिमुपाविष्टो वक्तुं समुपचक्रमे ।

End :

एवं सत्कृत्य तं सूतमलङ्कृत्य निजाश्रमे ।
प्रदक्षिणं कारयित्वा स्वस्तिवाचनपूर्वकम् ॥
प्रसादं जगृहुस्तस्मात् कथाश्रुतिफलप्रदम् ।
वेदवृक्षप्रभावं ते तत्र श्रोतुं समुत्सुकाः ॥
तद्दिनाध्वरकर्माणि चक्रुर्नैमिशवासिनः ।

सम्भावनां प्राप्य मुनिश्च रम्ये
स्थितः सदा स्थाणुशिवं विचिन्त्य ।
तत्राध्युवास श्रुतिभूरुहस्य
वक्तुं प्रभावं महतां मुनीनाम् ॥

शुचीन्द्रमाहात्म्यमिदं पवित्रं
पठन्ति शृण्वन्ति च ये पृथिव्याम् ।
स्थाणोः प्रसादात् सकला जनास्ते
स्वाभीष्टमग्र्यं फलमाप्नुवन्ति ॥


Colophon :

इति श्रीमत्स्कान्दे पुराणे शुचीन्द्रस्थलमाहात्म्ये स्थानवैभवखण्डे याज्ञवल्क्यसायुज्यं नाम चतुर्विंशोऽध्यायः ।

शुभमस्तु ।

Author :

Remarks—This Ms. is included in the Skānda-purāṇa and the script is legible.



॥ शुचीन्द्रस्थलमाहात्म्यम् (स्कान्दगतम्) ॥

490. ŚUCĪNDRASTHALAMĀHĀTMYAM.

(from Skāndapurāṇa.)

Substance—Palm leaf. Size—6″ × 1⅝″. Leaves—172. 10—11 lines per page and 22 letters per line. Script—Malayāḷam. No. of Granthas—1750.

Subject—Beginning—End—Same as No. 489.

Colophon :

इति स्कान्दे पुराणे स्थानवैभवखण्डे उपरिभावे शुचीन्द्रस्थल-

माहात्म्ये याज्ञवल्क्यसायुज्यप्राप्तिकथनं नाम चतुर्विंशोऽध्यायः ।
शुचीन्द्रमाहात्म्यं समाप्तम् ।

स्थाणुनाथाय नमः । श्रीवेङ्कटेश्वराय नमः ।

इदं शुचीन्द्रमाहात्म्यं..........कृष्णेन लिखितम् ।

Author :

Remarks—The Ms. is crumbly. A large number of leaves are missing. The verse beginning with "वागर्थाविव—" is omitted. Besides, immediately after the hemistich "सारात् सारतरं......" another "क्षीरे घृतमिव श्राव्यं सूत तत्स्थानवैभवम्" is also seen.



॥ शेषधर्मः ॥

491. ŚEṢADHARMA.

Substance—Palm leaf. Size—$7\frac{3}{4}'' \times 2''$. Leaves—206. 10—13 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—2000. Complete.

Subject—The teachings occurring after those of Bhīṣma in the Mahābhārata.

Beginning :

श्रीमहागणपतये नमः ।
अथ ते मुनयः सर्वे शौनकाद्या महर्षयः ।
सूतं धर्मविदां श्रेष्ठं पप्रच्छुरिदमादृताः ॥
सूत सूत महाभाग सर्वशास्त्रविशारद ।

व्यासप्रसादात् सर्वं त्वं वेत्सि धर्ममशेषतः ॥
भारतीयानि शास्त्राणि विचित्रफलवन्ति च ।
विचित्रकथयोपेता भारतीयकथाः श्रुताः ॥
श्रीकृष्णचरिते दिव्ये हरिवंशे यदद्भुतम् ।
धर्मं धर्मभृतां श्रेष्ठ तन्नः शंसितुमर्हसि ॥

श्रीसूतः—

एतदर्थं महाप्राज्ञ जनमेजयभूपतिः ।
पृष्टवान् मुनिशार्दूलं वैशम्पायनमर्थवित् ॥

End :

गन्धपुष्पादिभिर्माल्यैरभ्यर्च्य गुरुपुङ्गवम् ॥
हिरण्यवस्त्रयानाद्यैः पूजयामास भूसुरान् ।
अभिवाद्य गुरुं पश्चादाशीर्वादमथाप सः ॥
गुरोरनुज्ञया विप्राः स्वपुरे सुखमास्थिताः ।
ये विरक्ता ऋषिगणाः सूतेन सुसमाहिताः ॥
पूजयामासुरव्यग्राः सूतं पुण्यकथामयम् ।
तस्मात् पुण्यकथां श्रुत्वा कथान्ते तं प्रपूजयेत् ॥
पूजिते स हरिः साक्षात् प्रसन्नो भवति ध्रुवम् ।

परमिदमितिहासं शृण्वतां लौकिकानां
सकलदुरितशान्तिः सद्य एवास्तु विप्राः ।
स भजति हरिवंशे भक्तिमग्र्यां मुरारौ
जगति सुलभमेतद् दुर्लभं पापिनां च ॥

Colophon :

इत्याश्चर्यपर्वणि हरिवंशे शेषधर्मे धर्मोपाख्यानप्रपूजनं नाम सप्तपञ्चाशोऽध्यायः ।

श्रीकृष्ण ।

Author:

Remarks—This work is a part and parcel of the Mahābhārata.

॥ श्रीकुरङ्गमाहात्म्यम् (ब्रह्माण्डगतम् ॥

492. ŚRĪKURAṄGAMĀHĀTMYAM.

(from Brahmāṇḍapurāṇa.)

Substance—Palm leaf. Size—9″ × 1¾″. Leaves—45. 6—7 lines per page and 38 letters per line. Script—Grantha. No. of Granthas—700. Incomplete.

Subject—A panegyric of Tirukkaṇamkuḍi (near Tinnevelly) and of the Viṣṇu temple consecrated therein.

Beginning:

हरिः ॐ ।

श्रीवैशम्पायन उवाच—

अ..................त्वया वेदाविदां वर ।
विष्णोर्माहात्म्यपादांशजगच्चिदचिदात्मकम् ॥
तत्क्षेत्राणां तु माहात्म्यं श्रोतव्यं भ.... ....या ।
सर्वं तावदशेषेण वक्तुमर्हसि मानद ॥

श्रीवेदव्यासः—

विष्णोः क्षेत्राण्यनन्तानि श्रुतानि हि जगत्पते ।
संख्यातुं नैव शक्तोऽस्मि यथाज्ञातं मया शृणु ॥

पुरा देवाः समेता वै सेन्द्राः सर्षिपुरोगमाः ।
आदित्या वसवो रुद्रा मरुतश्चाश्विनावपि ॥
पितरो लोकपालाश्च मेरुशृङ्गं समाश्रिताः ।
देवकार्यं विचिन्वन्तो दैत्यदानवपीडिताः ॥
तदिदं जगदुत्पत्तिस्थितिसंहारकारणम् ।
शासनं शाश्वतं विष्णोः श्रीकुरङ्गनिवासिनः ॥

End :

स सर्वकिल्बिषान्मुक्तः पूर्णकामः समृद्धिमान् ।
विरक्तो योगयुक्तः सन् साक्षात्कृत्य सनातनम् ॥
यत्सूरिसेव्यं परमं वैष्णवं पदमाप्नुयात् ।

Colophon :

इति ब्रह्माण्डपुराणे क्षेत्रकाण्डे श्रीकुरङ्गमाहात्म्ये गङ्गानारदसंवादे षष्ठोऽध्यायः । हरिः । शुभमस्तु ।
श्रीसुन्दरपरिपूर्णस्वामिने नमः । श्रीगुरुभ्यो नमः ।

Author :

Remarks—The Ms. is very much rotten and damaged. A gap after Fol. 27 extends upto the 36th. The subject treated is traceable to the Brahmāṇḍa Purāṇa which abounds in similar topographies.

॥ श्रीपरिसरक्षेत्रमाहात्म्यम् ॥

493. ŚRĪPARISARAKṢETRAMĀHĀTMYAM.

Substance—Palm leaf Size—8″ × 2¼″. Leaves-

69. 9—12 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas —1050.

Subject—Description of the traditional origin etc. of the temple at Tiruppatisāram in Travancore.

Beginning:

श्रीपरिसरक्षेत्रमाहात्म्यम् ।

തിരുക്കുറുങ്കുടി തിരുമലാചാൎയ്യകൃതി.

हरिः ।

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥
विशुद्धविज्ञानघनस्वरूपं विज्ञानविश्राणनबद्धदीक्षम् ।
दयानिधिं देहभृतां शरण्यं देवं हयग्रीवमहं प्रपद्ये ॥
सुन्दरश्रीनिवासार्याल्लब्धवेदान्तसम्पदम् ।
सर्वशास्त्रार्थतत्त्वज्ञं श्रीनिवासमुनिं भजे ॥
व्यासं वासिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥
श्रीपतिप्रीतये सत्रं शौनकाद्या महर्षयः ।
नैमिशेऽनिमिषक्षेत्रे समासत समाहिताः ॥
तत्रागतं महाप्राज्ञं सूतं पौराणिकोत्तमम् ।
पप्रच्छुः सहिताः सर्वे वद पुण्यकथामिति ॥
महानदीप्रसङ्गेन भवता हनुमन्नदी ।
पूर्वमुक्ता पर्णकुट्याः समीपेऽस्तीति सा पुनः ॥
सूत क वा पर्णकुटी क वा सा हनुमन्नदी ।
अस्ति तद्विस्तरं साधो वर्णयाद्य दयानिधे ॥

इति तैश्चोदितः सूतस्तद्विस्तरमथाब्रवीत् ।

End:

श्रीसूतः—

परिसरक्षेत्रतीर्थनाथानां वैभवं श्रुतम् ।
यूयं कृतार्था भवथेत्युक्ताः सूतेन तेन ते ॥
शौनकाद्या मुनिश्रेष्ठाः परमानन्दपूरिताः ।
वयं कृतार्था धन्याः स्मः पुण्येयं सत्कथा श्रुता ॥
अतोऽखिलपुराणज्ञ सूत वृद्धिमवाप्नुहि ॥
इत्युक्त्वा पूजयामासुः सूतं परमधार्मिकम् ।
प्रशस्यमानः सूतोऽपि मुनिभिर्मोदतेतराम् ॥

Colophon:

इत्यगस्त्यशिष्यकौशिकश्रीनिवासमुनिप्रोक्तभविष्यत्पुराणशेषे श्रीपरिसरक्षेत्रमाहात्म्ये परशुरामहितानुष्ठानं नाम सप्तदशोऽध्यायः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

हरिः ॐ शुभमस्तु । श्रीमते श्रीशैलसूरिमुनये नमः । श्रीमते निगमान्तमहादेशिकाय नमः । സുബ്രഹ്മണ്യൻ रक्षतु ॥

Author—Tirumalācārya, Thirukkuruṅkuḍi.

Remarks—This temple is situated nearly three miles north of Nagercoil in Travancore. The Ms. opens with a general survey of the history of Keraḷa evincing how Travancore came by

the name Vañci Rājya. Then it deals with the trouble which this state was experiencing at the hands of Eṭṭuvīṭṭil Piḷḷamār and the incidents and hardships Mārtāṇḍa Varmā and his faithful minister had to face at the time. Some leaves are devoted to the description of the administration of Bāla Rāma Varmā etc., as is evident from the following excerpts:

तेषु श्रीकौस्तुभांशो यः कुलशेखरभूपतिः ।
धार्मिकाग्रेसरः कुम्भे केरळे वञ्चिपत्तने ॥
जनित्वा सकलान् धर्मान् पालयिष्यति शाश्वतान् ।
वञ्चेड्रानार्थकत्वेन वञ्चिभक्तिरिहेष्यते ।
संसारार्णवमग्नानां सा हि सन्तारिका स्मृता ॥
भगवद्भक्तियुक्ता ये श्रीवञ्चिकुलशेखराः ।
भविष्यन्ति महाभागाः पुण्यश्लोकाश्चिरायुषः ॥

... ...
....
... ...
... ...

कुलशेखरविष्णुर्हि तदनन्तरकालिकः ।
सोऽष्टसद्मपतीन् शूद्रान् केरलान् धर्मघातकान् ॥
अधर्मवर्धनाद् राज्ञस्तद्देशीयजनद्रुहः ।
म्लेच्छक्षत्रपतीन् हूणान् देवब्राह्मणकण्टकान् ।
निर्जित्य रामसेनानीमहामतिमतानुगः ।
धर्मानुद्धृत्य जीर्णांस्तानधिकांश्च करिष्यति ॥

स्वराज्यमखिलं विष्णोः शेषपर्यङ्कशायिनः ।
समर्प्य पद्मनाभस्य निर्वृतस्तदनन्तरम् ॥
तत्पादपादुकाद्वन्द्वपरिष्कृतकिरीटभृत् ।
पद्मनाभालयपुरश्रीपादाभिधसौधगः ॥
तदधीनस्वप्रवृत्तिनिवृत्तिर्दासमम्मतः ।
तद्राज्यं परिपाल्येत्थं कृतार्थः स भविष्यति ॥

... ...

॥ श्रीरङ्गक्षेत्रमाहात्म्यम् (ब्रह्माण्डगतम्) ॥

494. ŚRĪRAṄGAKṢETRAMĀHĀTMYAM.

(from Brahmāṇḍapurāṇa.)

Substance—Palm leaf. Size—2¾″ × 1¾″. Leaves—30. 10 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—675.

Subject—A panegyric of Śrīraṅgakṣetra.

Beginning :

हरिः । श्रीगणपतये नमः ।

नारदः—
देव देव विरूपाक्ष श्रुतं सर्वं मयाधुना ।
त्रैलोक्यान्तर्गतं वृत्तं त्वन्मुखाम्भोजनिस्सृतम् ॥
तथा पुण्यानि तीर्थानि पुण्यान्यायतनानि च ।
गङ्गाद्याः सरितः सर्वा इतिहासाश्च शङ्कर ॥
कावेर्यास्तु प्रसङ्गेन तस्यास्तीरे त्वया पुरा ।
प्रस्तुतं रङ्गमित्युक्तं विष्णोरायतनं महत् ॥

तस्याहं श्रोतुमिच्छामि विस्तरेण महेश्वर ।
माहात्म्यमघनाशाय पुण्यस्य च विवृद्धये ॥
महेश्वरः—
एतद् गुह्यतरं लोके स्वकालेऽपि मया तव ।
न प्रकाशितमेवाद्य मया सम्यक् प्रकाश्यते ॥
माहात्म्यं विस्तरेणह वक्तुं वर्षशतैरपि ।
न शक्यं श्रोतुमपि वा तस्मात् संक्षेपतः शृणु ॥

End :

श्रुत्वैवं रङ्गमाहात्म्यं विष्णुभक्तो विमत्सरः ।
जित्वा क्रोधं च कामं च विष्णुमाप्नोति शाश्वतम् ॥
पठन् शृण्वंस्तथा विप्रो विदुषामग्रणीर्भवेत् ।
क्षत्रियो लभते राज्यं वैश्यश्च धनसम्पदः ॥
शूद्रोऽपि भगवद्भक्तिं योधकोऽपि जयं लभेत् ।
गर्भिणी जनयेत् पुत्रं कन्या भर्तारमाप्नुयात् ॥
शृण्वन् पठन् लिखन् बिभ्रद्रङ्गमाहात्म्यमुत्तमम् ।
मुक्त्वा शुभाशुभे याति तद्विष्णोः परमं पदम् ॥

Colophon:

इति ब्रह्माण्डपुराणे महेश्वरनारदसंवादे श्रीरङ्गमाहात्म्ये दशमोऽध्यायः । श्रीमद्रङ्गमहद्धामश्रीरङ्गब्रह्मणे नमः । शुभमस्तु ।

Author :

Remarks—The gist of the theme is that Śrī Rāma made a present of Śrī Raṅga Vimāna to Vibhīṣaṇa as a token of gratitude for his valuable services. But it became stationary on account

of his inability to take it to Laṅgā overcoming the Devas' obstacles. Again it tells how Candra, Dakṣa, Śukra etc., did penance there to expiate their sins.

॥ श्रीरङ्गक्षेत्रमाहात्म्यम् (ब्रह्माण्डगतम्) ॥

495. ŚRĪRAṄGAKṢETRAMĀHĀTMYAM.

(from Brahmāṇḍapurāṇa.)

Substance—Palm leaf. Size—19″ × 1¾″. Leaves—21. 7 lines per page and 62 letters per line. Script—Malayāḷam. No. of Granthas—675.

Subject—Beginning — End — Colophon—Same as No. 494.

Author:

Remarks—The leaves are very much worn out.

॥ श्रुतिगीता (नयमञ्जरीसहिता) ॥

496. ŚRUTIGĪTĀ

with the commentary Nayamañjarī.

Substance—Palm leaf. Size—18″ × 2″. Leaves—26. 10 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—900. Complete.

Subject—Beginning—Same as No. 181.

End:

कथमिव खे इव रजांसि वयसा पाक्षिभिः सह । जाता-वेकवचनम् । अथवा ब्रह्मादयो न जानन्ति इति किं वि-चित्रं, यत् यस्मात् श्रुतयो वयमपि भगवत्स्वरूपप्रतिपा-दने प्रवृत्तताभिगमनेन अनात्मनिराकरणेनेति । अस्थूलमनणु अशब्दमस्पर्शमपूर्वमनपरमदृश्यमनात्म्यमकायमव्रणमदृश्यमग्राह्यम-न्यदेव तद्विदितादन्यत्र धर्मादन्यत्राधर्मादित्याद्याः । भवन्नि-धनाः लक्षणया भवत्स्वरूपप्रतिपादनपराः सत्यः फलन्ति प्रमाणीभवन्तीति ।

Colophon:

इति वेदस्तुतिव्याख्या नयमञ्जरी समाप्ता ।

यो यस्य देशकालाभ्यां समो न्यूनोऽपि वा भवेत् ।
स व्याप्यो व्यापकस्तस्य समो वाप्यधिकोऽपि वा ॥

व्याप्यस्य गमकत्वं च व्यापकं गम्यमिष्यते ।
प्रमाणषट्कविज्ञातो यत्रार्थो नान्यथा भवेत् ॥

अदृष्टं कल्पयेदन्यं सार्थापत्तिरुदाहृता ।

गुरुगणपतिवाणीब्रह्मविष्णुरुद्रेभ्यो नमः ।

नारायणलिखितमिदम् ।

Author—Com: Lakṣmīdhara.

Remarks—This is a commentary on Śrī Bhāgavata Śruti Gītā. The author's biography has been noted under No. 181. At the close of the commentary the text is added.

॥ श्रुतिगीता (नयमञ्जरीसहिता) ॥

497. ŚRUTIGĪTĀ
with Nayamañjari.

Substance—Palm leaf. Size—11½" × 1½". Leaves 39. 9 lines per page and 29 letters per line. Script—Malayāḷam. No. of Granthas—750. Complete.

Subject — Beginning—End — Author — Same as No. 181.

Colophon:

इति श्रीमदनन्तानन्दरघुनाथपरमहंसपरिव्राजकाचार्यपा-
दपद्मोपजीविनः श्रीमन्नृसिंहसूनोः लक्ष्मीधरस्य कृतिः
श्रुतिगीताव्याख्या नयमञ्जरी समाप्ता ।
श्रीकृष्णाय नमः ।

॥ श्रुतिगीता (नयमञ्जरीसहिता) ॥

498. ŚRUTIGĪTĀ
with Nayamañjari.

Substance—Palm leaf. Size—13½" × 1½". Leaves—39. 7 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—900. Complete.

Subject, Beginning etc.,—Same as No. 181.

Colophon:

इति वेदस्तुतिव्याख्या नयमञ्जरी समाप्ता ।

॥ श्रुतिगीता (केरळभाषाव्याख्योपेता) ॥

499. ŚRUTIGĪTĀ

with Malayāḷam commentary.

Substance—Palm leaf. Size—$5\frac{1}{2}'' \times 1\frac{1}{4}''$. Leaves—79. 8 lines per page and 22 letters per line. Script—Malayāḷam. No. of Granthas—850
Subject—Same as No. 181.

Beginning:

हरिः । श्रीगणपतये नमः ।

मू— जय जय जह्यजामजित दोषगृभीतगुणां
त्वमसि यदात्मना समवरुद्धसमस्तभगः ।
(जग ? अज) जगदोकसामखिलशक्त्यवबोधक ते
क्वचिदजयात्मना च चरतोऽनुचरेन्निगमः ॥

व्या—ഇങ്ങനെസ്തുതിയ്ക്കുന്ന ശ്രുതികൾ अजित जय जय അജി-
തനായുള്ളോവേ ഒന്നിനാലും അപരിഭൂതനായി സ്വാതി-
ശായി ആയുള്ളോവേ ജയിപ്പൂതാക ജയിപ്പൂതാക നിന്തിരു-
വടി जय जय എന്നരണ്ടുവട്ടം ചൊല്ലി ആദരാർത്ഥമായിട്ടു.
അങ്ങുണ്ടോ ജേതവ്യമായിട്ടൊരുവസ്തു. अजां जहि ജനനരഹി-
തയായി അനാദിയായിരിയ്ക്കുന്ന മായയെ കളക. കലങ്ങിക്കി-
ടക്കുന്ന ജലത്തിൽ തേററാമ്പരല കലക്കിയാൽ യാതൊരു
പ്രകാരം നീരു ചേറും വേർപെടും എന്നപോലെ

ഇവിടെ രജ്ജുസർപ്പത്തിങ്കൽ പ്രതീയമാനമായിരിയ്ക്കുന്ന-
തിനെ നിവർത്തിപ്പിക്ക. എന്തിനു മായെക്കളയേണ്ടു എന്നെ-
ടത്ത **देषगृभीतगुणां** ഗൃഭീതം എന്നെടത്തെ ഭാഷ്യം പ്രസംഗം.
गृभ्णामि ते सौभगत्वाय हस्तं എന്നെടത്തെപ്പോലെ.

End :

അങ്ങനെ ഇരിയ്ക്കുന്ന നിന്തിരുവടിയുടെ സ്വരൂപത്തെ
ബ്രഹ്മാദിദേവകളെ അല്ല നിന്തിരുവടിതാനുതന്നെ അറിയുന്നോ
ഇല്ല എന്നതേയാതൊന്നു ആകയാൽ [illegible] നിന്തി-
രുവടിയുടെ സ്വരൂപത്തെ പ്രതിപാദിക്കുന്നു. ശ്രുതികളും
ദേവാനാകുന്ന സമാപ്തി അതിനോടുകൂടി ഉരിയാടാചില-
വദനനെ കഴിച്ച മറ്റുള്ളവററെ നിഷേധിക്കുന്നുള്ളൂ
വേദങ്ങളും നിന്തിരുവടിയുടെ നിഷേധിക്കവല്ല.

मू—इत्येवं ब्रह्मणः पुत्रा आश्रुत्यात्मानुशासनम् ।
सनन्दनमथानर्चुः सिद्धा ज्ञात्वात्मनो गतिम् ॥

Colophon :

Author:

Remarks—This is composed in imitation of Śrī-dharīya. The diction is suggestive of the early origin of the Ms. and of extreme devotion. The subject is presented in elegant style.

॥ सह्याद्रिमाहात्म्यम् (स्कान्दगतम्) ॥

500. SAHYĀDRIMĀHĀTMYAM.

(from Skāndapurāṇa).

Substance—Palm leaf. Size—8″ × 1″. Leaves—170. 7—9 lines per page and 22 letters per line.

Script—Grantha. No. of Granthas—1850. Incomplete.

Subject—The magnificence of Sahyādri.

Beginning:

गणेश्वरं कल्प.........लप्रदं
फणीन्द्रगङ्गाशशिमौलिनन्दनम् ।
गुणान्यसंख्यानि(?) भवन्ति यस्य तं
प्रणम्य व(क्ष्याम्यह)मात्मचिन्तनम् ॥
अनादिमूर्तिः स्वयमेव निष्कलः
सनातनी शक्तिरनेन संयुता ।
विनोदयन्ती जननी शरीरिणां
मनोविकारात्ममताभिमानिनाम् ॥
मणिप्रभेवे(य)मनुप्रवेशिता
गुणास्त्रयोऽस्या जगतोऽस्य हेतवः ।
अणोरवस्थां प्रति सानुयायिनी
गुणात्मिकायै सततं नमो नमः ॥
यया जगत् सृष्टमिदं चराचरं
क्रिया समाप्यात्? क्षयमेव कालतः ।
शयानमब्धौ सुखिनं शिशुं जग-
ज्जयन्तमाद्यापि च संस्थिताक्षरा ॥
सा योगनिद्रास्य हरेर्जगत्पते

End:

राक्षसान् कोटिगुणितान् दुर्धर्षान् युधि दुर्मदान्
समाहूय सुसन्नद्धान् प्रोवाचेदं सुदारुण ॥

इन्द्रश्रियमपाक्रष्टुं यतेऽहमधुना भटाः ।
नानाशस्त्रप्रहरणा यूयं युद्धविशारदाः ॥
सन्नद्धाश्च मया सार्धं समागच्छत दंशिताः
इत्याज्ञप्यासुरपतिर्व्यालो भैरवशासनः ॥
तैः सर्वैः सहित.

Colophon :

इति सह्योत्तरखण्डेऽष्टविंशोऽध्यायः ।

Author :

Remarks—The leaves at the beginning and end are much rotten. The portion capable of being deciphered is quoted above.

॥ स्कान्दपुराणम् ॥

501. SKĀNDAPURĀṆAM.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—57. 8 lines per page and 38 letters per line. Script—Malayāḷam. No. of Granthas—1000. Incomplete.

Subject—Exposition of the greatness of Śiva.

Beginning :

हरिः.... ..... ये नमः। अविघ्नमस्तु ।

ऋषय ऊचुः—

आख्यातं भवता सूत विष्णोर्माहात्म्यमुत्तमम् ।
सर्वाघौघहरं पुण्यं समासेन श्रुतं च नः ॥

इदानीं श्रोतुमिच्छामो माहात्म्यं त्रिपुरद्विषः ।
तद्भक्तानां च माहात्म्यं निःशेषाघहरं परम् ॥
तन्मन्त्राणां तद्व्रतानां तत्पूजानां च तद्विधिम् ।
तत्कथायाश्च तद्भक्तेः प्रभावमनुवर्णय ॥

सूतः—

एतावदेव मर्त्यानां परं श्रेयः सनातनम् ।
यदीश्वरकथायां वो जाता भक्तिरहैतुकी ।
अतस्तद्भक्तिलेशस्य माहात्म्यं वर्ण्यते मया ॥
आयुः कल्पायुषां नालं वक्तुं विस्तरतः सकृत् ।

End :

इत्युक्त्वान्तर्हिता देवी तेऽपि राजपुरोगमाः ।
गत्वा स्वं स्वं गृहं सर्वे चक्रुस्तच्छासने स्थिताः ॥
सोऽपि सारस्वतो विप्रः पुत्रं सूर्यशतोपमम् ।
लेभे देव्याः प्रसादेन नचिरादेव कालतः ।
तां च सामवतीं कन्यां ददौ तस्मै सुमेधसे ।
तौ दम्पती चिरं कालं बुभुजाते परं सुखम् ॥
इत्येष शिवभक्तायाः सीमन्तिन्या नृपस्त्रियः ।
प्रभावः कथितः शम्भोर्माहात्म्यमपि वर्णितम् ॥
भूयोऽपि शिवभक्तानां माहात्म्यं विस्मयावहम् ।
समासाद्वर्णयिष्यामि श्रोतॄणामघनाशनम् ॥

Colophon :

इति ब्रह्मोत्तरखण्डे एकत्रिंशोऽध्यायः । हरिः ।

Remarks—The Ms. is damaged. No order has been maintained with regard to the numbering of leaves.

॥ स्कान्दपुराणम् ॥

502. SKĀNDAPURĀṆAM.

Substance—Palm leaf. Size—9½" × 1½". Leaves—76. 9—10 lines per page and 34 letters per line. Script—Malayāḷam. No. of Granthas—1200. Incomplete.

Subject—Same as No. 501.

Beginning:

अथान्यदपि वक्ष्यामि माहात्म्यं त्रिपुरद्विषः ।
... ... येनाशु छिद्यन्ते सर्वसंशयाः ॥
... तः परतरं किञ्चिन्नास्ति पापविशोधनम् ।
सर्वान .. .... श्रीमन् सर्वकामार्थसाधनम् ॥
दीर्घायुर्विजयारोग्यभुक्तिमुक्तिफलप्रदम् ।
यदनन्येन भावेन महेशाराधनं परम् ॥
आर्द्राणामथ शुष्काणामल्पानां महतामपि ।
एतदेव विनिर्दिष्टं सर्वाघानां विनाशनम् ॥
.... ह्यामुनिविनिर्दिष्टैः प्रायश्चित्तैरथोत्तमैः ।
सर्वकालेष्वभेद्यानामघानां क्षामकारणम् ॥
इदमेव परं श्रेयः सर्वशास्त्रविनिश्चितम् ।
यद्भक्त्या परमेशस्य पूजनं परमोदयम् ॥

End:

आदाय सपरिवारो वज्रबाहुः पुरं ययौ ।
... ... भद्रायुर्निजमन्दिरम् ॥
संप्राप्य परमानन्दं चक्रे सर्वपुरौकसाम् ।
कालेन दिवमारूढे पितरि प्राप्तयौवनः ॥

भद्रायुः पृथिवीं सर्वां शशासाद्भुतशासनः ।
मागधेशं हेमरथं मोचयामास बन्धनात् ॥
विधाय परमां (मै)त्रीं ब्रह्मर्षीणां च सन्निधौ ।

सूत उवाच--

इत्थं त्रिलोकमहितां शिवयोगिपूजां
कृत्वा पुरातनभवेऽपि स राजसूनुः ।
निस्तीर्य दुस्तरविपद्गणमाप्तराज्य-
श्चन्द्राङ्गदस्य सुतया सह साधु रेमे ॥

Colophon:

इति ब्रह्मोत्तरखण्डे षट्त्रिंशोऽध्यायः । श्रीगुरुभ्यो नमः ।

Remarks—The Ms. is old and damaged here and there.

॥ स्कान्दपुराणम् ॥

503. SKĀNDAPURĀṆAM.

Substance—Palm leaf. Size—$15\frac{1}{8}'' \times 2\frac{1}{8}''$. Leaves—21. 10—11 lines per page and 46—50 letters per line. Script—Malayāḷam. No. of Granthas—214. Incomplete.

Subject—Beginning—Same as No. 501.

End:

इत्येतत् कथितं पुण्यमाख्यानं दुरितापहम् ।
शम्भोर्गुणानुकथनं विचित्रं पापनाशनम् ॥
य इदं कीर्तयेन्मर्त्यः शृणुयाद् वा समाहितः ।
भुक्त्वेह विपुलान् भोगान् स याति परमां गतिम् ॥

सूतः—

यूयं बत महाभागाः कृतार्था मुनिसत्तमाः ।
ये पिबन्ति सदा शम्भोः कथामृतरसायनम् ॥
ते जन्मभाजः खलु जीवलोके
येषां मनो ध्यायति विश्वनाथम् ।
वाणी गुणान् स्तौति कथां शृणोति
श्रोत्रद्वयं ते भवमुत्तरन्ति ॥
विविधगुणविभेदैर्नित्यमस्पष्टरूपं
जगति हि बहिरन्तर्भासमानं महिम्ना ।
स्वमनसि विहरन्तं वाङ्मनोवृत्तिदूरं
परमशिवमनन्तानन्दमाद्यं प्रपद्ये ॥
यः पठेच्छृणुयाद्वापि पुराणं शैवमुत्तमम् ।
विधूय सर्वकर्माणि शिवलोके महीयते ॥

Colophon :

इति ब्रह्मोत्तरखण्डे पुराणश्रवणानुवर्णनं नाम चतुश्चत्वारिंशोऽध्यायः । ब्रह्मोत्तरखण्डं समाप्तम् ।

Remarks—This Ms. ranges from the 23rd chapter to the 44th, thus bringing Brahmottara Khaṇḍa to a close. The script is legible.

॥ स्कान्दपुराणम् ॥

504. SKĀNDAPURĀṆAM.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1\frac{5}{8}''$. Leaves—168. 7—9 lines per page and 24 letters per

line. Script—Malayalam. No. of Granthas —2000.

Subject—Beginning — End—Colophon : Same as No. 503.

Remarks—Śivapañcākṣara, Ṣaḍākṣara, Śivarātrimāhātmya etc. and the effects of Japam and Vratam are described here. In the beginning of the Ms. the following verse is added:—

" गजाननं भूतगणाधिसेवितं
कपित्थजम्बूफलसारभक्षितम् ।
उमासुतं शोकविनाशकारणं
नमामि विघ्नेश्वरपादपङ्कजम् ॥"

॥ स्कान्दपुराणम् ॥

505. SKĀNDAPURĀṆAM.

Substance—Palm leaf. Size—10″×2″. Leaves—27. 9—11 lines per page and 30—40 letters per line. Script—Malayalam. No. of Granthas—450.

Subject—Same as No. 501.

Beginning :

आक्रान्तसप्तपातालकुहरोऽथ महाबलः ।
प्राप्ते कलियुगे घोरे मृदुतामुपयास्यति ॥
पश्चिमाम्बुधितीरस्थं गोकर्णं क्षेत्रमुत्तमम् ।
ब्रह्महत्यादिपापानि हरतीति किमद्भुतम् ॥

ये मातृपितृहन्तारो ये च भूतद्रुहः शठाः ।
ये सर्वगुणहीनाश्च परदाररताश्च ये ॥
ये दुर्वृत्ता दुराचारा दुश्शीलाः कृपणाश्च ये ।
लुब्धाः शुद्राश्चला मूढाः स्तेनाश्चैवाभिकामिनः ॥
ते सर्वे प्राप्य गोकर्णं यो वा को वापि मानवः ।
प्रविश्य पूजयेदीशं स गच्छेत् परमं पदम् ॥
रवीन्दुसौम्यवारेषु यदा दर्शो भविष्यति ।
तदा जलनिधौ स्नानं दानं च पितृतर्पणम् ॥
शिवपूजा तपो होमो व्रतचर्या शिवार्चनम् ।
यत्किञ्चिद्वा कृतं कर्म तदनन्तफलप्रदम् ॥
व्यतीपातादियोगेषु रविसंक्रमणेषु च ।
महाप्रदोषवेलासु शिवपूजा विमुक्तिदा ॥
अथैकां सम्प्रवक्ष्यामि तिथिं पार्थिव मुक्तिदाम् ।
यस्यां किल महाव्याधो लेभे शिवपदं परम् ॥

End—Colophon—Same as No. 501.

Remarks—The Ms. is of recent origin. The first fifteen leaves beginning with No. 10 and the next group of leaves numbered 1—12 constitute this work. Of these the 12th and 15th leaves are written only on one side. After the colophon the following is seen:—

"विचित्रं शिवनिर्माणं विचित्रं शिवचेष्टितम् ।
विचित्रं शिवमाहात्म्यं"

॥ स्कान्दपुराणम् ॥

506. SKĀNDAPURĀṆAM.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—110. 8 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—2400.

Subject—Same as No. 501.

Beginning :

हरिः । श्रीगणपतये नमः । शुभमस्तु ।

ओङ्कारनिलयं देवं गजवक्त्रं चतुर्भुजम् ।
पिचण्डिलमहं वन्दे सर्वविघ्नोपशान्तये ॥
पुरा काञ्च्यां चतुर्वक्त्रस्तताप परमं तपः ।
स्रष्टुकामः प्रजाः सर्वाः कृपया परमेशितुः ॥
तस्मिन् महेशचरणपरिचर्यापरायणे ।
मुनयः कतिचित् पुण्ये स्थित्वा गार्हस्थ्य उत्तमे ॥
वैखानसाश्रमे तप्तुं तपः संयतमानसाः ।

End :

वृत्तान्तमखिलं तेषां विनयेन बृहस्पतिः ॥
असुराणां सुरेन्द्रार्तिहराय गुरवे नमः ।
गुहायाकथयत् सर्वं स गुहास्थाय योगिनाम् ॥

सूतः—

अयं तु सम्भवाख्यस्तु काण्डो वेदार्थसम्मितः ।
कथितः श्रेयसामेषां निदानं विदुषां सताम् ॥

Colophon :

इत्यादिमहापुराणे स्कान्दे शङ्करसंहितायां शिवरहस्यखण्ड-सम्भवकाण्डे पञ्चाशोऽध्यायः ।

शिवाय नमः । सम्भवकाण्डं समाप्तम् । कुमाराय नमः ।

ആയിരത്തി അറുപത്തിനാലാമാണ്ടു കർക്കടകമാസം ഇരുപ
ത്തിരണ്ടാം തീയതി ഗ്രന്ഥം സൂക്ഷിറ്റു കരമന രാമശാസ്ത്രി
കൾ എഴുതിത്തീർത്തു.

श्रीकृष्णाय नमः । शुभमस्तु ।

Remarks—This Ms. contains the Sambhavakāṇḍa of Śaṅkara Samhitā included in the Skānda-purāṇa. The origin of the world is discussed here exhaustively, refuting the other views and affirming its illusiveness. The Advaita Vedāntins may find it extremely interesting.

॥ स्कान्दपुराणम् ॥

507. SKĀNDAPURĀṆAM.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 2''$. Leaves—213. 10—12 lines per page and 36 letters per line. Script—Grantha. No. of Granthas—8200.

Subject—Same as No. 501.

Beginning :

श्रीगुरुभ्यो नमः ।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

शान्तं शारदचन्द्रकोटिसदृशं सर्वेश्वरं शङ्करं
शम्भुं सर्वजगच्छरण्यचरणाम्भोजं प्रणम्याधुना ।
अम्बामिन्दुनिभाननामवनतां शेषार्धदां पार्वतीं
पुण्यां शङ्करसंहितां गुहकथां वक्ष्ये शृणुध्वं जनाः ॥

नमस्कृत्वा पूर्वं नगपतिसुतापूर्वतनयं
ततः स्कन्दं वन्दे तदनुजमजाद्यैरपि नुतम् ।
पुरस्तान्नन्दीशं पुरत्रिजयिनो द्वारनिलयं
प्रणम्य प्रारप्स्ये प्रथितशिवगाथामवहितः ॥
या देवी स्तूयते नित्यमखिलैर्वेदपारगैः ।
सा मे भवतु जिह्वाग्रे ब्रह्मरूपा सरस्वती ॥
एकेन वा केन दुरात्मना वा संसारसर्पार्दितचेतसापि ।
महेश्वरापारकथासुधा वो दैवादवाप्ता यदि सोऽपि मुक्तः ।
गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ॥
निधये सर्वविद्यानां दक्षिणामूर्तये नमः ॥
आनन्दसागरसमाकुलशैलकन्या-
वक्षोजकुम्भयुगलीपरिरम्भणेन ।
रोमाञ्चकञ्चुकपरिष्कृतगात्रयष्टिं
देवं भजामि मधुरापुरनाथमीशम् ॥
कनककुण्डलमण्डितषण्मुखं
वनजराजिविराजितलोचनम् ।
निशितशस्त्रशरासनधारिणं
शरवणोद्भवमीशसुतं भजे ॥
सिन्दूरारुणमिन्दुकान्तिवदनं केयूरहारादिभि-
र्दिव्यैराभरणैर्विभूषिततनुं सर्वस्य सौख्यप्रदम् ।
अम्भोजाभयशक्तिकुक्कुटधरं दिव्याङ्गरागोज्ज्वलं
सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणाशोद्य(से?तम्)
आदावीशललाटनेत्रजननं वासिष्ठसंरक्षणं
क्रमरावेशमनिवेशनं स्वथ क्षितिस्तारार्थवादं गुरोः ।

क्रौञ्चाख्यस्य च तारकस्य मरणं पाथोधिसन्धारणं
सिंहास्यासुरशूरदैत्यमथनं स्कान्दं चरित्रं भजे ॥

श्रीसुब्रह्मण्याय नमः । गुरवे नमः ।

श्रीसुब्रह्मण्याय नमः ।

वल्लभासहितं देवं महादेवसुतं विभुम् ।
महागणपतिं वन्दे महाविद्यार्थसिद्धये ॥
मयूरवाहनारूढं महासेनापतिं गुहम् ।
महाज्ञानप्रदं वन्दे वल्लीनायकमीश्वरम् ॥
अथ वीक्ष्य गुहो देवान् जयन्तप्रमुखानिह ।
बन्धितानानयेत्याह वीरबाहुं तदासुरैः ॥
स तथेति विनिर्गत्य गुहाज्ञां शिरसा वहन् ।
जयन्तादीनवाप्यायं वन्दितस्तैर्महाबलः ॥
प्रक्रान्तमुक्त्वा तान् शीघ्रादानयित्वा समागतः ।
प्रणम्य ते गुहं दृष्ट्वा स्तुतीश्चक्रुस्तरां तदा ॥

End :

कल्याणे शाम्भवे स्कन्दजन्मन्यस्य जये द्विपाम् ।
देवसेनाविवाहे च समाप्तौ चरितस्य च ॥
गौरीशंकरयोः प्रीत्यै दम्पत्योः क्षौमयोर्युगम् ।
वाससी अपि वा दद्यात् पुरा प्रोक्तफलाप्तये ॥
पुत्रमित्रकलत्राद्यैर्भुक्त्वा भोगाननेकधा ।
इह लोके परत्रापि स्कन्दसायुज्यमाप्नुयात् ॥
तस्मादहरहर्नित्यं श्रोतव्यमभिवृद्धये ।
आदावादिमकाण्डमिष्टफलदं त्वष्टोत्तरं यः शतं
गौरीशंकरषण्मुखाङ्घ्रिकमलं ध्यात्वा पठेद् भक्तिभाक् ।

रुद्राक्षाभरणः पठेद्यदि ततः षट्काण्डमध्यात्मजा-
नायुःकीर्तिमरोगतां रिपुजयं श्रियां च मुक्तिं लभेत् ॥

सूतात्मजस्य वचसेति मुनीन्द्रवर्याः
मन्तोपवाधिलहरीपरिमग्नचित्ताः ।
संभाव्य सूतमपि गीर्भिरुपार्यनैश्च
तं सत्रयागमपि शंकरमाद्द्विजाग्याः ॥

Colophon :

इति श्रीस्कान्दे महापुराणे शंकरसंहितायां शिवरहस्यखण्डे उपदेशकाण्डे चतुर्नवतितमोऽध्यायः ।

उपदेशकाण्डं समाप्तम् ।

Remarks—The Ms. is old. It contains three Kāṇḍas, Deva, Dakṣa and Upadeśa, of the Skānda-purāṇa.

॥ स्कान्दपुराणम् ॥

508. SKĀNDAPURĀṆAM.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—123. 10 lines per page and 52 letters per line. Script—Grantha. No. of Granthas—4000.

Subject—Same as No. 501.

Colophon :

इति श्रीस्कान्दे महापुराणे शङ्करसंहितायां शिवरहस्यखण्डे युद्धकाण्डं शूरपद्मसंहारं नाम पञ्चत्रिंशोऽध्यायः । युद्धकाण्डं समाप्तम् ॥

Remarks—This Ms. opens with the glorification of the prowess of the Devas and ends with the annihilation of Śūrapadma. It comprises four Kāṇḍas, Āsura, Vīra, Māhendra and Yuddha of the Skāndapurāṇa.

॥ स्कान्दपुराणम् ॥

509. SKĀNDAPURĀṆAM.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 2''$. Leaves—110. 10 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—2750. Incomplete.

Subject—Same as No. 501.

Colophon:

इति सूतसंहितायां यज्ञवैभवखण्डे सप्तदशोऽध्यायः ।

Remarks—This Ms. comprises Śivamāhātmyakhaṇḍa, Jñānayogakhaṇḍa and 17 chapters in Yajñavaibhavakhaṇḍa. The opening verses of the 18th chapter are also included in the Ms. The first thirty leaves are mouldered.



॥ स्कान्दपुराणम् ॥

510. SKĀNDAPURĀṆAM.

Substance—Palm leaf. Size—$16\frac{1}{2}'' \times \frac{1}{4}''$. Leaves—223. 8 lines per page and 60 letters per line.

Script—Tamil Grantha. No. of Granthas—6690. Incomplete.

Subject—Same as No. 501.

Colophon :

इत्यादिमहापुराणे श्रीस्कान्दे सूतसंहितायां यज्ञवैभवखण्डे उपरिभागे सूतसंहितासु उपनिषत्सु अष्टमोऽध्यायः ।
हरसूतगीता समाप्ता । हरिः ॐ । ... ...

Remarks—This Ms. covers the portion extending from the Yajñavaibhavakhaṇḍa of Sūtasaṃhitā upto the end of the Sūtagītā. It is old and damaged.

॥ स्कान्दपुराणम् ॥

511. SKĀNDAPURĀṆAM.

Substance—Palm leaf. Size—$19\frac{1}{2}'' \times 2''$. Leaves—154. 8 lines per page and 68 letters per line. Script—Malayāḷam. No. of Granthas—5236. Incomplete.

Subject—Same as No. 501.

Colophon :

इति श्रीमत्स्कान्दपुराणे सूतसंहितायां यज्ञवैभवखण्डे पूर्वभागे सप्तचत्वारिंशोऽध्यायः । पूर्वभागः समाप्तः ।......

Remarks—The Ms. comprises the Śivamāhātmyakhaṇḍa, Jñānayogakhaṇḍa, Muktikhaṇḍa, and the first half of Yajñavaibhavakhaṇḍa. It is very old and crumbly.

॥ स्कान्दपुराणम् ॥

512. SKĀNDAPURĀṆAM.

Substance—Palm leaf. Size—9½″ × 1½″. Leaves—42. 7 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—735.

Colophon :

इति श्रीमत्स्कान्दे पुराणे यज्ञवैभवखण्डे सूतसंहितायां ब्रह्मगीतासूपनिषत्सु द्वादशोऽध्यायः । ब्रह्मगीता समाप्ता । शिवमस्तु । ओम् ... ... । गेंग (?) लिखितं पुस्तकम् । शिव शिव नमः शिवाय ।

Remarks—The Ms. comprises the latter half of Yajñavaibhavakhaṇḍa in Sūtasaṃhitā, ranging from the 55th verse of the 1st chapter of Brahmagītā to the end of the 12th chapter. Several leaves are missing here and there. Only 42 leaves are extant out of 67. The Ms. is old.

॥ स्कान्दपुराणम् ॥

513. SKĀNDAPURĀṆAM.

Substance—Palm leaf. Size—14½″ × 1¾″. Leaves—220. 8—10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—5940.

Colophon :

इति श्रीमत्स्कान्दे पुराणे सूतसंहितायां यज्ञवैभवखण्डे उपरिभागे सूतगीतासूपनिषत्सु अष्टमोऽध्यायः । शुभमस्तु । सूतसंहिता समाप्ता ।

Remarks—This portion culled from Skāndapurāṇa embodies Śivamāhātmyakhaṇḍa, Jñānayogakhaṇḍa, Muktikhaṇḍa and Yajñavaibhavakhaṇḍa. Sūtasamhitā has been printed at Madras with commentary.

॥ स्कान्दपुराणम् ॥

514. SKĀNDAPURĀṆAM.

Substance—Palm leaf. Size—$14\frac{3}{4}'' \times 2''$. Leaves—37. 8—10 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—10125.

Colophon :

इति स्कान्दे पुराणे सौरसंहितायां षोडशोऽध्यायः । नमः शिवाय ।

Remarks—This Ms. comprises the Sourasamhitā only. It is much worn away.

॥ स्कान्दपुराणम् ॥

515. SKĀNDAPURĀṆAM.

Substance—Palm leaf. Size—$21\frac{1}{2}'' \times 2''$. Leaves—

68. 10 lines per page and 50 letters per line. Script—Grantha. No. of Granthas—2380. Subject—Glorification of Benares.

Beginning:

व्यास उवाच—

कदाचिन्नारदः श्रीमान् स्नात्वा श्रीनर्मदाम्भसि ।
श्रीमदोङ्कारमभ्यर्च्य सर्वदं सर्वदेहिनाम् ॥
व्रजन् विलोकयाञ्चक्रे पुरो विन्ध्यं धराधरम् ।
संसारतापसंहा(रि)रेवावारिपरिष्कृतम् ॥
द्वैरूप्येणापि कुर्वन्तं स्थावरेण चरेण च ।
साभिख्येन यथार्थाख्यामुर्वैर्वसुमतीमिमाम् ॥
रसालयं रसाढ्यैस्तैरशोकैः शोकहारिणम् ।
तालैस्तमालैर्हिन्तालैः सालैः सर्वत्रशालिनम् ॥
खपुरैः खपुराकारं श्रीफलं श्रीफलैः किल ।
गुरुश्रियं च गुरुभिः कपिपिङ्गं कपित्थकैः ॥
नवश्रियं कुचाकारैर्वकुलैश्च मनोहरम् ।
सुधाफलसमारम्भिरम्भाभिः परिभासितम् ॥

End:

स्वर्लोकादपि रम्याणि पातालादीनि नारदः ।
प्राह स्वर्गसदां मध्ये पातालेभ्यः समा(य?ग)तः ॥
आह्लादकारिणः शुभ्रा मणयो यत्र सुप्रभाः ।
नागाङ्गाभरणप्रोताः पातालं केन तत्समम् ॥
दैत्यदानवकन्याभिरितश्चेतश्च शोभिते ।
पाताले कस्य न प्रीतिर्विमुक्तस्यापि जायते ॥

दिवाकररश्मयस्तत्र प्रभां तन्वन्ति नातपम् ।
शशिनश्च न शीताय निशि द्योताय केवलम् ॥
यत्र न ज्ञायते कालो गतोऽपि दनुजादिभिः ।
वनानि नद्यो रम्याणि गन्धाढ्यमनुलेपनम् ॥

Colophon :

इति काशीखण्डे ध्रुवलोकवर्णनं नाम एकविंशोऽध्यायः ॥

Remarks—The Ms. comprises chapters 1—21 of Kāśīkhaṇḍa. The Aṇḍakośa, the fourteen worlds and other kindred subjects are described here in Kāvya style.

॥ स्कान्दपुराणम् ॥

516. SKĀNDAPURĀṆAM.

Substance—Palm leaf. Size—21″ × 2″. Leaves—190. 10 lines per page and 24 letters per line. Script—Grantha. No. of Granthas—7660. Incomplete.

Subject—Same as No. 515.

Colophon :

इति स्कान्दपुराणे काशीखण्डे शततमोऽध्यायः ।

கரு௲அமெக ஹெு குரோதந நாமஸம்வத்ஸரம் பங்குனிமீ 22 உ காசிகண்டம் ஆக்தார் ஸ்ரீநிவாஸன்ஸ்வஹஸ் தலிகிதம் . . . .

Remarks—The first half of this Ms. contains chapters 41—50 and the latter 51—100 of Kāśīkhāṇḍa. The Ms. is very old.

॥ स्कान्दपुराणम् ॥

517. SKĀNDAPURĀṆAM.

Substance—Palm leaf. Size—21½″ × 1¾″. Leaves—182. 8 lines per page and 48 letters per line. Script—Grantha. No. of Granthas—4500. Incomplete.

Subject—Same as No. 515.

Colophon:

इति श्रीकाशीखण्डे चत्वारिंशोऽध्यायः ।

शिवाय नमः । शुभमस्तु । पूर्वखण्डः समाप्तः ।

குப்பான அய்யங்கார் எழுதின ஓலை நமபன.

Remarks—The Ms. is old.

॥ स्कान्दपुराणम् ॥

518. SKĀNDAPURĀṆAM.

Substance—Palm leaf. Size—19″ × 1½″. Leaves—124. 7—10 lines per page and 75 letters per line. Script—Grantha. No. of Granthas—4900. Incomplete.

Subject—Same as No. 515.

Colophon:

इति काशीखण्डे गङ्गासहस्रनामं नाम एकोनत्रिंशोऽध्यायः ।

Remarks—This Ms. comprises 30 chapters of Kāśikhāṇḍa. One leaf is missing at the beginning. The Ms. is of remote origin and most of the leaves in the middle are broken and worm-eaten.

॥ स्कान्दपुराणम् ॥

519. SKĀNDAPURĀṆAM.

Substance—Palm leaf. Size—19¾″ × 1¼″. Leaves—266. 5—9 lines per page and 36—56 letters per line. Script—Grantha. No. of Granthas—5000.

Subject—Same as No. 515.

Colophon :

इति श्रीस्कान्दे महापुराणे काशिखण्डे .... त्याख्यानं गरुडेशाख्यानं नाम पश्चशततमोऽध्यायः । .... शाश्वतानन्दलिखितं शङ्करनारायण .... बोस्तकम् ।

Remarks—The Ms. is ancient and worm-eaten.



॥ स्कान्दपुराणम् (तात्पर्यदीपिकोपेतम्) ॥

520. SKĀNDAPURĀṆAM with Tātparyadīpikā.

Substance—Palm leaf. Size—21¾″ × 1¾″. Leaves—140. 5—7 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—50.

Subject—Exposition of Sūtasamhitā dealing with Sāṅkhya and other schools of philosophy.

Beginning :

-प्रसिद्धं तथाच कारणभूतं चैतन्यमपेक्ष्य तत्कार्यंचे(त्य?तन्यं) वियदादिभूतजातमसत्यम् । तच्च घटकुड्यादिलक्षणस्वकार्यस्य कारणभूतं सत्तदपेक्षया सत्यम् । कुम्भकुड्यादयोऽपि स्वकारणभूतवियदादिमहाभूतापेक्षया असत्याः । तेऽपि सत्येव प्रमातरि बाध्यमानं शुक्तिरजतादिकमपेक्ष्य सत्याः । सति प्रमातर्यबाध्यमानत्वात् ।

End :

प्रणवात्मकस्य कन्दस्य तज्जनने सामर्थ्यम् । अथर्वणां द्रष्टा यो वेदः स एव द्रुमः । ऋग्यजुःसामाख्यास्त्रयो वेदाः स्कन्धशाखास्तस्य वृक्षस्य । स्मृतिपुराणादीनि षडङ्गानि शाखावरणं रक्षणाय बहिरावरणं तास्तस्यैवावरणस्य संरक्षकाः परशिवस्वरूपं यद् ज्ञानं तदेव तस्य वृक्षस्य पुष्पम् । तत्प्राप्या मुक्तिरेव फलम् । एवमथर्ववेदस्य प्राधान्यात् तदुक्तप्रकारेण शिवस्वरूपमेतद्ध्येयमिति निगमयति—बहुनोक्तेनेति

Colophon :

सूतगीतायां षष्ठोऽध्यायः ।

Author—Com: Śrī Vidyāraṇya.

Remarks—The Ms. opens with the end of the 2nd chapter. The commentary is extremely good. The commentator elucidates the doctrines of Sāṅkhya philosophy with citations from the text wherever necessary. This work has been edited and published at Madras by Messrs. S. Rāmacandra Śāstrī and K. Kuppuswāmi Śāstri.

॥ स्यानन्दूरपुराणसमुच्चयः ॥

521. SYĀNANDŪRAPURĀṆASAMUCCAYA.

Substance—Palm leaf. Size—10″ × 2″. Leaves—55. 10 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—1375.

Subject—Description of the greatness of Syānandūra (Trivandrum) and the temple consecrated therein.

Beginning:

हरिः । श्रीगणपतये नमः ।

विघ्नाधिराजं विघ्नानां निराकरणकारणम् ।
पार्वतीनन्दनं वन्दे गीर्वाणगणवन्दितम् ॥

कुन्दमन्दारकर्पूरशुभ्रा चन्द्रकलाङ्किता ।
वैशारद्यं विधत्तां मे वाचां वागधिदेवता ॥
आविर्भूताय हरये सत्यवत्यां पराशरात् ।
व्यासाय वेदसिद्धान्तगायकाय नमो नमः ॥
स्वनाभिसंभवाम्भोजसमुद्भूतस्वयंभुवे ।
नमो नलिननाभाय नागपर्यङ्कशायिने ॥
पाद्मब्राह्मण्यवाराहपुराणोक्तं सविस्तरम् ।
अर्थं समुच्चिकीर्षामि स्यानन्दूरपुराश्रितम् ॥
सन्तु सन्तोषसंपन्नाः सन्तः क्षान्तिं प्रयास्यत ।
अन्यथाकरणे दोषो न हि मेऽस्ति समुच्चये ॥
किन्त्वस्ति च गुणः श्रोतुर्वाक्यार्थप्रतिपत्तिषु ।
अयत्नतः पुराणानां भविष्यत्युपसंहृतौ ॥

महीमेकार्णवे मग्नामुद्धृत्य धरणीधरः ।
वितत्य स्थापयित्वा च घनीकृत्य जलोपरि ॥

End:

इति प्राह पुरा ब्रह्मा पुत्रान् स्वान् योगिनः प्रति ।
यतता विस्तृतं कर्तुं तन्मया विस्तृतं पुनः ॥
पद्मयोनिवचोरूपः कृतश्चात्र समुच्चयः ।
श्रीमत्पद्मपुराणोत्थकथनेनैव विस्तरात् ॥
श्रीवराहपुराणस्थो वायुप्रोक्तास्थितस्तथा ।
अर्थ आकृष्य विहितो नानाशास्त्रानुसारतः ॥
श्रीमत्पद्मपुराणाख्यसंहितायां हिताय तु ।
भक्तानां पद्मनाभस्य चरणाम्बुरुहद्वये ॥

Colophon :

इति स्यानन्दूरपुराणसमुच्चये क्षेत्रसामर्थ्यैकदेशप्रशंसनोपसंहारो नाम पञ्चविंशोऽध्यायः । स्यानन्दूरपुराणं समाप्तम् । हरिः श्रीपद्मनाभाय नमस्तेऽस्तु । श्रीकेशवाय नमः । गोपीवल्लभाय नमः ।

൧൩൨൦ ആണ്ടു തുലാമാസം ഏഴാംതീയതി സപ്തമിയും ശുക്രവാരവും ആർദ്രാനക്ഷത്രവും പെററ നല്ല ദിവസത്തിലെ എഴുതി മുകിച്ചേൻ. രവിവർമ്മ നരാധിപനുക്ക കരിശേഖരമംഗലത്തു കൃഷ്ണദീക്ഷിതർ പൌത്രൻ അനന്തകൃഷ്ണൻ പുത്രൻ രാമനെഴുത്തു്.

श्रीगुरवे नमः । रामरामरामराम शिवशिवशिवशिव

शुभमस्तु ।

॥ स्यानन्दूरपुराणसमुच्चयः ॥

522. SYĀNANDŪRAPURĀṆASAMUCCAYA.

Substance—Palm leaf. Size—$9\frac{3}{4}'' \times 1\frac{3}{4}''$. Leaves—87. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—1375. Complete.

Subject — Beginning—End—Colophon. Same as No. 521.

॥ स्यानन्दूरपुराणसमुच्चयः ॥

523. SYĀNANDŪRAPURĀṆASAMUCCAYA.

Substance—Palm leaf. Size—$8\frac{1}{4}'' \times 1\frac{1}{2}''$. Leaves—81. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—1375. Complete.

Subject — Beginning—End—Author — Colophon—Same as No. 521.

॥ हरिभक्तिसुधोदयम् (नारदीयगतम्) ॥

524. HARIBHAKTISUDHODAYAM.

Substance—Palm leaf. Size—$18\frac{3}{4}'' \times 2''$. Leaves

—38. 10—11 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—2000. Complete.

Subject—A panegyric of Viṣṇu.

Beginning:

हरिः। श्रीगणपतये नमः। अविघ्नमस्तु।

एकं यज्जनयत्यनेकतनुभृत्तस्यान्यजस्रं मिथो

भिन्नाकारगुणानि कैश्चिदपि वा नोप्तं न सिक्तं जलैः।

कालेनापि न जीर्यते हुतभुजा नो दह्यते क्लिद्यते

नाद्भिस्तत्सकलस्य बीजमसकृद्ब्रह्माभिधं धीमहि॥

यत्पादाब्जयुगं सुगन्धितुलसीलोभाद्भ्रमन्तोऽप्यहो

योगिप्राथ्यंगतिं प्रयान्ति मधुपा यद्भक्तिहीना अपि।

अब्भक्षाः पवनाशिनोऽपि मुनयः संसारचक्रे भृशं

भ्राम्यन्त्येव गतागतैरिह मुहुस्तस्मै नमो विष्णवे॥

श्रीमत्पद्मजतार्क्ष्यफल्गुनशुकप्रह्लादभीष्मोद्धव-

व्यासाक्रूरपराशरध्रुवमुखान् वन्दे मुकुन्दप्रियान्।

यैस्तीर्थैरिव पावनं त्रिभुवनं रत्नैरिवालङ्कृतं

सद्वैद्यैरिव रक्षितं सुखकरैश्चन्द्रैरिवाप्यायितम्॥

अस्ति त्रैलोक्यविख्यातं वनं नैमिशसंज्ञितम्।

पवित्रं गोमतीतीरे नित्यं पुष्पफलर्द्धिमत्॥

स्वलङ्कृता महात्मानः श्रीभागवतलक्षणैः।

ऋषयो यत्र सत्रेण चिरं हरिमपूजयन्॥

End:

सत्सङ्गमादाशु हरौ पुंसो भक्तिः प्रजायते।

हरिभक्तौ प्रजातायामुदेति ज्ञानमुत्तरम् ।
ज्ञानवान् पुरुषोऽभ्येति तद्विष्णोः परमं पदम् ॥
आ ब्रह्मलोकाल्लोकाः स्युः पुनरावर्तिनो द्विजाः ।
न यत्र गत्वा मुनयो निवर्तन्ते सदा त्विह ।
स इत्थं विष्णुगाथाभिर्नन्दयित्वा मुनीश्वरः ॥
शौनकादीन्नैमिशीयान् ब्रह्मसूनुस्तिरोदधे ।
य इदं शृणुयाद्भक्त्या हरिभक्तिसुधोदयम् ॥
कथयेद्वा स पापौघैर्मुक्तो मोक्षं च विन्दति ।

Colophon:

इति श्रीनारदीयपुराणे हरिभक्तिसुधोदये भक्तियोगो नाम विंशोऽध्यायः ।........................

Author:

Remarks—The colophon indicates that this work has been included in Nāradīyapurāṇa.



॥ हरिभक्तिसुधोदयम् (नारदीयगतम्) ॥

525. HARIBHAKTISUDHODAYAM.

(from Nāradīyapurāṇa).

Substance—Palm leaf. Size—13″ × 1½″. Leaves—89. 8 lines per page and 46 letters per line. Script—Malayāḷam. No. of Granthas—2000. Complete.

Subject—Beginning—End—Colophon—Remarks—Same as No. 524.

॥ हरिभक्तिसुधोदयम् (नारदीयगतम्) ॥

526. HARIBHAKTISUDHODAYAM.

(from Nāradīyapurāṇa).

Substance—Palm leaf. Size—11½″ × 1½″. Leaves—75. 7—9 lines per page and 62 letters per line. Script—Malayāḷam. No. of Granthas—1800.

Subject—Beginning—Same as No. 524.

End :

तदेतदविचार्यैव पतन्ति बत मोहिताः ।
विषमेषु सुखाभेषु तान् दृष्ट्वान्ये परे च तान् ।
र.........रण्यादृतत्वेऽपि विषयाणां क्व साधुता ।
ग्राह्यं मणिं हि मन्यन्ते दीपं बाला न तत् तथा ।
सुलभत्वं च नैकेषां व्याधिशोकभयादिषु ।
अवश्ये ...., ...

Colophon :

इति श्रीहरिभक्तिसुधोदये हिरण्यकशिपुवधो नाम षोडशोऽध्यायः ।

Remarks—16 chapters and a fragment of the 17th constitute this Ms. Most of the leaves in the middle are damaged beyond the possibility of decipherment.

॥ हरिभक्तिसुधोदयम् (सव्याख्यम्) ॥

527. HARIBHAKTISUDHODAYAM
with commentary.

Substance—Palm leaf. Size—$18\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves —151. 9—11 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—8000.

Subject—Same as No. 524.

Beginning:

श्रीगणपतये नमः । शुभमस्तु ।

कलागम्भीरनिनदनिगमद्राविर्त.... सम् ।
निष्प्रत्यूहपदं सेवे सुतमाद्यं जगत्सुवः ।
सत्यकामं सतां ध्येयं सत्यसङ्कल्पमीश्वरम् ।
सर्वस्य(मसि?) तद्वाचां नियन्तृ ज्योतिराश्रये ॥

वाचां धियामविषयोऽप्यपरोक्षरूपः
कारुण्यमात्रधृतमङ्गलदिव्यमूर्तिः ।
सत्त्वेन पालयति यो भुवनानि देवः
श्रीशश्वकास्तु पुरुषः स परः पुरो नः ॥

केनाप्युल्लसदिन्द्रनीलशकलश्यामाभिरामत्विषा
बालेनाकुलकुन्तलालिकलभस्निग्धाननश्रीजुषा ।
चेतश्चुम्बितमिन्दिरासहचरप्रेमावलोकामृत-
स्रोतःप्लावितविष्टपेन न बहिर्नान्तश्च गृह्णाति मे ॥

श्रीधरं श्रीधरं साक्षान्नमस्कृत्य सतां गुरुम् ।
व्याख्यायते मया भक्त्या हरिभक्तिसुधोदयः ।

श्रीवैद्यनाथगुरुसन्निधिमात्रलब्ध-
विद्याविनीतवनितापरिरब्धचेताः ।
व्याख्यां तनोति हरिभक्तिसुधोदयस्य
श्रीकौशिकान्वयमणिर्वरदाधिराजः ॥

हरिभक्तिसुधोदये प्लवेऽस्मिन्
सुलभेऽपि श्रवणैककर्णधारे ।
न तरन्ति भवाम्बुधिं बुधाश्चे-
दपि मान्यैव दुरत्ययेशमाया ॥

इह खलु भगवाँल्लोकानुजिघृक्षयावतीर्णः श्रीवेदव्यासः पृथ-ग्वर्णाश्रमाचारलक्षणानि प्रवृत्तिपरतया जननादिक्लेशफलकारि-समस्तपुराणेतिहासधर्मशास्त्राणि प्रविधाय तत्र तत्रापरितुष्यन् परमनिःश्रेयसभूतमतिलालितं भक्तियोगं परमभागवतश्रीनारद-मुखेन लोकैकहिततयातिरहस्यमपि प्रकाशयिष्यन् नारदीयपुरा-णान्तरे हरिभक्तिसुधोदयं नाम भक्तियोगप्रकरणं प्रारि-प्सुः तत्प्रतिपाद्यपरदेवतातत्त्वानुस्मरणलक्षणं मङ्गलमाचरति— एकमिति ।

End :

सावद्यमित्यपि तवेश न हेयमस्ति
न ग्राह्यमत्र निरवद्यमपीति किञ्चित् ।
त्यक्तः स्यमन्तकमणिः पृथुका गृहीता-
स्तद् भक्तिपूतमिदमस्तु हरे मुदे ते ॥

श्रीशार्ङ्गिपद्ममकरन्दजुषो महान्तः
सावद्यमप्यखिलदोषहरास्तदेतत् ।
गृह्णन्तु वत्सलतया मयि बालके ते
ये वाग्मिनश्च कृतिनः कवयः सुशीलाः ॥

येषां पदाम्बुजरजोभिरशेषलोक-
निश्शेषकल्मषहरैः सततं मदीयः ।
मूर्धा विमृष्टदुरिताक्षरपङ्क्तिरास्ते
तेषामहं हरिजुषां विदुषां हि दासः ॥

वन्दे सदाशिवसुतीर्थसमीड्यवासु-
देवेन्द्रयोगिचरणान् करुणार्द्रचित्तान् ।
यान् पश्यतां भुवनशङ्करशङ्करेण
व्यासस्य साकमवतार इति ध्रुवं धीः ॥

Colophon :

इति श्रीवैद्यनाथगुरुचरणारविन्दमकरन्दसन्दोहनिर्भरान्तःकरणश्रीवरदराजसूरिविरचिते श्रीहरिभक्तिसुधोदयव्याख्याने विंशोऽध्यायः ॥ शुभमस्तु ।

Author—Varadarāja.

Remarks—The author, a disciple of Vaidynātha, was born in Kauśika Gotra. He refers to Vāsudevendra Yogīsvara, probably his spiritual guru. The Ms. is very old.

॥ हरिवंशः ॥

528. HARIVAMŚA.

Substance—Palm leaf. Size—18″×1½″. Leaves—206. 8—11 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—9000.

Colophon :

इति श्रीहरिवंशे कैलासयात्रायां........शोऽध्यायः ।

वै..

Remarks—This work is a supplement to the Mahābhārata. Chapter 325 in it furnishes a table of its contents. The story commencing from the incarnation of Kṛṣṇa is set forth here.

॥ हरिवंशः ॥

529. HARIVAMŚA.

Substance—Palm leaf. Size—$21\frac{1}{2}''\times1\frac{3}{4}''$. Leaves—199. 9—11 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—1000.

Colophon :

इति हरिवंशे सप्तत्रिंशच्छततमोऽध्यायः ।

Remarks—The Ms. is short of two leaves at the beginning. The chapters in it are numbered continuously unlike in the printed editions.

॥ हरिवंशः ॥

530. HARIVAMŚA.

Substance—Palm leaf. Size—$17''\times1\frac{1}{2}''$. Leaves—39

170. 8 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—4700. Incomplete.

Colophon:

इति श्रीहरिवंशे गोमन्तयात्रायामेकशततमोऽध्यायः ।

Remarks—The Ms. is too crumbly to be touched.

॥ हरिवंशः ॥

531. HARIVAMŚA.

Substance—Palm leaf. Size—$20\frac{1}{2}'' \times 2\frac{3}{4}''$. Leaves—110. 9—10 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—5000. Incomplete.

Colophon:

इति श्रीहरिवंशे पञ्चसप्ततितमोऽध्यायः ।

Remarks—This Ms. covers 75 chapters and a fragment of the 76th. It is old and worn out.

॥ हरिवंशः ॥

532. HARIVAMŚA.

Substance—Palm leaf. Size—$21'' \times 2''$. Leaves—172. 7 lines per page and 60 letters per line.

Script—Malayāḷam. No. of Granthas—4500. Incomplete.

Colophon :

इति श्रीहरिवंशेऽरिष्टवधो नामैकसप्ततितमोऽध्यायः ।

Remarks—The Ms. contains 71 chapters.

॥ हरिवंशः ॥

533. HARIVAMŚA.

Substance—Palm leaf. Size—$23\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—117. 8 lines per page and 84 letters per line. Script—Malayāḷam. No. of Granthas—5000. Incomplete.

Colophon :

इति श्रीहरिवंशे बलदेवविक्रमो नाम चतुर्विंशच्छततमोऽध्यायः । माधवेन लिखितस्यास्य श्रीहरिवंशस्याधोभागः समाप्तः । ॐ नमो नारायणाय ।

Remarks—The Ms. opens, on Fol. 49, with the end of chapter 33.

॥ हरिवंशः ॥

534. HARIVAMŚA.

Substance—Palm leaf. Size—$22\frac{1}{2}'' \times 2\frac{1}{8}''$. Leaves

—148. 8—10 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—6000.

Colophon :

इति श्रीमहाभारते शतसाहस्रिकायां संहितायां वैयासिके श्रीहरिवंशे एकादशोऽध्यायः । समाप्तं चेदं हरिवंशम् ।

मान्धाता यत्र कामारिमार्चयत्पार्वतीपतिम् ।
तस्माद् ग्रामादिदं लब्धं लिखितं ग्रन्थसंग्रहम् ॥
याचकेभ्यो न दातव्यं बान्धवेभ्योऽपि कृच्छ्रतः ।
दाता? यदि न दास्यन्ति दौरात्म्याद्दातरि ध्रुवम् ॥

... ...

Remarks—The Ms. begins from chapter 125. It is much damaged.

॥ हालास्यमाहात्म्यम् (स्कान्दगतम्) ॥

535. HĀLĀSYAMĀHĀTMYAM.

Substance—Palm leaf. Size—18″ × 2″. Leaves—177. 10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—5300.

Subject—Exposition of the sportive amusements of Hālāsyanātha at Madura.

Beginning :

हरिः । श्रीगणपतये नमः अविघ्नमस्तु । श्रीमीनाक्षीसुन्दरेश्वराय नमः ।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ।
ऐश्वर्यं परमं तत्त्वमादिमध्यान्तवर्जितम् ।
आधारं सर्वभूतानामनाधारमविक्रियम् ॥
अनन्तानन्दबोधाम्बुनिधिमद्भुतविक्रियम् ।
अम्बिकापतिमीशानमनिशं प्रणमाम्यहम् ॥
वन्दे हालास्यनगरीं वन्दे हेमाब्जिनीमपि ।
वन्दे सुमीननयनां वन्दे सुन्दरनायकम् ॥
शिवाय परिपूर्णाय चित्पालाय चिदात्मने ।
चित्तनाथाय नाथाय तेजसे ब्रह्मणे नमः ।

आनन्दसागररसाकुलशैलकन्या-
वक्षोजकुम्भयुगलीपरिरम्भणेन ।
रोमाञ्चकञ्चुकपरिष्कृतगात्रयष्टिं
देवं भजामि मथुरापुरनाथमीशम् ॥

इक्षुकोदण्डपुष्पेषुपाशाङ्कुशकरोज्ज्वलाम् ।
उद्यत्सूर्यनिभां देवीं वन्दे त्रिपुरसुन्दरीम् ॥
नमः सुन्दरनाथाय तस्मै हालास्यवासिने ।
चतुष्षष्टिविधा लीला येन प्रत्यक्षिताः क्षितौ ॥
श्रीमत्सुन्दरनाथस्य देवीं शफरलोचनाम् ।
कलये हृदये नित्यं कदम्बवनवासिनीम् ॥
कारुण्यमदनिष्यन्दं कैवल्यवनचारिणम् ।
कालाम्बुदश्यामलाङ्गं कलभाननमाश्रये ॥

आम्नायरसिकं वन्दे आननैः षड्भिरन्वितम् ।
हिमाद्रितनयास्तन्यकुक्षिम्भरिमहं शिशुम् ॥
ओम् ।
श्रीकैलास इति ख्यातः श्रीमतां भूभृतां वरः ।
श्रीपतिप्रमुखैर्लेखैः श्रियै मुक्त्यै च सेवितः ॥

End :

शिबिकायामथारोप्य गन्धमाल्यादिभूषितम् ।
पुरप्रदक्षिणं कृत्वा सर्ववाद्यैश्च घोषितम् ॥
गृहं प्रवेशयेच्छ्रोता तस्य चाशिषमाप्य च ।
सुन्दरेशस्य यजने यत् फलं तदवाप्नुयात् ॥

श्रीसूतः—
शृण्वतां चैव युष्माकं भक्तिः श्रीसुन्दरेश्वरे ।
श्रीमीनाक्ष्याः पादयोश्च निश्चलास्तु द्विजोत्तमाः ॥
सर्वत्र विजयश्चास्तु युष्माकं सर्वमङ्गलम् ।
सर्वस्साप्नोति ? दुर्गाणि सर्वोऽपत्यानि पश्यति ॥
सर्वे सद्गुणमेष्यन्ति सर्वेषां च नृणां शुभम् ॥

Colophon :

इति श्रीस्कान्दे पुराणे अगस्त्यसंहितायां हालास्यमाहात्म्ये वसिष्ठादिमुनीश्वराणां काश्यां मुक्तिमण्डपे अगस्त्यप्रोक्तश्रीहालास्येश्वरचतुष्षष्टिलीलाकथनं नाम एकसप्ततितमोऽध्यायः ।

श्रोतॄणां पठतां पुंसां माहात्म्यं मधुरापतेः ।
शिवं भूयाच्छिवं भूयाच्छिवं भूयाच्छिवाज्ञया ॥
नमः सुन्दरनाथाय तस्मै हालास्यवासिने ।
चतुष्षष्टिविधा लीला येनाकारि भुवस्तले ॥

धवलवपुषमिन्दोर्मण्डले सन्निषण्णं
भुजगवलयहारं भस्मदिग्धाङ्गलेपम् ।
हरिणपरशुपाणिं चारुचन्द्रार्धमौलिं
हृदयकमलमध्ये सन्ततं चिन्तयामि ॥

अज्ञानयोगादपचारकर्म यत्पूर्वमस्माभिरनुष्ठितं ते ।
तद्देव सोढ्वा सकलं दयालो पितेव पुत्रान् प्रति नो जुषस्व ॥

यदक्षरपदभ्रष्टं मात्राहीनं तु यद् भवेत् ।
तत् सर्वं क्षम्यतां देव सुन्दरेश नमोऽस्तु ते ॥
मङ्गलं महदानन्ददायिने मुदितात्मने ।
पाषण्डषण्डातिमिरमिहिरायास्तु मङ्गलम् ॥
तदातकात्रिवाहाय? स्वयं पाण्ड्यमहीपतेः ।
काष्ठभारधरायास्तु गानरूपाय मङ्गलम् ॥
त्रैवर्णिकाङ्गनावृन्दवलयावलिदायिने ।
कुलशेखरभूपालभावुकायास्तु मङ्गलम् ॥
अरिमर्दनराजेन्द्रवेत्रमुद्राङ्किताय ते ।
माणिक्यवाचकस्वान्तमन्दिरायास्तु मङ्गलम् ॥
नरकण्ठीरवध्वंससन्नद्धशरभाय ते ।
सारसाक्षसमुज्जृम्भत्सायकायास्तु मङ्गलम् ॥
कल्याणाचलकोदण्डकनत्करतलाय ते ।
पद्मिनीपतिदन्तालिदमनायास्तु मङ्गलम् ॥
मङ्गलं शाश्वतं शम्भुर्मङ्गलं मृत्युसूदनः ।
मङ्गलं मे ललाटाक्षो मङ्गलं सोमसुन्दरः ॥
मङ्गलं पार्वती गौरी मङ्गलं परमेश्वरी ।
मङ्गलं ललिता देवी मङ्गलं मीनलोचना ॥

श्रीमीनाक्षीसुन्दरेश्वरार्पणमस्तु । (सोम) शुभम् ॥

Author :

Remarks—Of all the līlas indulged in by Lord Paramesvara for the good of the world at large, only 64 are depicited here. Nīlakaṇṭha Dīkṣita has composed a work called Śivalīlārṇava covering all the manifestations of the deity. The colophon shows that this work is included in the Skāndapurāṇa.

॥ वेदान्तम् ॥

॥ अद्वैतदीपिका ॥

536. ADVAITADĪPIKĀ.

Substance—Palm leaf. Size—18″ × 2″. Leaves—177. 10—11 lines per page and 52 letters per line. Script—Grantha. No. of Granthas—6200. Complete.

Subject—The absolutism of the Supreme Spirit.

Beginning :

यस्मादभूदभवनानुभवात् सुखाब्धे-
र्विश्वं मरीचिमरुवारिसमं मुरारेः ।
तस्यालयो निखिललोकसुमङ्गलानां
पुण्यं वपुः प्रकटमस्तु ममार्थसिद्धम् ॥

End :

अहं क्रिया नैष गुरोः प्रसादः क वा महेन्द्रैर्मनसाप्यलभ्यः ।
प्रसादिते देववरे मुरारौ न किञ्चिदप्राप्यमिहैव मन्ये ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यजगन्नाथाश्रमपूज्यपादशिष्यश्रीमन्नृसिंहाश्रमकृताद्वैतदीपिकायाम् आनन्ददीपिकाख्यः (चतुर्थः) परिच्छेदः । हरिः ॐ । चतुर्थः परिच्छेदः । एतत् पुस्तकं पुरुषोत्तमेन लिखितमासीत् । ....

Author—Nṛsiṁhāśrama.

Remarks—This Ms. contains four chapters only. Jagannāthāśrama was the author's preceptor.

॥ अद्वैतदीपिकाविवरणम् ॥

537. ADVAITADĪPIKĀVIVARAṆAM.

Substance—Palm leaf. Size—19″ × 2″. Leaves—234. 10 lines per page and 48 letters per line. Script—Grantha. No. of Granthas—7100. Incomplete.

Subject—Same as No. 536.

Beginning :

यज्जिज्ञासा यज्ञदानादिभिः स्या-
च्छ्रुत्या मत्या चिन्तया यत्प्रबोधः ।
यस्मिन् बुद्धे साध्यतेऽनर्थमूलं
तं भूमानं भावये स्वस्वरूपम् ॥

च्चेतश्चापलमिन्द्रियार्थविषयं त्यक्त्वा भजस्वाभयं
संसारार्णवतारकं नरहरेः पादाब्जरेणुप्लवम् ।
यो ध्यातो दितिजेन्द्रबालकमधस्सिन्धोर्गतं पर्वतै-
राक्रान्तं सितमुग्रभोगिभिरनायासेन पारेऽकरोत् ॥

यत्पादसेवा वितनोति पापं
पुण्यं रिपुं मित्रमेनकमेकम् ।
अणुं महान्तं तमचिन्त्यवृत्तं
श्रीनारसिंहं गुरुमानतोऽस्मि ॥

अबोधवार्तापि न यद्विनेये-
ष्वथाप्यबुद्धं जगदेव येन ।
शुद्धस्वरूपामलबोधरूपं
प्रबोधपूर्वाख्यगुरुं नुमस्तम् ॥

गणेशान प्रणौमि त्वां गुणान् भणितुमक्षमः ।
यत्ते प्रसादाद् वागीशशर्वाद्याः सफलक्रियाः ॥

मातर्नमामि तव वाणि पदारविन्दं
तीर्थप्रभेदपरिलब्धनिजानुभावम् ।
गीर्वाणदारकबरभ्रमरीकुलाढ्यं
विद्यामयामलमनोज्ञपरागपात्रम् ॥

अद्वैतदीपमनवद्यपरात्मबोध-
भासा भवप्रमुखमूलतमःप्रमोषम् ।
सम्प्राप्य दुर्लभदशोऽपि हि मामकीनाः
श्रेयो भजन्त्विति समुल्लसति प्रयत्नः ॥

प्रारिप्सितस्य प्रकरणस्याविघ्नपरिसमाप्तिप्रचयगमनाभ्यां शिष्टा-

त्त्वारपरिपालनाय च प्रकरणप्रतिपाद्याद्वितीयात्मतत्त्वस्य चेतस्या-
विर्भावप्रार्थनालक्षणं मङ्गलं कुर्वन्नर्थात् प्रकरणस्याधिकारिविषय-
प्रयोजनानि निर्दिशति— यस्मादिति ।

End :

तस्येति । अनर्थहेतोरज्ञानस्य तत्त्वज्ञानेन निवृत्तावप्रति-
बद्धस्वाभाविकब्रह्मभाव एव परिशिष्यत इत्यर्थः । एतादृशा-
ज्ञाननिवर्तकं ज्ञानमीश्वरभजनेन विना न भवति । जीव(स्तु?स्यतु)
ईश्वरात्मत्वेऽपि मायिकभेदेनानीश्वरत्वाभिमानात् तद्भजनोपपत्तिः ।
तथाच स्मृतिः—

भयं द्वितीयाभिनिवेशतः स्या-
दीशादपेतस्य विपर्ययो स्मृतिः ।
तन्माययातो बुध आभजेत् तं
भक्त्यैकयेशं गुरुदेवतात्मा ॥

इति । एतद्द्योतयन्नीश्वरं भजते—यन्माययेति । वस्तुतः
सदानन्दैकविग्रहो हरिरप्यहं यन्मायया पृथग्भूतः तं भजे इत्यर्थः ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यभगवन्नृसिंहाश्रमपूज्य-
पादशिष्यनारायणाश्रमविरचिते अद्वैतदीपिकाविवरणे द्वितीयः
परिच्छेदः ।

श्रीमत्परमगुरवे नमः । हरिः ओम् । शुभमस्तु । श्रीसर-
स्वत्यै नमः । श्रीवेदव्यासाय नमः ।

वश्विकुलाब्धिसुधांशोराज्ञामादाय रामभूजानेः ।
भारद्वाजकुलीनो रामाख्योऽद्वैतदीपिकामलिखम् ॥

ശ്രീഭൂമിസഹിതശ്രീഅനന്തപദ്മനാഭസ്വാമി സഹായം.

Author — Nārāyaṇāśrama, disciple of Nṛsimhāśrama.

Remarks—This Ms. consists of the first two Paricchedas. The colophon discloses that the Ms. was copied in obedience to the commands of H. H. Rāma Varmā, one of the Mahā Rājas of Travancore.

॥ अद्वैतदीपिकाविवरणम् ॥

538. ADVAITADĪPIKĀVIVARAṆAM.

Substance—Palm leaf. Size—17″ × $2\frac{1}{2}$″. Leaves—208. 8 lines per page and 68 letters per line. Script—Malayāḷam. No. of Granthas—7100.

Subject—Same as No. 536.

Beginning —End—Colophon—Author—Remarks—Same as No. 537.

॥ अद्वैतपञ्चरत्नम् (किरणावलीयुतम्) ॥

539. ADVAITAPAÑCARATNAM with Kiraṇāvali.

Substance—Palm leaf. Size—$3\frac{5}{8}$″ × $2\frac{1}{8}$″. Leaves—63. 12 lines per page and 12 letters per line. Script—Malayāḷam. No. of Granthas—600. Complete.

Subject — Exposition of the realism of the

Supreme Spirit in the light of Advaita philosophy.

Beginning:

श्रीवासुदेवाय परब्रह्मणे नमः ।

मन्दस्मितमुखाम्भोजं रमालङ्कृतवक्षसम् ।
वन्दारुजनमन्दारं वन्देऽहं यदुनन्दनम् ॥
पुण्डरीकाजिनधरं विलसत्फाललोचनम् ॥
ज्ञानमुद्राश्रितकरं दक्षिणामूर्तिमाश्रये ॥
यत्प्रसादप्लवं प्राप्य प्रत्यूहजलधिं जनाः ।
महारम्भास्तरन्त्येतं विघ्नेशमनिशं नुमः ॥
यां श्रियं नगजां वाचां देवीमाहुर्विचक्षणाः ।
तां लोकमातरं वन्दे वाग्विभूतिप्रसिद्धये ॥
यदीयसूत्रविलसच्छास्त्रनावा भवाम्बुधिम् ।
सन्तस्तरन्ति तं वन्दे पाराशर्यमहर्निशम् ॥
यदीयभाष्यकमलस्यन्दमानमरन्दतः ।
विद्वद्भृङ्गस्तृप्तिमेति शङ्करं तमुपाश्रये ॥
यस्य प्रसादकणिकानौका तारयते न कान् ।
संसारसिन्धुं तं वन्दे सच्चिदानन्दयोगिनम् ॥
यस्योपदेशमाहात्म्याज्जडा अपि विनिर्गताः ।
संसारबन्धात् तं वन्दे वासुदेवेन्द्रयोगिनम् ॥
क्वाहं क्व भगवत्पादकृतिगाम्भीर्यजन्म(भूः) ।
तथाप्यत्रावगाहं मे काङ्क्षते खलु मानसम् ॥
महतां पक्षपातेन दुःसाधेऽप्यर्थकल्पने ।
मम सामर्थ्यमस्त्येव टिट्टिभोऽत्र निदर्शनम् ॥

गुरुपादाम्बुजद्वन्द्वध्याननिर्मलमानसः ।
आरभे पञ्चरत्नस्य विवृतिं किरणावलिम् ॥

अथ खलु परमकृपालवो भगवन्तो भगवत्पादाः निखिलं लोकं संसारदावानलपरिपीडितमुपलभ्य आत्मज्ञानामृतमेव तदुपशमनं सुखसाधनं चाहुः ।

End :

आनन्दावाप्तिश्चौपचारिकी । पूर्वं प्राप्तस्यानन्दस्य इदानीं प्राप्त्यभावात् । न चानन्दस्य स्वतःसिद्धरूपत्वेन प्रारब्ध-क्षयानन्तरं ब्रह्मानन्दात्मनावस्थितिप्रतिपादकमूलकारवाक्यविरोध इति वाच्यम् । स्वत एव पूर्वं ब्रह्मात्मना स्थितस्यापि जीवस्याविद्यामहिम्ना भिन्नवत् स्थितस्य सकार्यतन्निवृत्तावथ परं ब्रह्मात्मना स्थीयतामिति वक्तुं शक्यत एव । पूर्वं तदव-स्थाया एव शुक्तेः स्वाज्ञानमहिम्ना अतथाभूतवत्स्थिताया-स्तन्निवृत्तौ स्वरूपापत्तिरेवेति न कोऽपि दोष इति संक्षेपः ।

अज्ञातं ब्रह्मतत्त्वं ये ज्ञातुं वाञ्छन्ति ते बुधाः ।
समाश्रयन्तु सततं किरणावलिमादरात् ॥
मदीयकृतिमध्ये यो भूषणं दूषणं जनः ।
विचार्येव वदेत् तस्मै महते विधये नमः ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाद्वैतविद्याचार्यवर्यश्रीमत्सच्चि-दानन्दयोगीन्द्रचरणकमलयुगलभृङ्गायमाणबालकृष्णानन्दस-रस्वतीविरचिताद्वैतपञ्चरत्नव्याख्या किरणावलिसमाख्या सम्पूर्णा ।

शुभमस्तु । ... ...

Author—Com: Bālakṛṣṇānanda Sarasvatī, disciple of Saccidānandayogīndra.

Remarks—The commentary is lucid and exhaustive. The last verse extols its sublimity.

॥ अद्वैतपञ्चरत्नम् (किरणावलीयुतम्) ॥

540. A. ADVAITAPAÑCARATNAM
with Kiraṇāvalī.

Substance—Palm leaf. Size—14¼″ × 2″. Leaves—15. 11 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—600. Complete.

Subject etc.—Same as No. 539.

Remarks—The closing portion of another work is seen at the beginning of this Ms. extending over four lines and the ultimate line is as follows:—

"इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोपालयोगीन्द्र-शिष्यश्रीमत्त्र्यंबकाशम्भुनिविरचितैकश्लोकव्याख्या समाप्ता"।

॥ अद्वैतशतकम् (केरलभाषाव्याख्योपेतम्) ॥

540 B. ADVAITAŚATAKAM
with Malayāḷam commentary.

Substance—Palm leaf. Size—14¼″ × 2″. Leaves-

10. 10—14 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas —360. Complete.

Subject—An epitome of philosophical treatises.

Beginning:

हरिः । श्रीगणपतये नमः । श्रीसरस्वत्यै नमः । श्रीगुरवे नमः ।
श्रीवेदव्यासाय नमः । अविघ्नमस्तु ।
प्रणम्य परमानन्दं स्वात्मानं परमेश्वरम् ।
अद्वैतशतकं वक्ष्ये सर्ववेदान्तसंग्रहम् ॥

परमानन्दं स्वात्मानं परमेश्वरं प्रणम्य अद्वैतशतकं वक्ष्ये । പരമാനന്ദസ്വരൂപനായ സ്വാത്മാവായിരിക്കിൻറ പരമേശ്വരനെ നമസ്കരിച്ചിട്ടു അദ്വൈതശതകത്തെ ചൊല്ലിൻേറൻ. എങ്ങനെ ഇതൊന്നൊൻറദ്വൈതശതകമെൻറപേക്ഷ വന്നെടത്തതിനെക്കാട്ടിൻറൂ. സർവവേദാന്തസംഗ്രഹം സർവ്വവേദാന്തങ്ങളിടെ സംഗ്രഹമായിരുന്നോൻറ

End:

परिपूर्णमयं रूपं परिगृह्य शुभाशुभम् ।
नित्यनैमित्तिकं कर्म सदा कुर्वन्न लिप्यसे ॥
कृतानि वाङ्मनःकायैर्लोके कर्माणि जन्तुभिः ।
तेषामन्यतमत्वेन कथं कर्ता भविष्यसि ॥
सर्वत्रावस्थितं शान्तं स्वस्वरूपाभिधं शिवम् ।
अनुभूय वपुस्त्यक्त्वा ज्ञप्तिमात्रमयो भव ॥

Colophon:

हरिः ।

अद्वैतशतकं समाप्तम् । ओं ओं ओं ।

Author :

Remarks—The substance of all philosophical treatises is set forth here in one hundred verses. The commentary is in old Malayāḷam. The diction is proof positive of its hoary antiquity.

॥ अद्वैतमकरन्दः (रसाभिव्यञ्जिकोपेतः) ॥

541. ADVAITAMAKARANDA

with the commentary Rasābhivyañjikā.

Substance—Palm leaf. Size—14″ × 2″. Leaves—14. 11 lines per page and 58 letters per line. Script—Malayāḷam. No. of Granthas—537. Complete.

Subject—Advaita Vedānta.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

ऽया—•

नित्यं निरन्तरानन्दं चिद्घनं ब्रह्म निर्भयम् ।
श्रुत्या तर्कानुभूतिभ्यामहमस्म्यद्वयं सदा ॥

अम्बागृहीतवामार्धं वन्दे चन्द्रकलाधरम् ।
लावण्यमधुराकारं कारुण्यरसवारिधिम् ॥

कैवल्यानन्दयोगीन्द्रपादकञ्जरजोरविः ।
राजते मे हृदाकाशे मोहध्वान्तनिवर्त्तकः ॥

शुद्धानन्दपदाम्भोजद्वयं सेवे यदुद्भवम् ।
निर्वाणरसमास्वाद्य हृष्टाः शिष्यालिपङ्क्तयः ॥

सच्चिदानन्दयोगीन्द्रा जायन्ते भुवि केचन ।
यत्कृपालवतस्तीर्णो मया संसारवारिधिः ॥
इह खलु लक्ष्मीधरो नाम कश्चित् कवीन्द्रः ...

... ...

End :

अहमस्मि सदा भामि कदाचिन्नाहमप्रियः ।
ब्रह्मैवाहमतः सिद्धः सच्चिदानन्दलक्षणम् ॥

यद्यप्यत्र प्रतिश्लोकं बहु वक्तव्यमस्ति । तथापि मन्दबुद्धीनामलसानां व्युत्पादनार्थं प्रवृत्तेन मया ग्रन्थकाठिन्यगौरवभयादुपरतम् ।

अद्वैतमकरन्दस्य रसाभिव्यञ्जिका कृता ।
स्वयंप्रकाशयतिना पुरुषोत्तमशासनात् ॥
ब्रह्मानन्दरसास्वादमिच्छद्भिर्विबुधोत्तमैः ।
रसाभिव्यञ्जिका ह्येषा परिशील्या सदादरात् ।
तापत्रयार्कसन्तप्ता मोक्षकामा मुदा सह ।
रसाभिव्यञ्जिकागङ्गामग्ना भवत सत्तमाः ॥

Colophon :

अद्वैतमकरन्दटीका समाप्ता ।

Author : Text—Lakṣmīdhara. Com. Svayamprakāśayati.

Remarks—The closing portion of Vākyasudhaṭīkā is seen at the front page of this Ms. and in the Fol. immediately after, the '*tika*' of Advaita Makaranda.

॥ अद्वैतरत्नप्रकाशः ॥

542. ADVAITARATNAPRAKĀŚA.

Substance—Palm leaf. Size—14½" × 2". Leaves—332. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—8991. Incomplete.

Subject—An elaborate exposition of Advaita philosophy.

Beginning :

आनन्दामृतवारिराशिमखिलाम्नायादरैकास्पदं
स्वीयाभाकलितप्रभाकरमुखज्योतिर्गणं शाश्वतम् ।
वीक्षामात्रविभावितांम्बरमरुद्वह्न्यम्बुसर्वंसहं
मायाकल्पितदृश्यजालमनिशं चित्ते हरिं चिन्तये ॥

सौदामिनीततिपिशङ्गजटाकलापं
प्रालेयभानुशकलाङ्कितमौलिभागम् ।
श्रीमुद्रिकाकलिततत्त्वमजस्रमीशं
न्यग्रोधशाखिमविश्राश्रयमाश्रयामः ॥

श्रीवासुदेवेन्द्रपदारविन्दं
वन्दामहे बोधमरन्दसान्द्रम् ।
यद्रेणुसङ्कीर्णपयो निपीय
मूकोऽपि वाचां प्रभुतामुपैति ॥

श्रीमन्नृसिंहाश्रमसूक्तिगुम्फा-
नद्वैतसिद्धान्तपथप्रदीपान् ।
अद्वैतरत्नस्य करोम्यशेषान्
प्रकाशमालोच्य मुदे बुधानाम् ॥

प्रत्यगभिन्नब्रह्मानुचिन्तनरूपं परमात्मनमस्काररूपं वा कृतं मण्डलं निबध्नाति—यदालिङ्ग्येत्यादिना...

End:

ननु आत्माश्रयमात्मविषयमित्युक्त्या मतद्वयेऽप्यात्मत्वमेवाश्रयविषयतावच्छेदकमिति प्रतीयते। तदयुक्तम्। मिश्रमते जीवत्वपरमात्मत्वयोरेव तथात्वाभ्युपगमादित्यत्राह—मतान्तर इति। जीवत्वमाश्रयोपाधिरेव न तु विशेषणमिति स्फोरयितुं तथोक्तमित्यर्थः ॥

Colophon:

Author:

Remarks—The doctrines of other systems of philosophy are refuted preparatory to the establishment of Advaita Vedānta. The style is abstruse and involved. Advaitaratna is the title of the text and Prakāśa of the commentary. Clear evidence is available to show that the author of the text is Nṛsimhāśrama. Lacuṇae are marked in plenty in the course of the work.

॥ अद्वैतरत्नप्रकाशः ॥

543. ADVAITARATNAPRAKĀŚA.

Substance—Palm leaf. Size—14½″—1¾″. Leaves—273. 9 lines per page and 46 letters per line. Script—Grantha. No. of Granthas—7064. Incomplete.

Subject—Beginning—Same as No. 542.


End :

तदा प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगी नास्तीति चेन्न । लाघवेन प्रतियोगिमात्रेणैवाभावस्य विरोधात् । विशिष्टैकबलानन्यत्वे पुरुषे सति दण्डावच्छिन्नो नेत्यस्य व्याहतत्वाच्च । तथापीदमंशसम्भिन्नस्यात्मनः पारमार्थिकस्यैव भेदमात्रमेव कल्पितम् बिम्बादिव प्रतिबिम्बस्य । स च न पारमार्थिकाभेदस्य विरोधी । यथा मूलाग्रावच्छिन्नवृक्षभेदो वृक्षभेदस्य । तत्र च मूलाव... ... ...

Colophon :

Author :

Remarks—Some words are lacking at the opening of the Ms.



॥ अद्वैतशतकम् ॥

544. ADVAITAŚATAKAM.

Substance—Palm leaf. Size—$9\frac{3}{4}'' \times 1\frac{3}{4}''$. Leaves—9. 8 lines per page and 35 letters per line. Script—Malayāḷam. No. of Granthas—160. Incomplete.

Subject—A compendium of Advaita philosophy.

Beginning :

... ...श्वरो वेदैः परमात्मेति गीयते ।
यदा स्थूलादिदेहेषु मनुष्याणां स्थितिर्भवेत् ।
जीवात्मेति तदा प्रोक्तः संकोचग्रहणाद् बुधैः ॥

जीवात्मैव हि संसारे सदासारे परिभ्रमन् ।
लोकाल्लोकान्तरं गत्वा गर्भपात्रं विशत्यसौ ॥
गत्वा गर्भगृहाद् भूयो मानुषं लोकमाविशन् ।
पुत्रोऽयं मम भार्येयमस्मदीयमिदं धनम् ॥
इदं क्षेत्रमिदं मित्रमस्मदीयमिदं गृहम् ।
इयं माता मम पिता जना एते ममारयः ॥
इति निश्चित्य जीवात्मा रागं द्वेषं दिने दिने ।
एतान् प्रतिकरोत्येव स्वाज्ञानादेव केवलम् ॥

End :

देहत्रयसमुद्भूतां वासनां सम्परित्यजन् ।
परिगृह्य परं देहं परिपूर्णपरोभवम् ॥
परिपूर्णमयं रूपं परिगृह्य शुभाशुभम् ।
नित्यनैमित्तिकं कर्म स वै कुर्वन्न लिप्यते ॥
कृतानि वाङ्मनःकायैर्लोके कर्माणि जन्तुभिः ।
तेषामन्यतमत्वेन कथं कर्ता भविष्यति ॥
सर्वत्रावस्थितं शान्तं स्वस्वरूपाधिकं शिवम् ।
अनुभूय वपुस्त्यक्त्वा ज्ञप्तिमात्रमयो भव ॥

Colophon :

अद्वैतशतकं समाप्तम् ।

Author :

Remarks—The Ms. commences only from the second half of the 11th verse. The first Fol. might have been lost. The salient features of Advaita Vedānta are depicted in this 'century of verses'.

॥ अद्वैतसंग्रहः ॥

545. ADVAITASAṄGRAHA.

Substance—Palm leaf. Size—$7\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves —10. 18 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas —130. Complete.

Subject—A succinct account of the doctrines of Advaita Vedānta.

Beginning:

हरिः । श्रीगणपतये नमः ।

नवनीतचोरगोपीजारयशोदाकिशोररूपेण ।
क्रीडयि (?) यत् कृष्णाख्यं वस्तु तदेवाहमखिलमपि ॥
हरौ गुरौ च भक्तानां जिज्ञासूनां च विस्तृते ।
वेदान्ते त्वलसानां तत्सिद्धान्तोऽत्र प्रकाश्यते ॥
ईश्वरानुग्रहवतामियता ज्ञानसम्भवः ।
तदभाववतां शास्त्रसहस्रेणापि किं भवेत् ॥

End:

न च तेषां पुनरागमनं, किन्तु तत्रैव उत्पन्नज्ञानानां ब्रह्मणा सह मोक्षः । एवं वेदान्तसिद्धान्ताः संक्षिप्य प्रकाशिताः । अत्र सर्वत्र श्रुतिस्मृतीतिहासपुराणाभियुक्तवचनानि बहूनि सन्ति । विस्तरभिया न तान्युदाहृतानि । विस्तरस्तु भगवत्पादभाष्यादिषु द्रष्टव्यः ।

Colophon:

हरिः ।

श्रीरामभद्रविदुषः पुत्रेणाद्वैतसंग्रहः ।

रामेण दर्शितोऽनेन श्रीकृष्णः प्रीयतां हरिः ॥
ज्ञानं भेदविहीनं राधाकुचकुम्भविलसदुपधानम् ।
गोपालकाभिधानं दीनं मामवतु गोपिकाधीनम् ॥
इत्यद्वैतसंग्रहः समाप्तः । हरिः ।

Author—Rāma.

Remarks—The Ms. is useful to those desirous of acquiring a preliminary knowledge of Advaita Vedānta.

॥ अद्वैतसिद्धिः ॥

546. ADVAITASIDDHI.

Substance—Palm leaf. Size—$17\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—106. 10—11 lines per page and 54 letters per line. Script—Malayāḷam. No. of Granthas—5250.

Subject—Advaita philosophy.

Beginning:

मायाकल्पितमातृतामुखमृषाद्वैतप्रपञ्चाश्रयः
सत्यज्ञानसुखात्मकः श्रुतिशिखोत्थाखण्डधीगोचरः ।
मिथ्याबन्धविधूननेन परमानन्दैकतानात्मकं
मोक्षं प्राप्त इव (स्वयं विजयते विष्णुर्वि) कल्पोत्थितः ॥

श्रीरामविश्वेश्वरमाधवानामैक्येन साक्षात्कृतमाधवानाम् ।
स्पर्शेन निर्धूततमोरजोभ्यः पादोत्थितेभ्योऽस्तु नमो रजोभ्यः ॥

End:

प्रातिभासिकलक्षणं चाव्याप्तम् । तथा सन्निकरणसंसर्गिदोष-प्रयुक्तत्वं च तयोर्लक्षणं निरवद्यम् । सत्वत्रैविध्योपपत्तिः ।

अविद्यातत्कार्यात्मकविविधबन्धव्यपगमे
यमद्वैतं सत्यं प्रततपरमानन्दममृतम् ।
भजन्ते भूमानं भवभयभिदं भव्यमतयो
नमस्तस्मै नित्यं निखिलनिगमेशाय हरये ॥

अनादिसुखरूपतानिखिलदृश्यनिर्मुक्तता
निरन्तरमनन्तता स्फुरणरूपता च स्वतः ।
त्रिकालपरमार्थता त्रिविधभेदशून्यात्मता
मम श्रुतिशतार्पिता तदहमस्मि पूर्णो हरिः ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यविश्वेश्वरसरस्वतीश्रीच-रणशिष्यश्रीमधुसूदनसरस्वतीविरचितायामद्वैतसिद्धौ सप्रपि-करप्रपञ्चमिथ्यात्वनिरूपणं नाम प्रथमः परिच्छेदः ।
श्रीमद्गुरुचरणारविन्दाभ्यां नमः । शुभमस्तु ।

Author—Madhusūdana Sarasvatī, disciple of Viśveśvara Sarasvatī.

Remarks—The first Pariccheda is seen here *in toto*.

॥ अद्वैतानन्दानुभूतिः ॥

547. ADVAITĀNANDĀNUBHŪTI.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—2.

10 lines per page and 35 letters per line. Script—Grantha. No. of Granthas—37.

Subject—Same as No. 545.

Beginning:

श्रीकृष्णं परमानन्दं परमात्मानमव्ययम् ।
अखण्डसंविदात्मानं भजे सत्यादिलक्षणम् ॥
वन्देऽहं दक्षिणामूर्तिं सत्यानन्दादिरूपिणम् ।
सर्वोपनिषदुद्घुष्टभूमानन्दघनं शिवम् ॥
अद्वैतानन्दलहरीपरिशीतलचेतसा ।
अद्वैतानन्दानुभूतिर्मया सम्यक् प्रकाश्यते ॥

End:

श्रुत्या युक्त्या गुरोरुक्त्या तथा स्वानुभवेन च ।
परमानन्दचिद्रूपं ब्रह्मैवास्म्यहमद्वयम् ॥
श्रीकृष्णदक्षिणामूर्तिचरणध्यानलब्धया ।
अद्वैतानन्दानुभूत्या निर्वृतोऽहं निरन्तरम् ॥

Colophon:

हरिः ओम् । शुभमस्तु ।

श्रीसीतारामाख्यविदुषा विरचिता अद्वैतानन्दानुभूतिः सम्पूर्णा । हरिः ओम् ।

Author—Sītārāma.

Remarks—Though the work is concise it comprises a masterly survey of all topics akin to Advaita Vedānta. It is in verse.

॥ अवधूतगीता ॥

548. AVADHŪTAGĪTĀ.

Substance—Palm leaf. Size—14″ × 2″. Leaves—23. 9 lines per page and 36 letters per line. Script—Grantha. No. of Granthas—475.

Subject—Dattātreya's instructions on religious observances.

Beginning:

श्वेतादिवर्णरहितं हि वयं शिवं च
कार्यादिकारणहितं हि वयं शिवं च ।
एवं विकल्पविगताहि.... ....वं च
आत्मानमात्मनि सुमित्र कथं नमामि ॥

End:

सर्वशून्यमशून्यं च सत्यासत्ये न विद्यते ।
स्वभावभावितं प्रोक्तं शास्त्रं संवित्तिपूर्वकम् ॥
ओं तत् सत् ।

Colophon:

इति भगवद्दत्तात्रेयावधूतगीतायां मोक्षशास्त्रे दत्तात्रेय-गोरक्षणसंवादे मोक्षोपायो नाम द्वितीयोऽध्यायः ।
श्रीगुरुभ्यो नमः ।

Author:

Remarks—This Ms. differs from the printed edition in the classification of subjects. The 1st 40 leaves are missing.

॥ अष्टाङ्गयोगलक्षणम् ॥

549. AṢṬĀṄGAYOGALAKṢAṆAM.

Substance—Palm leaf. Size—15″ × 1″. Leaves—5. 5 lines per page and 38 letters per line. Script—Grantha. No. of Granthas—60.

Subject—Definition of the eight acquirements of a *yogi*, such as yama etc.

Beginning:

यमो नियमसंज्ञः स्यादासनं च तृतीयकम् ।
प्राणायामश्चतुर्थः स्यात् प्रत्याहारस्तु पञ्चमः ॥
धारणा च ततो ध्यानं समाधिरिति सत्तम ।
प्रत्येकमेषां वक्ष्यामि लक्षणान्यपि सुव्रत ॥

End:

अतो न कर्म कर्तव्यं फलार्थित्वेन सूरिभिः ।
यदि कुर्युः फलं तत्तदनपेक्ष्यार्चनादिकम् ॥
न चेत् पतति संसारे दुःखावर्ते त्रिमो.... .... ।
....रोऽपि समुद्धर्तुं शक्तो भवति नान्यथा ॥

Colophon:

Author:

Remarks — Sutīkṣṇa's instructions on yoga practices imparted to one of his disciples are herein described.

|| अष्टावक्रसंहिता ||

550. AṢṬĀVAKRASAMHITĀ.

Substance—Palm leaf. Size—$16\frac{1}{8}'' \times 1''$. Leaves—17. 8 lines per page and 64 letters per line. Script—Grantha. No. of Granthas—550. Incomplete.

Subject—Exposition of the realism of the Supreme

Beginning:

... ...
... ...

सच्चिदानन्दात्मने असङ्गाद्वयःखण्डापरोक्षसंविदे ओं नमो नारायणाय परमात्मने नमः ।

ओं निरवद्यानिर्गुणायाशीर्यायाशरीराय असङ्गप्रत्यगद्वयाय स्वभासावभासितकृत्स्नायासङ्गबोधाय सच्चिदानन्दाय स्वबोधध्वस्ताखिलानर्थद्वैताय निरालम्बनबिम्बायाहीनमहोदयाय ॐ ओं नमो नारायणाय परमात्मने नमः ।

शुभमस्तु । हरिः । ओम् । गुरवे नमः । इति पञ्चपुष्पाञ्जलिमन्त्राः ।

... ...श्रीमहागणपतये नमः । श्रीगुरवे नमः ।

सच्चिदानन्दमद्वैतं सर्वाधिष्ठानमुत्तमम् ।
नत्वाष्टावक्रसूक्तस्य दीपिका तन्यते परा ॥
मुक्तिमिच्छसि चेत् तात विषयान् विषवत् त्यज ।
क्षमार्जवं दया शौचं सत्यं पीयूषवद् भज ॥
न पृथ्वी न जलं नाग्निर्न वायुः खं न वा भवान् ।
एषां साक्षिणमात्मानं चिद्रूपं विद्धि मुक्तये ॥

यदि देहं पृथक्कृत्य चिति विश्रम्य तिष्ठसि ।
अधुनैव सुखं शान्तो बन्धमुक्तो भविष्यसि ॥
न त्वं विप्राधिको वर्णो नाश्रमी नाक्षगोचरः ।
असङ्गोऽसि निराकारो विश्वसाक्षी सुखी भव ॥

End :

रहस्यानां तु संन्यासः प्रायश्चित्तं यथैनसाम् ।
प्रसिद्धानां तु पापानां प्रायश्चित्तं महत्तरम् ॥
प.... ....दीनां नाशे तात्कालिकी रतिः ।
धिक् संसारमितीदृक् स्यात् सा वैराग्यस्य मन्दता ॥
अस्मिन् जन्मनि मा भूवन् पुत्रदारादयो मम ।
इति या सुस्थिरा बुद्धिः सा वैराग्यस्य ती(व्रता) ॥
पुनरावृत्तिसहिता.......का मेऽस्तु कश्चन ।
इति तीव्रतरा सा स्यान्मदन्या मो न........हि ॥
श्रीनीलकण्ठेश्वराय नमः । ....ल्यै नमः ।

....

Colophon :

अष्टावक्रमहर्षिणा कृतमुपदेशप्रकरणं प्रथमम् ।

Author:

Remarks—The leaves between 10 and 27 are alone extant. The Ms. is decayed and worn out. The opening verse indicates that this work is a commentary on Aṣṭāvakrasamhitā which may perhaps, be identified with Adhyātma Pradīpa of Viśveśvara as seen in C. C. (p. 587.)

॥ आगमप्रकरणम् ॥

551 A. ĀGAMAPRAKARAṆAM.

Substance—Palm leaf. Size—$14\frac{1}{4}'' \times 2''$. Leaves—14. 9 lines per page and 36 letters per line. Script — Grantha. No. of Granthas—280. Complete.

Subject—Exposition of Vedāntic maxims.

Beginning :

हरिः ओं । गौडपादीयम् आगमप्रकरणम् ।

बहिःप्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः ।
घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्थितः ।
विश्वो हि स्थूलभुङ् नित्यं तैजसः प्र(प्रा ? वि) विक्तभुक् ।
आनन्दभुक् तथा प्राज्ञस्त्रिधा भोगं निबोधत ।
स्थूलं तर्पयते विश्वं प्रविविक्तं च तैजसम् ।
आनन्दश्च तथा प्राज्ञं त्रिधा तृप्तिं निबोधत ।
त्रिषु धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्तितः ।
वेदैतदुभयं यस्तु स भुञ्जानो न लिप्यते ॥

End:

प्रज्ञावैशाखवेधक्षुभितजलनिधिर्वेदनाम्नोऽन्तरस्थं
भूतान्यालोक्य मग्नान्यविरतजननग्राहघोरे समुद्रे ।
कारुण्यादुद्धारामृतमिदममरैर्दुर्लभं भूतहेतो-
र्यस्तं पूर्वाभिपूज्यं परमगुरुममुं पादपातैर्नतोऽस्मि ॥

यत्प्रज्ञालोकभासा प्रतिहतिमगमत्स्वान्तमोहान्धकारो
मज्जोन्मज्जच्च घोरे ह्यसकृदुपजनोदन्वति त्रासहीने ।

यत्पादाब्जाश्रितानां श्रुतिशमविनयप्राप्तिरग्र्या ह्यमोघा
तत्पादौ पावनीयौ भवभयविनुदौ सर्वभावैर्नमस्ये ॥
पञ्चीकरणवार्त्तिकम् ।

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीमच्छंकरभगवतः कृतौ श्रीगौडपादीयभाष्ये आगमशास्त्रे विवरणे अलातशान्त्याख्ये चतुर्थं प्रकरणं समाप्तम् ।

वीरासनस्थममरेन्द्रमुनीन्द्रमध्ये
मायाप्रपस्मृतिनिवारकपादमूलम् ।
मौनेन सूचितचिदेकरसात्मतत्त्व-
चिन्मुद्रयादिशतमादिगुरुं नमामि ॥

मौनज्ञा ... ... स्वान्यसत्तानिषेधे
सत्यज्ञानानन्दपूर्णात्मतत्त्वम् ।
शिष्टं तत्त्वमिति चिन्मुद्रयैव
दिशता श्रीदक्षिणामूर्तिमीडे ॥ (?)

Author—Śaṅkarabhagavatpāda.

Remarks—This Ms. embodies three works. Even before the inception of Āgamaprakaraṇa, 6 lines from the concluding portion of Avadhūta Gītā occur here. This Āgamaprakaraṇa is a portion of the Māṇḍūkyopaniṣadbhāṣya of Śaṅkarācārya.

॥ पञ्चीकरणवार्तिकम् ॥

551 B. PAÑCĪKARAṆAVĀRTIKAM.

Substance—Palm leaf. Size—14¼" × 2". Leaves—4.

9 lines per page and 36 letters per line. Script —Grantha. No. of Granthas—64. Complete.

Subject—Same as No. 551 A.

Beginning :

श्रीगुरुं सच्चिदानन्दं ब्रह्मभूतमकल्मषम् ।
नत्वा समाधिं व्याकुर्मः प्रणवार्थे विनिर्णयम् ॥
समाधिनिष्ठासिद्ध्यर्थं मुनीनामादरेण हि ।
व्यासेन स्वेन गुरुणा यदुक्तं तच्च मोदितम् ॥
अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते ॥
एवं तत्सम्प्रदायस्य मर्यादा च प्रवर्तिता ।

End :

मायां व्यस्तसमस्ताख्यां मकारं चिन्तयेद् बुधः ।
अकारः स्यादुकाराख्यस्तथोकारो मकारकः ॥
मकारः स्यात् तथोकारः सवाहनसंशयः ? ।
प्रणवस्यापरं रूपं मुक्तबोधार्थमादरात् ॥
अर्धमात्रास्वरूपं यच्छुद्धं तत्रोच्यते बुधाः ।
ज्ञात्वा विमुच्यते जन्तुर्नान्यथा कर्मको(टि) भिः ॥
सम्प्रदायानुसारेण प्रोक्तं बोधस्य सिद्धये ।
एतद्विचिन्त्य यो वेत्ति स जीवन्नेव मुच्यते ॥
परिपूर्णब्रह्मसंख्याभागी स्यान्नात्र संशयः ।

Colophon :

गौडपादाख्यमुनिना पञ्चीकरणनामिका ।
यतीनां ज्ञानसिद्ध्यर्था कृता चेयं ... ... कारिका ॥

Author: Sureśvarācārya.

Remarks—This work extends over four leaves only and its subject-matter is compressed in 64 Anuṣṭup verses. It has been printed in Bombay.

प्रणवार्थकारिका ॥

551 C. PRAṆAVĀRTHAKĀRIKĀ.

Substance—Palm leaf. Size—14″×2″. Leaves—3. 9 lines per page and 25 letters per line. Script—Grantha. No. of Granthas—45. Complete.

Subject—Same as No. 551 A.

Beginning:

ओङ्कारः सर्व्ववेदानां सारस्तत्वप्रका (शकः) ।
तेन चित्तसमाधानं मुमुक्षूणां प्रकाश्यते ॥
आसीदेकं परं ब्रह्म नित्यमुक्तमविक्रियम् ।
तच्च मायासमावेशाद्बीजमव्याकृतात्मकम् ॥
तस्मादाकाशमुत्पन्नं शब्दतन्मात्ररूपकम् ।
स्पर्शात्मकस्ततो वायुस्तेजो रूपात्मकं ततः ॥
आपो रसात्मिकास्तस्मात्ताभ्यो गन्धात्मिका मही ।
शब्दैकगुणमाकाशं शब्दस्पर्शगुणो मरुत् ॥

End:

आनन्दममलं शुद्धं मनोवाचामगोचरम् ।
वाच्यवाचकनिर्मुक्तं हेयोपादेयवर्जितम् ॥
प्रज्ञानघनमानन्दं वैष्णवं परमं पदम् ।
पुनरावृत्तिरहितं कैवल्यं फलमश्नुते ॥

इदं प्रकरणं यत्नाज्ज्ञातव्यं भगवत्तमैः ।
अमानित्वादिनियमैर्गुरुभक्तिप्रसादतः ॥
इमां प्रयत्नतो योगी सन्ध्यासु.... .... ।
समभ्यसेदिहामुत्र भोगानासक्तधीः सुधीः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यशंकरभगवत्पूज्यपादशिष्यश्रीसुरेश्वराचार्यविरचितं पञ्चीकरणवार्त्तिकं समाप्तम् । हरिः ।

Author: Sureśvarācārya.

Remarks—This is a small codex embodying 45 verses. The colophon indicates that the designation of this work is Pañcīkaraṇa Vārtika.

॥ आत्मज्ञानोपदेशविधिः ॥

552. ĀTMAJÑĀNOPADEŚAVIDHI.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—7. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—100.

Subject—Exposition of the realism of Ātma in the light of Advaita Siddhānta.

Beginning :

हरिः । श्रीगणपतये नमः ।

अथात्मज्ञानोपदेशविधिं व्याख्यास्यामः । मुमुक्षवे श्रद्धानाय यतये वीतरागाय । आत्मलाभात् परलाभाभावात् ।

द्रष्टुर्दृश्योऽन्य इति प्रसिद्धो लोके । अथ क आत्मेति । देह-स्तावदात्मा न भवति । रूपादिमत्त्वेनोपलभ्यमानत्वात् घटा-दिवत् । यथा घटादयो रूपादिमन्तश्चक्षुरादिकरणैरुपलभ्यन्ते, एवं देहोऽपि रूपादिमांश्चक्षुरादिकरणैरूपलभ्यते ।

End:

निर्विज्ञातपदार्थद्वयस्यानिर्ज्ञातार्थाभिव्यञ्जकत्वेन स्वतःसिद्ध-त्वादात्मनः सोऽहमिति स्मृत्या प्रतिसन्धानात् पुण्यापुण्यसंब-न्धाभावाच्च स्थानत्रयव्यतिरिक्तत्वं नित्यत्वं शुद्धत्वं बुद्धत्वम् अवि-क्रियत्वम् एकत्वमात्मनः स्वानुभवेनैव मम सिद्धमिति जानामि । विद्वानाचार्यप्रसादादज्ञाननिद्राप्रबुद्धः संसारविनिर्मुक्त इति विद्वानेष आत्मज्ञानोपदेशविधिमेवं ज्ञात्वा कृतकृत्यो भवति । नान्यथेति ज्ञात्वा कृतकृत्यो भवति ।

Colophon:

इति चतुर्थः खण्डः । आत्मज्ञानोपदेशविधिः स-माप्तः ।

Author: Śaṅkarācārya.

Remarks—A short study of the soul is attempted here. The work is attributed to Śaṅkarācārya, vide.page 4267, part I, Vol. IV Skt: A, in M T C. The beginning and closing passages quoted above agree with those of the MS. avaliable at Madras. The author's name is furnished by the colophon in it:

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राज-काचार्यस्य श्रीशङ्करभगवतः कृतौ आत्मज्ञाने चतुर्थः खण्डः ।

॥ आत्मज्ञानोपदेशविधिः ॥

553 A. ĀTMAJÑĀNOPADEŚAVIDHI.

Substance—Palm leaf. Size—14″ × 2″. Leaves—3. 18 lines per page and 56 letters per line. Script—Malayāḷam No. of Granthas—100.

Subject, Beginning, End, Colophon—Same as No. 552.

Author:

Remarks—Same as No. 552.

॥ नारदगीता ॥

553 B. NĀRADAGĪTĀ.

Substance—Palm leaf. Size—14″ × 2″. Leaves—3. 12 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—100.

Subject—The effects of chanting the *Mantras* Aṣṭākṣara and Praṇava.

Beginning:

ऋषयः—

प्रत्यक्षमक्षराण्यत्र सर्वेवोपलभामहे ।
कथमष्टाक्षरत्वं स्यादेतद् ब्रूहि महामुने ॥

नारदः—

तत्रोच्चरादणस्यादिर्बिन्दुमान् विष्णुरन्ततः ।
बीजमष्टाक्षरस्य स्यात् तेनाष्टाक्षरता भवेत् ॥

अष्टाक्षरोक्तका ...षु न्यासादिषु यथाश्रुतम् ।
प्रणवादीनि तान्यष्टावक्षराणि प्रकल्पयेत् ॥
संहारः स्यान्मुमुक्षूणामुत्पत्तिर्ब्रह्मचारिणाम् ।
गृहस्थानां तु सर्वेषां स्थितिरेव विधीयते ॥

End:

प्राणमुन्मोचयेम् पश्चान्महाप्राणे खमध्यमे ।
महातीते जगत्प्राणे शून्ये नित्ये पदे ध्रुवे ॥
आकाशे परमानन्दे स्वात्मानं योजयेद्धिया ।
मूर्ध्नि रन्ध्राद्विनिष्क्रान्तं विद्युत्पुञ्जसमं महत् ॥
निरञ्जनं परं ज्योतिः सूर्यबिम्बं गमिष्यति ।
वैश्वानरः स्वयं ज्योतिर्ब्रह्मरन्ध्रविनिर्गतः ॥
यथैव महतीं वह्निररणीं संदहेत् तथा ।
सन्तापयति स्वं देहमापादतलमस्तकम् ॥
ब्रह्मैवासौ भवेदात्मा न पुनर्जन्मभाग् भवेत् ।

Colophon :

समाप्तं चैतत् ॥

Author:

Remarks—The significance of Gāyatrī is expounded in a broken leaf at the close of the Ms. The following verse occurs after the colophon :

"शिवाय परिपूर्णाय शीतलाय चिदात्मने ।
चित्तनाथाय ...य तेजसे ब्रह्मणे नमः ॥"

—

॥ आत्मबोधः ॥

554. ĀTMABODHA.

Substance—Palm leaf. Size—2⅝" × 1⅜". Leaves—13. 7—8 lines per page and 11 letters per line. Script—Malayāḷam. No. of Granthas—69. Incomplete.

Subject—A compendium of all philosophical maxims.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

तपोभिः क्षीणपापानां शान्तानां वीतरागिणाम् ।
मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते ॥

End:

दिग्देशकालाद्यनपेक्ष्य सर्वगः
शीतादिहृन्नित्यसुखं निरुक्तम् ।
यः स्वात्मतीर्थं भजते विनिष्क्रियः
स सर्ववित् सर्वगतोऽमृतो भवेत् ॥

सुषुप्तवज्जाग्रति यो न पश्यति
द्वयं तु पश्यन्नपि चाद्वयत्वतः ।
तथा च कुर्वन्नपि निष्क्रियश्च यः
स आत्मविन्नान्य इतीह निश्चयः ॥

तत्त्वम्महावाक्यभवैक्यसंविदा

... ...

Colophon:

Author—Śaṅkarācārya, as is evident from the following commentary on No. 555.

Remarks—This Ms. is available in print as the 15th volume in the Śaṅkara Granthavali Series at Śrīraṅgam. A complete Ms. of the work has been noticed in MTC. This work is the same as that described under No. 4547, D C S Ms. (Vol. IX MTC.) The introductory stanza as found in the Ms. available at Madras is as follows:—

द्वाभ्यां विभ्राजमानं वरकनकमहाशृङ्खलाभ्यां कराभ्यां
बीजापूरादि बिभ्रद्दशभुजमरुणं नागभूषं त्रिनेत्रम् ।
सन्ध्यासिन्दूरवर्णं स्तनभरनामितं तुन्दिलं स ... ...
... ... स्तौमि देवं गणेशम् ॥

॥ आत्मबोधः (दीपिकोपेतः) ॥

555. ĀTMABODHA
with Dīpikā

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 2''$. Leaves—9. 11—13 lines per page and 56 letters per line. Script—Grantha. No. of Granthas—375. Complete.

Subject—Same as No. 554.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।
शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।

सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥

तत्र भगवान् शङ्कराचार्यः उत्तमाधिकारिणां वेदान्तप्रस्थानत्रयं निर्माय तदवलोकनासमर्थानां मन्दबुद्धीनामनुग्रहार्थं सर्ववेदान्तसिद्धान्तसङ्ग्रथनमात्मबोधाख्यं प्रकरणं दिदर्शयिष्यन् प्रतिजानीते तपोभिरिति ।

End :

दिग्देशकालाद्यनपेक्ष्य सर्वगः
शीतादिहृन्नित्यसुखं निरञ्जनः ।
यः स्वात्मतीर्थं भजते विनिष्क्रियः
स सर्ववित् सर्वगतोऽमृतो भवेत् ॥

यो विनिष्क्रियः परमहंसः स्वात्मतीर्थं भजते सेवते । स सर्ववित् सर्वज्ञः सर्वत्रगतः परमात्मस्वरूपत्वादमृतः मुक्तो भवेत् । कथम्भूतं स्वात्मतीर्थं दिग्देशकालाद्यनपेक्ष्य सर्वगतं शीतादिद्वन्द्वदुःखादि हरतीति शीतादिहृत् नित्यसुखं मोक्षानन्दप्रापकत्वात् इतरतीर्थेषु तद्विपरीतं द्रष्टव्यम् । तस्मादात्मतीर्थंरतस्य न किञ्चिदवशिष्यत इति भावः ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पादाचार्यशिष्यशङ्करभगवत्पादाचार्यविरचितात्मबोधप्रकरणस्य श्रीविश्वेश्वरपण्डितविरचितदीपिका समाप्ता ।

शुभमस्तु ।

Author : Text—Śaṅkarācārya. Com : Viśveśvarapaṇḍita.

Remarks—At the close of the Ms. two verses from

Vākyavṛtti are quoted with their commentary. The text has been printed with a Malayāḷam commentary as No. 11 S C M B S. in Trivandrum.

॥ आत्मानात्मविवेकः ॥

556. ĀTMĀNĀTMAVIVEKA.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 2''$. Leaves—4. 9 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—70. Complete.

Subject—An inquiry into the distinction between Ātma and Anātma.

Author—Śaṅkarācārya.

Remarks—The Ms. is much damaged. At its beginning a *prakaraṇa* entitled Aparokṣānubhūti is also included. It is printed S G S. at Śrīraṅgam.

॥ आत्मानात्मविवेकः ॥

557. ĀTMĀNĀTMAVIVEKA.

Substance—Palm leaf. Size—$3\frac{5}{8}'' \times 1\frac{1}{2}''$. Leaves—

4. 8 lines per page and 11 letters per line. Script—Malayāḷam. No. of Granthas—22. Complete.

Subject—Author—Same as No. 556.

Remarks—The Ms. opens with a lacuna in the beginning. Four lines commencing with, "निमित्तं मनश्चक्षुरादिप्रवृत्त" are also added at the end.

॥ इष्टसिद्धिविवरणम् ॥

558 A. IṢṬASIDDHIVIVARAṆAM.

Substance—Palm leaf. Size—$12\frac{1}{2}'' \times 2''$. Leaves—104. 14 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—4500. Incomplete.

Subject—Same as No. 551.

Beginning:

. . . . .न्त्यं न सिध्यति । तथापि कालतस्तावत्सि-
ध्यति जनिमत एव पू. . . . . .दृदर्शनादित्युक्तम् ।
इदानीमितरदपि सिध्यतीत्याह—अत एवेति । अनुभूतिनिर्देशतो....
. . . . .न यदेवं न तदेवं यथा घटादीत्यर्थः ।
विपक्षे बाधका.... .... योजकत्वमित्याशङ्क्याहा-
न्यथेति । ननु अशिथिलमूलत्वाच्चकोभासोऽयमित्याशङ्क्याह—
..........प्रमाणमिति ।

End:

यच्चोक्तं तर्हि निवृत्तिनिश्चये न स्यादिति, तत्राह—निवृत्तिरिति । प्रवृत्तिनिवृत्त्योर्वास्तवत्वाभावे बन्धमोक्षौ न स्यातामित्युक्तम् । तत्राह—कल्पिताविति । स्वपक्षमुपसंहरति—तस्मादिति । द्वैतं पुंभेदश्च सप्तमाध्यायोक्तदोषस्त्वया नेष्यते चेत्तर्हि कथं तव व्यवस्थालाभ इत्याशङ्क्याह.... ....

Colophon:

इति इष्टसिद्धिविवरणे सप्तमोऽध्यायः ।

Author:

Remarks—This Ms. is wanting in its beginning. Most of the leaves in the middle are damaged.

॥ इष्टसिद्धिविवरणम् ॥

558 B. IṢṬASIDDHIVIVARAṆAM.

Substance—Palm leaf. Size—$12\frac{1}{2} \times 2''$. Leaves—161. 10—15 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—4500. Incomplete.

Subject—Same as No. 551 A.

Beginning:

....ततश्च वस्तुपरिच्छेदिनोऽजत्वाभावात् सिद्धा व्याप्तिरित्यर्थः । ननु तर्हि परमाणुषु व्यभिचार इत्याशङ्क्याह—नाणूनां चेति । पृथिव्यप्तेजः-

परमाणवो नाजाः रूपवत्त्वाद् घटादिवत् । वायवीयाः परमाणवो नाजाः । स्पर्शवत्त्वात् घटवत् । अन्यथा चात्मवदरूपादिमत्त्व-प्रसंगो बाधक इति भावः ।

End:

... ...पूर्वं जाग्रत्स्वप्नेऽपि जडसत्वमभ्युप-गम्योक्तमिदानीं तदभ्युपगमं त्यजति-न च जडस्येति । ननु यदि भुक्त्यादि जडं नास्ति तर्हि... ... ...कथ भुक्त्या-द्यवस्थावन्नात्मज्ञानजन्यत्वादित्याह प्रसिद्धोऽन्यथात्वे सिद्धान्तै-कदेशाभिमतमुदाहरणमाह—मृदवस्थेति । ....त्वेन श्लोकं योजयति भूण्वित्यादिना । ननु दीर्घप्रभान्यायेन शुक्तीद-मंशपर्यन्तमात्माविद्याप्रम.... ....
....

Colophon:

Author:

Remarks — Some leaves in the beginning are missing. The Ms. is very much decayed.

॥ इष्टसिद्धिविवरणम् ॥

559. IṢṬASIDDHIVIVARAṆAM.

Substance—Palm leaf. Size—$14\frac{1}{4}'' \times 2''$. Leaves—122. 11 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—4500. Incomplete.

Subject—Same as No. 551.

Beginning:

....शत इति व्यवहाराभावापातान्मनः-संयुक्तात्मसमवायमात्राच्च न संविदावेदने तत्तत्संविदामात्मपरिमाणादेश्चापरोक्षप्रसङ्गः। एकस्मिन् द्रव्ये युगपदवान्तरजातीयगुणद्वयसमवायाद्यनुपलम्भाच्च न पूर्वसंविदसद्भाव एवोत्तरसंवित्सद्भावस्तदभावे च न वर्तमानसंवेदनं स्यात्। पूर्वसंयोगविनिवृत्तेश्च न घटावच्छिन्नसंवित्संवेदनं स्यात्।

End.

यच्चोक्तं तर्हि निवृत्तिनिश्चयो न स्यादिति तत्राह--निवृत्तिरिति। प्रवृत्तिनिवृत्त्योर्वास्तवत्वाभावे बन्धमोक्षौ न स्यातामित्युक्तम्। तत्राह कल्पिताविति। स्वपक्षमुपसंहरति तस्मादिति। द्वैतं पुंभेदश्च सप्तमाध्यायोक्तदोषस्त्वया नेष्यते चेत्तर्हि कथं तव व्यवस्थाभाव इत्याशङ्क्याह तत्रेति। अवस्तुतोऽपरमार्थतः। क्वचिदपि व्यवस्था मया नेष्यत इति न। किन्तु सर्वापीष्यते मया भूमौ दृष्टत्वादित्यर्थः। विशेषतश्चाविद्याप्रसाधने कारणमाह—प्रत्यक्षादिसिद्धिमात्रमभ्रमेऽर्थजातं संक्षिप्याह—मुक्तिरित्यादिना।

Colophon:

इतीष्टसिद्धिविवरणेऽष्टमोऽध्यायः।

Author—Com: Jñānottama.

Remarks—This Ms. is lacking in its beginning. It is printed as No. LXV in G. O. S.

The succeeding lines:

" चोलेषु मङ्गलमिति प्रथितार्थनाम्नि
ग्रामे वसन् पितृगुरोरभिधां दधानः ।
ज्ञानोत्तमः सकलदर्शनपारदृश्वा
व्याख्यामिमां वितनुते स्फुटमिष्टसिद्धेः ॥"

from the explanatory portion disclose the commentator's name.

॥ उपनिषदः ॥

560. UPANISADS.

Substance—Palm leaf. Size—14″×2″. Leaves—100. 9 lines per page and 46 letters per line. Script—Grantha. No. of Granthas—2400.

Remarks—This work contains the following ten Upaniṣads—

ईश–केन–कठ–प्रश्न–मुण्डक–माण्डूक्य–
तैत्तिरीय–छान्दोग्य–ऐतरेय–बृहदारण्यकानि ।

The following verses occur at the end.

"ईशकेनकठप्रश्नमुण्डमण्डूक्यतित्तिरः ।
छान्दोग्यमैतरेयं च बृहदारण्यकं दश ॥
[illegible]लकैवल्यश्वेताश्वा हंस आरुणिः ।
[illegible] नारायणो हंसो बिन्दुर्नादशिरः शिखा ॥

कालाग्निरुद्रो मैत्रेयी सुबालाक्षुरिकामहः ।
कौषीतकी मैत्रायणी बृहज्जाबालतापिनी ॥"

॥ उपनिषदः ॥

561. UPANIṢADS.

Substance—Palm leaf. Size—$8\frac{3}{4}'' \times 1\frac{1}{2}''$. Leaves—50. 8 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—650.

Remarks—The following Upaniṣads are included in this Ms. (1) Katha (2) Eśāvāsya (3) Rāmottaratāpanī (4) Muṇḍakā (5) Praśna (6) Māṇḍūkya (7) Nārāyaṇa (8) Kena. The Ms. begins only from the middle of the Kathopaniṣad.

॥ उपनिषदः ॥

562 A. UPANIṢADS.

Substance—Palm leaf. Size—$13'' \times 2''$. Leaves—37. 10 lines per page and 38 letters per line. Script—Grantha. No. of Granthas—1000.

Beginning :

चित्रो ह वै गार्ग्यायणिर्यक्ष्यमाण आरुणिं वव्रे । स ह पुत्रं श्वेतकेतुं प्रजिघाय याजयेति । तं हासीनं पप्रच्छ । गौतमस्य पुत्रोऽस्ति सुव्रतं लोके यस्मिन् मा यास्यस्यन्यमहो वा तस्य मा लोके यास्यसीति । स होवाच नाहमेतद् वेद । हन्ताचार्यं पृच्छानीति । स ह पितरमासाद्य पप्रच्छेदिति मा प्राक्षीत् । कथं प्रतिब्रवाणीति ।

End :

महदहङ्कारपृथिव्यप्तेजोवाय्वाकाशात्मकेन बृहद्रूपेणाण्डकोशेन कर्पज्ञानार्थरूपतया भासमानमद्वितीयमखिलोपाधिविनिर्मुक्तं सर्वशक्त्युपबृंहितम् अनाद्यन्तं शुद्धं शिवं शान्तं निर्गुणमित्यादि । वाच्यमनिर्वाच्यं चैतन्यं ब्रह्म ईश्वर इति च । एतल्लक्षणं ब्रह्मैव स्वशक्तिं प्रत्यभिधेयामाश्रित्य लोकान् सृष्ट्वा प्रविश्यान्तर्यामित्वेन ब्रह्मादीनां बुद्धीन्द्रियनियन्तृत्वादीश्वरः जीव इति च । ईश्वर एव ब्रह्मविष्णवीशानेन्द्रादिनामरूपद्वारा॰ स्थूलोऽहमित्याद्यध्यासवशादेव सोऽयमेकोऽपि देहं... ... ...

Colophon :

इति पर्यङ्कविद्या समाप्ता ।

पिण्डोपनिषत् समाप्ता ।

आत्मोपनिषत् समाप्ता ।

कठश्रुतिः समाप्ता ।

संन्यासोपनिषत् समाप्ता ।

Author :

Remarks—This Ms. covers Paryaṅkavidyā, Piṇḍa, Ātma, Kaṭha, Sannyāsa, Paiṅgala, Brahmavidyā, Nādabindu, Bhikṣuka, Rahasya, Vajra, Sūci, Bhāva, Tripura, and Śivatattvopaniṣads.

॥ गायत्रीहृदयम् ॥

562 B. GĀYATRĪHṚDAYAM.

Substance—Palm leaf. Size—13″ × 2″. Leaves—13. 9 lines per page and 38 letters per line. Script—Grantha. No. of Granthas—300.

Subject—Exposition of Gāyatrīdevatā.

Beginning :

अस्य श्रीगायत्रीहृदयमहामन्त्रस्य वसिष्ठ ऋषिः । अनुष्टुप् छन्दः । ब्रह्मविद्यास्वरूपिणी गायत्री देवता । अं बीजम् । उं शक्तिः । मं कीलकम् । यं ज्ञानात्मने अङ्गुष्ठाभ्यां नमः । यं तर्जनीभ्यां स्वाहा । गायत्री मध्यमाभ्यां नमः । वौषट् हृदयम् । अनामिकाभ्यां नमः । वौषट् ब्राह्मणः । कनिष्ठिकाभ्यां नमः । वौषट् प्रयतः पठेत् । करतलकरपृष्ठाभ्यां फट् । एवं हृदयादिन्यासषडङ्गन्यासः । भूर्भुवः[illegible]मिति दिग्बन्धः ।

ध्यानम्—

हंसासीनाधराङ्गामुषसि मुनिवरैश्चामरैः सेव्यमानां
स्निग्धैर्भक्तैरनेकैः श्रुतिवचनपरैश्चाट्टुपाठैः सुपूर्णाम् ।
अक्षस्रक्कुण्ठिताङ्गामभयवरदयुक्साङ्गयज्ञोपवीतां
हारं काञ्चीं दधानां कनकयुतनिभां रक्तवासां नमामि ॥

End :

अभोज्यभोजनात् पूतो भवति । अगम्यागमनात् पूतो भवति । सुरापानात् पूतो भवति । सुवर्णस्तेयात् पूतो भवति । पतितसम्भाषणात् पूतो भवति । गुरुतल्पगमनात् पूतो भवति । अब्रह्मचारी सुब्रह्मचारी भवति । अनेन गायत्रीहृदयेनाधीतेन क्रतुशतेनेष्टं भवति । षष्टिर्गायत्र्याः शतसहस्राणि जप्तानि फलानि भवन्ति । अष्टौ ब्राह्मणान् सम्यग् ग्राहयेत् । अथ सिद्धिर्भवति ।

य इदं गायत्रीहृदयं ब्राह्मणः प्रयतः पठेत् ।
सर्वपापैः प्रमुच्येत ब्रह्मलोके महीयते ।
ब्रह्मलोके महीयते इत्याह भगवान् ब्रह्मा ।

हरिः । ॐ तत् सत् ।

Colophon :

गायत्रीहृदयं सम्पूर्णम् ।

Author :

Remarks—The Ms. opens with the explanation of Savitri and Gayatri and then Brahmagayatri is introduced.

॥ उपनिषदः ॥

563. UPANIṢADS.

Substance—Palm leaf. Size—16″ × 1″. Leaves—11. 5 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—150.

Subject—The absolutism of the Supreme Spirit.

Author :

Remarks—The Māṇḍūkyopaniṣad, Garbhopaniṣad, Ṛgvedakaivalyopaniṣad and Kālāgnirudropaniṣad are embodied in this Ms. The work is printed in N. S. Press, Bombay.

॥ उपनिषद्भाष्यम् ॥

564. UPANIṢADBHĀṢYAM.

Substance—Palm leaf. Size—17″ × 1½″. Leaves—108. 10—11 lines per page and 58 letters per line. Script—Grantha. No. of Granthas—3200. Complete.

Subject—Same as No. 563.

Colophon :

इति श्रीगोविन्दभगवत्पादपूज्यशिष्यश्रीशंकरभगवत्पादकृतौ छान्दोग्योपनिषद्विवरणे षष्ठप्रपाठकः समाप्तः ।

हरिः ॐ ।

Author—Śaṅkara Bhagavatpāda.

Remarks—The Ms. contains commentaries on Kena, Muṇḍaka, Taittirīya, and Chāndogya. It has been printed in S G S at Śrīraṅgam.

॥ ऋजुविवरणम् (पञ्चपादिकाविवरणव्याख्या) ॥

565. ṚJUVIVARAṆAM.

(A commentary on Pañcapādikāvivaraṇam).

Substance—Palm leaf. Size—$21\frac{1}{3}'' \times 2''$. Leaves—42. 10 lines per page and 88 letters per line. Script—Malayāḷam. No. of Granthas—2310. Incomplete.

Subject—A disquisition on Vedāntic maxims.

Colophon :

इति स्वामीन्द्रपूर्णपूज्यपादशिष्यजनार्दनात्मजगुरुकुमारिलनयपारावारपारग(स)र्वज्ञविष्णुभट्टोपाध्यायकृतौ ऋजुविवरणे लक्षणाभाष्यं समाप्तम् ॥

Author : Text—Prakāśātmayati.

Com : Viṣṇu Bhaṭṭopādhyāya.

Remarks—The work is printed by E. T. Lazarus & Co., Benares. Another commentary on the original, Tattvadīpana by Akhaṇḍānandamuni has been noticed in MTC. Vide p. 1080 Vol. II, part 1 Skt. A.

॥ किंज्योतिःश्लोकः (सव्याख्यः) ॥

566. KIÑJYOTIŚŚLOKA
with commentary.

Substance—Palm leaf. Size—11¼″ × 2″. Leaves—3. 11 lines per page and 56 letters per line. Script—Malayālam. No. of Granthas—77. Complete.

Subject—Exposition of the greatness and supremacy of Brahma.

Beginning :

श्रीः ब्रह्मणे नमः ॥

वेदा निःश्वसितं यस्य पञ्चभूतानि वीक्षिका ।
स्मितं चराचरं यस्य तं रामं शरणं भजे ॥

ब्रह्मा मङ्गळदेवतापतिरयं चन्द्रार्धचूडोऽथवा
व्यासः श्रीशुक एव नूतनतरो लोकैः सदालोच्यते ।
कारुण्यामृतवारिधिं त्रिजगतां कल्याणमूर्तिं गुरुं
सेवे तारितशिष्यवर्गमनिशं गोपालयोगीश्वरम् ॥

श्रीमद्गोपालयोगीन्द्रप्रसादादेव केवलम् ।
व्याख्यानमेकश्लोकस्य क्रियते स्वात्मदीपनम् ॥

इह खलु भगवान् सर्वज्ञः,

"अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित् ।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरत्यगात् ॥"

इत्यादिगुणविशिष्टो भगवत्पादाभिधानः दुर्वादिदर्वीकरमन्त्रराजः शङ्कराचार्यस्तीर्थैरिव त्रिभुवनं पावयन्

सद्बैर्धेरिव संरक्षयन् चान्द्रैरिवाप्यायन् कल्याणचरित्रै रत्नैरिव अलंकुर्वन् शश्वद् विश्वं विचचार ।

End :

तस्मादहं ब्रह्मास्मीति नित्यशुद्धबुद्धमुक्तस्वभावपरमानन्दब्रह्मै-वाहमस्मीति भूत्वा कृतकृत्यो भवेत् ।

श्रवणमननशीलान्नित्यमेकान्तवासाद्
गुरुवरमपि देव त्वन्मयं त्वत्प्रसादात् ।
निजसुखजलराशौ गाढमग्नो न जाने
किमिह वचनजालैस्त्वां च सीतासमेतम् ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमद्गोपालयोगीन्द्रशिष्य-श्रीमत्स्वयंप्रकाशमुनिना विरचितैकश्लोकव्याख्या समाप्ता ।

Author—Text : Śaṅkarācārya.

Com : Svayamprakāśamuni.

Remarks—The idea of the realism of Brahma is compressed in the śloka beginning with किं ज्योतिस्तव भानुमानहनि —'.

॥ कौषीतकोपनिषत् ॥

567. KAUṢĪTAKOPANIṢAD.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times \frac{1}{2}''$. Leaves—13. 8 lines per page and 44 letters per line. Script—Grantha. No. of Granthas—286.

Subject—An inquiry into the knowledge of the Supreme Spirit.

Colophon :

इति कौषीतकोपनिषदि चतुर्थोऽध्यायः। समाप्ता चोपनिषदियम्।
हरिः ॐ ।

Author:

Remarks—This work is available in print. A commentary entitled "Dīpikā" by Śaṅkarānanda may be read with advantage in this connection. The Upaniṣad pertains to the Śāṅkhāyanāraṇyaka. The great Vedic commentator Sāyaṇa has written a commentary on this Upaniṣad.

॥ कौषीतकोपनिषत् ॥

568. KAUṢĪTAKOPANIṢAD.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—24. 8 lines per page and 24 letters per line. Script—Grantha. No. of Granthas—286.

Subject etc. Same as No. 567.

॥ कौषीतकोपनिषद्दीपिका ॥

569. KAUṢĪTAKOPANIṢADDĪPIKĀ.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—117. 8 lines per page and 32 letters per line. Script—Grantha. No. of Granthas—1800.

Subject—Same as No. 567.

Beginning:

आनन्द आत्मा स्थिरजङ्गमाना-
मस्त्यत्र चित्रस्तमहं प्रणम्य ।
कौषीतकीब्राह्मणमात्मविद्या-
पदावलोकात् प्रकटीकरोमि ॥

समधिगतमेतदभिघर्षणादीनां कर्मणां तैजसस्य द्रव्यस्यादर्शादेः शुद्धिहेतुत्वम् । तथा चाग्निहोत्रादीन्यश्वमेधान्तानि कर्माणि तैजसस्यान्तःकरणस्य शुद्धिहेतवः । विविदिषासाधनत्वस्य श्रुतितोऽप्यवगमाच्च ॥

End:

सर्वं न सर्वस्य हितं प्रियं वा
व्यवस्थितं येन लभामहेदम् ।
प्रिया हितास्तेन विमुक्तिभाजां
पदावलोका विहितास्ततोऽस्मी ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य श्रीशङ्करानन्दभगवतः कृतौ कौषीतकीब्राह्मणोपनि-

षड्दीपिकायां चतुर्थोऽध्यायः समाप्तः । श्रीपद्मनाभोऽवतु नः ।

[Tamil/Grantha script line]

Author—Śaṅkarānanda.

Remarks — The author is a commentator on almost all the Upaniṣads and the Ms. in question is one among them. His elucidation of Gītā is specially noteworthy. Vidyāraṇya himself observes that the former was his preceptor.



॥ छान्दोग्योपनिषदृजुविवरणम् ॥

570. CHĀNDOGYOPANIṢADṚJUVIVARAṆAM.

Substance—Palm leaf. Size—18½″ × 1¾″. Leaves —104. 10—11 lines per page and 60 letters per line. Script—Malayāḷam (5 prakaraṇas) and Grantha (3). No. of Granthas—4000.

Subject—Explanation of the Chāndogyopaniṣad from Advaita point of view.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

"ओमित्येतदक्षरमि"त्याद्यष्टाध्यायी छान्दोग्योपनिषत् । तस्याः संक्षेपतोऽर्थजिज्ञासुभ्यः ऋजुविवरणमल्पग्रन्थं चेदमारभ्यते । तत्र सम्बन्धः समस्तं कर्माधिगतं प्राणादिदेवताविज्ञानसहितमार्चिरादि-

मार्गेण ब्रह्मप्रतिपत्तिकारणं, केवलं च धूमादिमार्गेण चन्द्रलोकप्रतिपत्तिकारणं, स्वभावप्रवृत्तानां च मार्गद्वयपरिभ्रष्टानां कष्टाधोगतिरुक्ता ।

End :

कुटुम्ब एतत् सर्वं कुर्वन् यावदायुषं यावज्जीवं यथोक्तेन प्रकारेण एवं वर्तयन् ब्रह्मलोकमभिसम्पद्यते देहान्ते । न च पुनरावर्तत इति पुनरावृत्तेः प्राप्तायाः प्रतिषेधात् कार्यब्रह्मलोकमभिसम्पद्य यावद्ब्रह्मलोकस्थितिस्तावत् तत्रैव तिष्ठति । प्राक् ततो नावर्तते इति । द्विरभ्यास उपनिषद्विद्यापरिसमाप्त्यर्थः ।

Colophon:

इति श्रीगोविन्दभगवत्पादपूज्यशिष्यशङ्करस्य कृतौ छान्दोग्योपनिषद्विवरणे अष्टमः प्रपाठकः समाप्तः । हरिः ॐ । शुभमस्तु । श्रीगुरुभ्यो नमः ॥

രംഗനാഥൻ സ്വഹസ്തലിഖിതം ഷഷ്ഠം സപ്തമം അഷ്ടമം അദ്ധ്യായത്രയം ഗ്രന്ഥം [illegible]

Author—Śaṅkarācārya.

Remarks—The Ms. is in good condition. The first 44 leaves are numbered consecutively. The concluding portion of the fourth *Prapāṭhaka* on Fol. 36 contains the following colophon :

"इति श्रीपरमहंसपरिव्राजकश्रीशुद्धानन्दपूज्यपादशिष्यश्रीभगवदानन्दज्ञानकृतौ छान्दोग्योपनिषद्विवरणे चतुर्थः प्रपाठकः समाप्तः ।"

revealing another appellation of the author. A few lines in the beginning of the 3rd *Prapāṭhaka* are missing.

॥ तत्त्वकौस्तुभः ॥

571. TATTVAKAUSTUBHA.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—6. 10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—200. Incomplete.

Subject—Refutation of Dvaita philosophy and substantiation of Advaita.

Beginning:

हरिः ओम् ।

नमः कैवल्यगुरवे मम विज्ञानदायिने ।
नमः शिवाय साम्बाय साक्षिणे प्रत्यगात्मने ॥
फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।
भगवत्पादभाष्याब्धेस्तत्त्वकौस्तुभमुद्धरे ॥

इह केचित् पाञ्चरात्राद्यागमांस्तदनुसारिपुराणभागांश्चोपजीव्य तदधिकारितत्त्वमनालोचयन्तः श्रौतस्मार्तमार्गं त्यजन्ति, त्याजयन्ति च। तान् सम्यक् शिक्षयितुं तन्त्राधिकारी तावन्निरूप्यते । तत्रायं सिद्धान्तः—

शापाद्वा गौतमादीनां पापाद्वा महतो नराः ।
ये गता वेदबाह्यत्वं ये तु सङ्कीर्णयोनिजाः ॥
तेऽधिक्रियन्ते तन्त्रादौ स्त्रीशूद्राद्या यथायथम् ।

End:

अहृदयवाचामहृदयवाच इति न्यायेन पिशाचभाषया पिशाचं

बोधयितुं दिङ्मात्रमुक्तम्; न तु वास्तवाभिप्रायेणेति क्षन्तव्यमिदं साहसिकत्वं गुणम ह्यैः (?) सूरिभिः ।

Colophon:

इति भट्टोजिदीक्षितकृतौ तत्त्वकौस्तुभे प्रथमः परिच्छेदः ।

Author—Bhaṭṭoji Dīkṣita.

Remarks—Only the first *Pariccheda* is extant here. The following quotation on p. 3417, Vol. IX, M T C:

"केरलीवेङ्कटेन्द्रस्य निर्देशाद् विदुषां मुदे ।
ध्वान्तोच्छित्त्यै पटुतरस्तन्यते तत्त्वकौस्तुभः ॥"

proves that this work was composed at the behest of Veṅkaṭendra of Keraḷa. The Ms. noticed in M T C. Vol. I, also contains the 1st *Pariccheda* only, Vide p. 2546, Part I, Skt. C.

॥ तत्त्वप्रदीपिका ॥

572. TATTVAPRADĪPIKĀ.

Substance—Palm leaf. Size—$11\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—236. 9 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—4000. Incomplete.

Subject—Same as No. 563.

Beginning:

हरिः । श्रीगणपतये नमः ।

स्तम्भाभ्यन्तरगर्भभावनिगदव्याख्याततद्वैभवो
यः पञ्चाननपाश्वजन्यवपुषा व्यादिष्टविश्वात्मकः ।
प्रह्लादाभिहितार्थतत्क्षणम.... ....णिः
....सिंहाद्रिचूडामणिः ॥
ज्योतिर्यमाक्षिणामूर्तं व्यामशङ्करशब्दितम् ।
ज्ञानोत्तमाख्यं त.. .. ..सत्यानन्दपदोदितम् ॥
विप्रतिपत्तिव्रातध्वान्तध्वंसप्रगल्भवाचाला ।
(क्रि)यते चित्सुखमुनिना प्रत्यक्तत्त्वप्रदीपिका विदुषाम् ।
प्रमाणनखनिर्भिण्णमहामोहामरारये ।
नम(स्कु)र्मो नृसिंहाय स्वप्रकाशचिदात्मने ॥
अथ कोऽयं स्वप्रकाशशब्दार्थः । किं स्वश्चासौ प्रकाशश्च स्वप्रकाशः ।

End :

भेदाभेदपक्षेषु कार्यकारणभावस्यानिरूपत्वात् स्वरूपवतोऽपि विचारागोचरत्वादनाद्यविद्याविध्वंसितः सकलोऽप्ययं प्रपञ्च इति तद्ग्राहिप्रत्यक्षादिप्रमाणविरोधाभावात् वेदान्तवाक्यं निरपवादमेवाद्वितीये ब्रह्मण्यप(न ?)रोक्षज्ञानं जनयतीति निरवद्यम् ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्यश्रीचित्सुखमुनिविरचितायां तत्त्वप्रदीपिकायां द्वितीयपरिच्छेदः ।

ശ്രീപദ്മനാഭസ്വാമി സഹായം. ശുഭമസ്തു.

Author—Citsukhamuni.

Remarks—This Ms. includes only two *Paricchedas.*
The complete work in 4 *Paricchedas* is printed in

the N. S. Press, Bombay. Inspite of its recent origin the script is not discernible in different places. *Citsukhī* and *Pratyaktattvapradīpa* are its other titles. An incomplete Ms. of the work has been noticed in M T C. also, Vide p. 5783, Vol. 4, Part I.

॥ तत्त्वबोधिनी (संक्षेपशारीरकव्याख्या) ॥

573. TATTVABHODHINĪ

Commentary on Saṃkṣepaśārīraka.

Substance—Palm leaf. Size—17½″ × 2″. Leaves—115. 13 lines per page and 80 letters per line. Script—Grantha. No. of Granthas—8200. Incomplete.

Subject—Same as No. 563.

Beginning:

अनृतजडविरोधि रूपमन्त-
त्रयमलबन्धनदुःखताविरुद्धम् ।
अतिनिकटमविक्रियं मुरारेः
परमपदं प्रणयादभिष्टवीमि ॥

स्वाज्ञानकल्पितलसत्परमेश्वरत्व-
जीवेश्वरत्वकलुषीकृतभूमभावा ।
स्वाभाविकस्वमहिमास्थितिरस्तमोहा
प्रत्यक्चितिर्विजयते भुवनैकयोनिः ॥

प्रत्यक्प्रमाणकमसत्यपरात् प्रभेदं
प्रक्षीणकारणविकारविभागमेकम् ।
चैतन्यमात्रपरमार्थनिजस्वभावं
प्रत्यश्चमच्युतमहं प्रणतोऽस्मि नित्यम् ॥

औत्पातिकी शक्तिरशेषवस्तु-
प्रकाशने कार्यवशेन यस्याः ।
विज्ञायते विश्वविवर्तहेतो-
र्नमामि तां वाचमचिन्त्यशक्तिम् ॥

प्रारम्भाः फलिनः प्रसक्तहृदयो यश्चेत् तिरश्चामपि
नो चेद् विश्वसृजोऽप्यलं विफलतामायान्त्युपायोद्यमाः ।
विघ्नैश्वर्यमतो निरङ्कुशमभूद् यस्यैव विश्वं प्रभोः
सोऽयं विश्वहिते रतो विजयते विघ्नेश्वरो विश्वकृत् ॥

वाग्विस्तरा यस्य बृहत्तरङ्गा
वेलातटं वस्तुनि तत्वबोधः ।
रत्नानि तर्कप्रसरप्रकारात्
पुनात्वसौ व्यासपयोनिधिर्नः ॥

वक्तारमासाद्य यमेव नित्या
सरस्वती स्वार्थसमन्विताऽसीत् ।
निरस्तदुस्तर्ककलङ्कपङ्का
नमामि तं शंकरमर्चिताङ्घ्रिम् ।

यस्य ज्ञानविभूतिरम्बरमरुद्वह्न्यम्बुभूभृत्त्वं
स्वाभाभासितभास्वदादिवपुषा येनेदमाविष्कृतम् ।
यस्मिन् पूर्णसुखानुभूतिमभिमन्यारोपितो वादिभि-
र्विष्णुः शङ्कर आत्मभूरिति भिदा तत् सन्निधत्तां महः ॥

यस्य ज्योतिरभूतवैभवमिदं व्योमाद्यनादिप्रभं
दृश्यासङ्गतमावृतं च तमसा विद्योतयत्यात्मना ।
यस्यानन्दशतांशजीविन इमे ब्रह्मादयश्चेतनाः
सोऽयं विश्वविवर्तभूर्विजयते श्रीमान् नृकण्ठीरवः ॥

अव्यासुरव्याजकृपा नृसिंहपदरेणवः ।
यन्नामनिगमाधीतिरर्थितार्थसमर्थिनी ॥

भूमानन्दसमुद्रतृप्तमनिशं मुग्धं जनं मोहतो
दृष्ट्वैव क्षपिताखिलाघतमसा संमोचयन्तं शिवम् ।
साम्बं सेन्दुमहं परापरगुरुं व्याख्यासने सुस्थितं
वन्दे दक्षिणदिङ्मुखं सिततरं ज्ञानाब्धिचन्द्रोदयम् ॥

यस्याः प्रसादं समवाप्य लोक-
स्रष्टाभवद्विश्वपितामहोऽपि ।
उपासते यां मुनयोऽपि नित्यं
तां वाचमाद्यामहमद्य वन्दे ॥

महागणेशं निबिडान्तराय-
तमोनिरासैकसहस्रभानुम् ।
वन्दारुबृन्दारकबृन्दवन्द्यं
वन्दामहे तुन्दिलमिष्टसिद्ध्यै ॥

वेदान्तार्थसरोजषण्डविलसद्भास्वत्सहस्रोपमः
स्वीयायत्तविसारिमञ्जुलपदा विद्योतिवाग्विस्तरैः ।
निर्भर्त्स्यैव कुतर्ककर्कशधियः स्वीये महिम्नि स्थितो
दीनत्राणपरायणो विजयते नारायणो बादरिः ॥

नमः श्रीशङ्कराचार्यगुरवे शङ्करात्मने ।
शरीरिणां शङ्कराय शङ्करज्ञानहेतवे ॥

वेदान्तार्थं स्फुटयितुमभूत् पूर्वमीशश्चतुर्भिः
शिष्यैः सार्धं सकलहितकृच्छङ्कराचार्यसंज्ञः ।
सोऽयं द्वैतागमपथमलं शोधयन् सन्निधत्तां
वेदान्ताब्जस्फुटरविजगन्नाथयोगीन्द्रमीडे ॥

गीर्वाणेन्द्रसरस्वत्याश्चरणं शरणं भजे ।
यो भवक्लेशखिन्नानां मूर्तं ब्रह्मापरं बभौ ॥

वाचो नैव हि यद् व्रजन्ति मनसा साकं वरं तत्पदं
सर्वेषां प्रकटीकरोम्यहमिति प्रेक्षावता शम्भुना ।
ज्ञानेन्द्रत्वमिदं गृहीतममुना नो चेत् कथं सद्गुरो-
रस्येक्षादिभिरेव सर्वजगतां पूर्णप्रबोधोदयः ॥

शारीरकार्थान् सकलान् गभीरान्
समुद्दिधीर्षुः कृपया चकार ।
संक्षेपशारीरकनामकं यः
सर्वज्ञमात्मोत्तममाश्रयेऽहम् ॥

संक्षेपशारीरकसंज्ञितेऽस्मि-
न्नशेषवेदार्थनिधानकोशे ।
कर्तुं यथार्हं विवृतिं कृपातः
श्रीमज्जगन्नाथगुरोर्यतेऽहम् ॥

संक्षेपशारीरकगां व्याख्यामृजुमिताक्षराम् ।
कुर्वन्तु हृद्गतामेतां विद्वांसस्तत्त्वबोधिनीम् ॥

विद्वत्ताया वृथार्थं न खलु विरचये व्याकृतिं वेदनिष्ठां
प्रज्ञावन्तः प्रवीणाः प्रथितगुणगणा वाग्मिनः शोधयेयुः ।
इत्येवात्र प्रवृत्तो नृहरिपदयुगे भक्तिमात्रप्रयुक्ता
व्याख्यैषा पुष्पमाला भवतु शिवमुदे वाक्प्रसूनप्रबद्धा ॥

श्रीदक्षिणामूर्तये नमः ।

श्रीमच्छारीरकमीमांसार्थमनुभवप्रधानमाविष्कर्तुं किञ्चित् प्रकरणमारभमाणः सर्वज्ञात्माचार्यस्तस्य ग्रन्थस्याविघ्नपरिसमाप्त्यादिप्रयोजनकमविगीतशिष्टाचारानुमितश्रुतिप्रमितकर्तव्यताकं तत्वानुकीर्तनलक्षणीयस्तुतिरूपं मङ्गलं कुर्वतः प्रेक्षावत्प्रवृत्त्यङ्गभूतात्रिषयप्रयोजने चार्थिके विवक्षन् तदर्थं स्वकृतं मङ्गलं ग्रन्थतो निबध्नाति—अनृतजडेति ॥

End :

तथा चात्मज्ञानादेव परमपुरुषार्थो नान्यस्मादिति समन्वयनिरूपणमेतत् । अस्मिन्नेवं बुद्धिस्थतामुपगते सति अन्वयगतं वाक्यजन्यं ज्ञानाभिविज्ञानम् । अतोऽन्यत् पुंसोऽपराधकृतमिति प्रतीतिरुदियादित्यन्वयः ।

Colophon :

इति श्रीमत्परिव्राजकाचार्यश्रीजगन्नाथाश्रमश्रीचरणपरिचरणप्राप्तविद्यनिखिलमनोहरश्रीमन्नृसिंहाश्रमश्रीचरणविरचितायां संक्षेपशारीरकव्याख्यायां तत्त्वबोधिनीसमाख्यायां समन्वयाख्यः प्रथमोऽध्यायः समाप्तः ।

हरिः ओम् । शुभमस्तु ।

രംഗനാഥൻ സ്വഹസ്തലിഖിതം

अविघ्नमस्तु ।

Author—Nṛsimhāśrama.

Remarks—The author was a disciple of Jagannāthāśrama. Only one chapter is commented upon here.

॥ तत्त्वबोधिनी (संक्षेपशारीरकव्याख्या) ॥

574. TATTVABODHINĪ.

Commentary on Samkṣepaśārīraka.

Substance—Palm leaf. Size—19″ × 2″. Leaves—344. 9 lines per page and 36 letters per line. Script—Grantha. No. of Granthas—8200.

Subject—Same as No. 563.

Beginning etc. Same as No. 573.

॥ तत्त्वोपदेशः ॥

575. TATTVOPADEŚA.

Substance—Palm leaf. Size—$9\frac{3}{4}$″ x $1\frac{3}{4}$″. Leaves—23. 7—9 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—300. Complete.

Subject—Exposition of Brahmatattva according to Śaivaism.

Beginning:

अथ—

वेदान्तैः सच्चिदानन्दस्वरूपमिति कीर्तितम् ।
व्याप्तमाकाशवत् सूक्ष्मं प्रत्यग्ज्योतिः प्रकाशताम् ॥
मायाशबलितब्रह्म परमात्मेति कीर्त्यते ।
गुणत्रयात्मिका माया गुणाः सत्त्वं रजस्तमः ॥
मायाप्रधानमव्यक्तमविद्याज्ञानमक्षरम् ।
अव्याकृतश्च प्रकृतिस्तम इत्यभिधीयते ॥

रजो रक्तं चलं प्राहुः सत्वं शुक्लं प्रकाशकम् ।
कृष्णं वरणकं... ... ...सृष्टिस्थित्यन्तहेतवः ॥

End :

प्रलयेऽप्यनुसन्धाने प्रपञ्चोपमः शिवः ।
विश्वाधिको रुद्र इति व्याचष्टे स्पष्टमात्मवाक् ॥
प्रत्यभिज्ञामहाम्भोधेर्ज्ञानामृतमुपाहृतम् ।
पिबन्तः परमां सिद्धिं लभन्ते शिवयोगिनः ॥
तत्त्वोपदेशं शुकवज्जडचित्तोऽपि यः पठेत् ।
सतां सभां प्रविष्टोऽसौ सर्वज्ञ इति भाष्यते ॥

Colophon :

इति तत्त्वोपदेशे षष्ठोऽध्यायः । शुभमस्तु ।

Author :

Remarks—The Ms. opens with Fol. 141 (अहन) and finishes with 163 (ज ग्र म्य). Another work is also inserted here though not fully discernible. The remark " प्रत्यभिज्ञामहाम्भोधे .... " at the close of the work discloses that the adjoining leaves relate to Śaivādvaita. The work is identical with that noticed in M T C. Vide page 4442. Vol. IV, Part 1, Skt. A.

॥ दृग्दृश्यविवेकः (वाक्यसुधोपेतः) ॥

576. DṚKDṚŚYAVIVEKA
with Vākyasudhā.

Substance—Palm leaf. Size—14¼" × 2". Leaves—

19. 12 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—855. Incomplete.

Subject—Differentiation of the Supreme Spirit from sensual objects.

Beginning :

ज्योतिः शान्तमनन्तमेकमजरं मायातिगं शाश्वतं
नित्यं निर्विषयं निरन्तरसुखं यत्तत् पदं धीमहि ।
यन्मायागुणसंवृतं त्रिविधतामासाद्य जीवत्रयं
लोके भाति विचारतस्तु सकलं रामान्न किञ्चित् परम् ॥

इह लोके सांसारिकतापत्रयोपतापितान्तःकरणः कश्चिदा ब्रह्मलोकात् सर्वं कर्मनिर्मितं ज्ञात्वा तेभ्योऽत्यन्तोद्विग्नमना निर्दुःखमुत्तमसुखं ब्रह्मज्ञानं विज्ञातुमिच्छुः परमकारुणिकं श्रोत्रियं ब्रह्मनिष्ठं त्यक्ताशेषक्रियं सद्गुरुं प्राप्य उपहारपाणिः प्रसन्नः पृच्छति—

End :

अत एव मोक्षशास्त्रस्य महातात्पर्यस्यापि साफल्यं स्यादित्ययमेवास्य प्रकरणस्य समस्तवेदान्तशास्त्रस्य च महातात्पर्यविषयत्वेन पिण्डितोऽर्थः । तस्मात् सर्वमनवद्यम् ।

Colophon :

इति परमहंसपरिव्राजकाचार्यश्रीमदानन्दतीर्थमुनिवर्यशिष्यब्रह्मानन्दभारतीतीर्थविरचिता वाक्यसुधाटीका समाप्ता ।

स्वाज्ञानकल्पितजगत्त्वमहेश्वरत्व-
जीवत्वभेदकलुषीकृतभूमभावा ।

स्वाभाविकस्वमहिमस्थितिरस्तमोहा
प्रत्यक्चितिर्विजयते जगदेकयोनिः ॥
शुभमस्तु ।

Author—Com: Brahmānandabhāratītīrtha, disciple of Ānandatīrthamuni.

Remarks—The doctrines of Advaita system are explained lucidly here. The Ms. opens with the concluding portion of Vākyavṛtti Prakāśa. The work is ascribed to Śaṅkarācārya in M T C. (p. 5979, Vol. IV, Part I, Skt. C.) whereas in C. C. (p. 258) it is attributed to Tryambaka Śāstrī.

॥ द्वादशमञ्जरी (सव्याख्या) ॥

577. DVĀDAŚAMAÑJARĪ with commentary.

Substance—Palm leaf. Size—$14\frac{1}{4}'' \times 2''$. Leaves—12. 11 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—462.

Subject—Instructions relating to abnegation.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।
सर्वाधारमनाधारं सर्गस्थित्यन्तकारणम् ।

सर्वज्ञं करुणामूर्तिं श्रीरामं शरणं भजे ॥
यत्प्रसादादहं साक्षादीश्वरागमधीश्वरः ।
श्रीमद्गोपालयोगीन्द्रांस्तान् वन्दे करुणानिधीन् ॥
आचार्यकृतिसम्बन्धान्मद्वाक्यं श्लाघ्यमेव हि ।
रथ्योदकं यथा गङ्गाप्रवाहपतनाच्छुभम् ॥
"परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे" ॥

इति प्रतिज्ञापालनाय भगवान् सर्वज्ञः शङ्कराचार्यरूपेणावतीर्य प्रथमं ज्ञानसाधनं वैराग्यमुपदिशन् परमकारुणिकत्वेन पितेव स्वतनयं बहिःप्रवणचित्तं शिष्यं बोधयति—

मूढ जहीहि धनागमतृष्णां
कुरु सद्बुद्धिं मनसि वितृष्णाम् ।
यल्लभसे निजकर्मोपात्तं
वित्तं तेन विनोदय चित्तम् ॥

End:

एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारतेति, तद्ध्यग्र्यं सर्वविद्यानाम्, आत्मलाभान्न परं विद्यते इति च ॥
यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ॥
इति सर्वमुपपन्नमेव ।
श्रवणमननकालं ध्यानमेकान्तवासं
विमलसुखमहाब्धौ . . . न जाने ।
मुनिगण इव दृष्टे दण्डकारण्यचारे
त्वयि करधृतचापे जानकीप्राणनाथे ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीगोपालयोगीन्द्रशिष्यश्रीमत्स्वयंप्रकाशमुनिना विरचिता द्वादशमञ्जरीव्याख्या समाप्ता

शुभमस्तु । ब्रह्मणे नमः ।

वेदा निःश्वसितं यस्य पञ्चभूतानि वीक्षितम् ।
स्मितं चराचरं यस्य तं रामं शरणं भजे ॥

Author—Text : Śaṅkarācārya.
Com : Svayamprakāśamuni.

Remarks—The commentator attempts to make himself clear by profuse but appropriate citations from Smṛti, Śruti etc.

नयमणिमाला ॥

578. NAYAMAṆIMĀLĀ.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—57. 8 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—600. Complete.

Subject—A compendium of Śrīkaṇṭhabhāṣya.

Beginning :

सोपानपङ्क्तिकल्पा सोमाभरणपदमारुरुक्षूणाम् ।
क्रियते नयमणिमाला श्रीकण्ठाचार्यदृष्टमार्गेण ॥

अथातो ब्रह्मजिज्ञासा ।

आत्मा ब्रह्मेत्यधीतः स्फुरति (स्तु?हृदि) सदा निर्विशेषः स चेत् स्यात्
तस्या बुद्धेः सरणिमिह नयैः का परिच्छेदवार्ता ।
तज्ज्ञानात् स(व्य?वे)जीवावरणनिरवधिद्रव्यपाशानिवृत्तेः
को वा मुक्तेः प्रसङ्गस्तदविषयफलं ग्राह्यमेतन्न शास्त्रम् ॥

ब्रह्मण्यर्थानुगत्या निरतिशयगुणं तत् कथं जीव एवे-
त्युक्तं श्रुत्या तदन्तं मन इति च कथं चोक्तमित्यादि चिन्त्यम् ।
ध्यातस्यास्य प्रसादात् प्रातिपशु नियतानन्तशक्तेर्बलस्य
क्षीयेतैकैकशक्तिस्तदिह न विषये नैव साध्येऽप्ययुक्तिः ॥

जन्माद्यस्य यतः ।

End:

लीला पित्रादिसृष्टिर्निखिलविरचिता शङ्करस्यैव तेषां
यावत् स्वेच्छैव लीला स्वरसविसृमरोदेति तल्लोकसिद्धम् ।
न ह्येतस्याप्युदीर्णप्रमदजहसितोद्गतिहस्ताङ्घ्रिमाली
व्यापाराद्यात्मिकायां क्वचिदपि कलिता शक्तिमुल्लङ्घ्य लिप्सा ॥

तन्निर्धूतध्वान्तमध्वान्तमाद्यं
ये सम्प्राप्ताः स्थानमानन्दरूपम् ।
सम्भुञ्जानाः शम्भुवत् सर्वकामान्
नावर्तन्ते नाकसन्यायतस्ते ॥

Colophon:

इति चतुर्मतसारसंग्रहे नयमणिमालिकाख्ये तृतीय-
परिच्छेदे चतुर्थस्याध्यायस्य चतुर्थः पादः ।
ओं पद्मनाभो रक्षतु ।

Author:

Remarks—The aphorisms are explained here in verse.



॥ न्यायरक्षामणिः ॥

579. NYĀYARAKṢĀMAṆI.

Substance—Palm leaf. Size—18″ × 1½″. Leaves—263. 9 lines per page and 64 letters per line. Script—Grantha. No. of Granthas—9500. Complete.

Subject—Substantiation of Advaita philosophy refuting all other schools.

Beginning :

उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥
यस्याहुरागमविदः परिपूर्णशक्ते-
रंशे कियत्यपि निविष्टममुं प्रपञ्चम् ।
तस्मै तमालरुचिभासुरकन्धराय
नारायणीसहचराय नमश्शिवाय ॥

End :

मायिकविकाराणां तात्त्विकनिर्विकारत्वाप्रतिक्षेपकत्वस्य गाधिवृत्तान्तलक्षणोपाख्यानादिषु लोके च प्रसिद्धतरत्वात् । तस्मात् सिद्धं ब्रह्म जगतो निमित्तमुपादानं चेति युक्तं ब्रह्मणो लक्षणम् ।

Colophon:

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरीन्द्रवरसूनोः अप्पय्यदीक्षितस्य कृतौ शारीरकन्यायरक्षामणौ प्रथमस्याध्यायस्य चतुर्थः पादः । अध्यायश्च समाप्तः । श्रीगुरुभ्यो नमः । हरिः ॐ ।

विद्वच्चकोरचन्द्रस्य रामवर्ममहीभृतः ।
निदेशं शिरसा धृत्वा सुब्बरायस्त्वलिखत् स्वयम् ॥

Author—Appayyadīkṣita.

Remarks—This work has been printed at Kumbhakoṇam.

॥ न्यायरक्षामणिः ॥

580. NYĀYARAKṢĀMAṆI.

Substance—Palm leaf. Size—18″ × 2″. Leaves—180. 10 lines per page and 73—74 letters per line. Script—Malayāḷam. No. of Granthas—2500.

Subject etc.— Same as No. 579.

॥ न्यायरत्नावली (सिद्धान्तबिन्दुटीका) ॥

581 A. NYĀYARATNĀVALĪ.

Commentary on Siddhāntabindu.

Substance—Palm leaf. Size—18″ × 2″. Leaves—78. 14 lines per page and 58 letters per line.

Script—Grantha. No. of Granthas—3958. Incomplete.

Subject—Exposition of the tenets of Advaita philosophy.

Beginning :

ॐ ।

नमो नवघनश्यामकामकामितदेहिने ।
कमलाकामसौदामकणकामुकगेहिने ॥
अद्वैतसिद्धेर्ष्टीकायास्तदीयायाश्च संग्रहात् ।
विचित्ररचना काचिद् ब्रह्मानन्देन रच्यते ॥
शङ्करोक्तिसुधाम्भोधेर्गुरूणामुपदेशतः ।
उद्धृतां प्रकटीकुर्वे न्यायरत्नावलीमिह ॥

तत्राद्वितीयप्रकाशनिरतिशयानन्दरूपयोः जीवब्रह्मस्वरूपयोरैक्यमुक्तानन्दरूपं बोधयदहंब्रह्मास्मीत्यादिवेदान्तमहावाक्यं द्वितीयविषयकप्रत्यक्षादिप्रमाणबाधकम् । अतोऽनात्मभूतं सर्व(मेत्यत्था ? मिथ्येत्या) द्यर्थविवेचनवचनरोचमानं श्रीमद्बादरायणशङ्करसुरेश्वराद्याचार्यवर्यकृतमर्यादं वेदान्तदर्शनं दर्शनेषु सर्वेषु दर्शनीयतमं दर्शनीयम् । तस्य च विचारशास्त्रस्य विचार्यवेदान्तवाक्यद्वारा परमं तात्पर्यमुक्तैक्ये अवान्तरशुद्धजीवब्रह्मस्वरूपयोः तदैक्यसाक्षात्कारहेतुश्रवणादौ च प्रत्यक्षादिप्रमाणसिद्धदृग्दृश्याद्यनेकविभागभागिन्यां प्रक्रियायाम् अनुवादकत्वम् । तत्र चानुवादप्रक्रियायां पदार्थो द्विविधः । दृक् दृश्यं च । दृगपि चिद्रूपा उपहितानुपहितभेदेन द्विविधा । अनुपहिता निर्वाणदशायां केवलैव भाति । संसारदशायां तु भासमानसर्वानुस्यूतरूपेणापि । तथाच श्रुतिः—

End :

प्रत्यक्षानुमानशब्दानामिव उपमानार्थापत्त्यनुपलब्धीनामपि पृथगेव प्रमाणत्वं गोसादृश्यविशिष्टगवयादिप्रत्यक्षोत्तरं स गौरेतद्गवयसदृशः इति ज्ञानस्य मानान्तरानवतारकालीनस्य उपमानमात्राधीनत्वात् । व्यतिरेकव्याप्तिज्ञानजन्यज्ञानस्यानुमितित्वे मानाभावात् अर्थापत्तित्वस्यैवान्वयव्याप्तिज्ञानजन्यज्ञानस्वीकारेण अनुमितित्वलोपापत्तेश्च । अर्थापत्तिप्रमाणस्याप्यवश्यकत्वात् । प्रतियोग्यनुपलब्धिजन्याया अभावप्रमाया इन्द्रियसन्निकर्षादिजन्यत्वे मानाभावेनानुपलब्धिश्च जात्याश्रय .....

Author—Brahmānanda.

Remarks—Śaṅkarācārya has condensed the whole of Advaita in 10 ślokas and Siddhāntabindu is a commentary on them. A complete Ms. of the work has been noticed in M T C. Vide p. 2648, Vol. II, Part I, Skt C.

॥ सुभाषितपद्धतिः ॥

581 B. SUBHĀṢITAPADDHATI.

Substance—Palm leaf. Size—18″ × 2″. Leaves—27. 14 lines per page and 70 letters per line. Script—Grantha. No. of Granthas—1600.

Subject—A cento of verses appertaining to Vedāntic subjects.

... ...

... ...त्रैलोक्यमुन्मीलति ।
यत्रत्र विदुषां निमीलति पुनः स्रग्भोगिभोगोपमं
सान्द्रानन्दमुपास्म... ... ...

End :

नैष्कर्म्यसिद्धौ—

नामादिभ्यः परे भूम्नि स्वा... ... .

....ज्ञो न कार्थं कर्मणा तदा ।
विपरीतमिदं सर्वं लोकबुद्ध्यनुसारतः ॥
अविवेकधियामस्ति नास्ति सर्वं विवेकिनाम् ।
न ज्ञानी नैव चाज्ञानी ह्यात्मविच्चित्परो मतः ॥
एवं जानीहि सत... ....

Colophon :

इति अतिवर्णाश्रमप्रतिपादनपद्धतिः समाप्ता ।

Author :

Remarks—The Ms. embodies 30 *paddhatis* pertaining to Vedānta. It is partly damaged and the script is illegible.

॥ पञ्चदशी (सव्याख्या) ॥

582. PAÑCADAŚĪ

with commentary.

Substance—Palm leaf. Size—18″ × 2″. Leaves—

122. 12 lines per page and 64 letters per line. Script—Grantha. No. of Granthas—5856.

Subject—Exposition of the principal doctrines of Advaita.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदं तं भक्तानामेकदन्तमुपास्महे ॥

व्या—नमः शिवाय साम्बाय सगणाय ससूनवे ।
सनन्दिने सगङ्गाय सवृषाय सचक्रिणे ॥

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
क्रियते चित्रदीपस्य व्याख्या तात्पर्यबोधिनी ॥

चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय परमात्मनीति पदेन इष्टदेवतातत्त्वानुसन्धानलक्षणं मङ्गलमाचरन् अस्य ग्रन्थस्य वेदान्तप्रकरणत्वात् तदीयैरेव विषयादिभिः तद्वत्तासिद्धिं मनसि निधाय...

End:

ब्रह्मानन्दात्मके ग्रन्थे पञ्चमोऽध्याय ईरितः ।
विषयानन्द एतेन द्वारेणान्तः प्रविश्यताम् ॥

मूलम्—

प्रीयाद्धरिहरोऽनेन ब्रह्मानन्देन सर्वदा ।
पायाच्च प्राणिनः सर्वान् स्वाश्रितान् शुद्धमानसान् ॥

Colophon:

इति ब्रह्मानन्दे विषयानन्दो नाम पञ्चमोऽध्यायः । इति श्रीमत्-

परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण श्रीरामकृष्णाख्यविदुषा विरचितम् उपदेशग्रन्थविवरणं सम्पूर्णम् । നന്ദനവർഷം ആവണിമാസം 4-നു ശുക്രയോഗ ശുക്രകരണതിഥിയിൽ പഞ്ചദശപ്രകരണം സമാപ്തം:

Author: Text—Vidyāraṇya.
Com: Rāmakṛṣṇa.

Remarks—The subject-matter of this versified treatise on Advaita is based largely upon Śruti. This work has been printed. The *prakaraṇas* embodied in this Ms. are arranged promiscuously. There are several commentaries on Pañcadaśī a few of which are noticed in MTC, pp. 1108, 1129 &c. Vol. I, part 1, Skt. A. Vidyāraṇya is one of the commentators.

॥ पञ्चदशी (सव्याख्या) ॥

583. PAÑCADAŚĪ

with commentary.

Substance—Palm leaf. Size—11¼″ × 2″. Leaves—224. 11—13 lines per page and 40 letters per line. Script—Malayālam. No. of Granthas—6700.

Subject etc. Same as No. 582.

॥ पञ्चपादिकाविवरणम् ॥

584. PAÑCAPĀDIKĀVIVARAṆAM.

Substance—Palm leaf. Size—21″ × 2″. Leaves—120. 9 lines per page and 90 letters per line. Script—Malayāḷam. No. of Granthas—6075.

Subject—A compendium of Śārīrakabhāṣya of Śaṅkarācārya.

Beginning :

श्रीगणपतये नमः ।

पालने विमलसत्त्ववृत्तये जन्मकर्मणि रजोजुषे लये ।
तामसाय जगतः पराकृतद्वैतजालवपुषे नमः सते ॥

यस्याः प्रसादमवलम्ब्य जगद्गुरूणा-
मप्यस्खलद्बहुगुणाः प्रसरन्ति वाचः ।
सा वेदशास्त्रपरिनिर्मितवन्द्यदेहा
भूयात् समग्रवरदैव सरस्वती वः ॥

... ...

... ...

उद्धृत्य वेदपयसः कमलामिवाब्धेरालिङ्गिताखिलजगत्प्रभवैकमूर्तिम् ।
विद्यामशेषजगतां सुखदामदाद्यस्तं शङ्करं विमलभाष्यकृतं नमामि ॥

प्रकाशात्मयतिः सम्यक् प्राप्तविद्याशुशुत्सया ।
यथाश्रुतं यथाशक्ति व्याख्यास्ये पञ्चपादिकाम् ॥

विदितसकलवेद्यैर्न प्रशंसन्ति लोके
प्रथितमपि महद्भिः किं पुनर्मादृशेन ।
इति विफलसमेऽस्मिन् वाग्व्ययेऽहं प्रवृत्तः
स्वमतिविमलतायै क्षन्तुमर्हन्ति सन्तः ॥

प्रारिप्सितस्याविघ्नेन परिसमाप्तिप्रचयाभ्यां शिष्टाचारपरिपालनाय चाभिलषितदेवतापूजानमस्कारः कर्तव्यः । शास्त्रार्थश्च तत्त्वंपदार्थविवेकोपायलभ्यः ।

End :

तृतीयश्लोकं व्याचष्टे । अद्वितीयनिरतिशयानन्दचैतन्यैकतानसर्वज्ञसर्वेश्वरसर्वशक्तिनिरवयवस्वच्छासङ्गप्रत्यग्भूतब्रह्मात्मन्यपरोक्षानुभवात् प्राग् देहात्मप्रत्ययवत् सर्वो व्यवहारो यथादर्शनमुपपद्यते । तस्मिंश्चापरोक्षेऽवभासमाने प्रमात्रादिबाधात् सर्वो व्यवहारो निवर्तत इति श्लोकार्थः ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकानन्यानुभवपूज्यपादशिष्यस्य प्रकाशात्मभगवतः कृतौ पञ्चपादिकाविवरणे समन्वयसूत्रं समाप्तम् ... ...

Author—Prakāśātmayati.

Remarks—The Ms. is in good condition. It embodies a commentary on *Pañcapādika.* Both at the beginning and end the name of the author is mentioned. Several commentaries on this text are extant. One of them, Tattvadīpana by Akhaṇḍānandamuni, has been referred

to in MTC. Vide page 1080, Vol. II, part I, Skt. A.

॥ पञ्चपादिकाविवरणम् ॥

585. PAÑCAPĀDIKĀVIVARAṆAM.

Substance—Palm leaf. Size—$21\frac{3}{4}'' \times 2''$. Leaves—135. 9—11 lines per page and 88 letters per line. Script—Malayāḷam. No. of Granthas—8000.

Subject &c. Same as No. 584.

॥ पञ्चीकरणभाष्यम् ॥

586. PAÑCĪKARAṆABHĀṢYAM.

Substance—Palm leaf. Size—$14'' \times 2''$. Leaves—13. 9 lines per page and 32 letters per line. Script—Grantha. No. of Granthas—112. Incomplete.

Subject—Definition of the subtle elements used for the creation of the universe.

Beginning:

यद्बोधादिदं भाति यद्बोधाद्विनिवर्तते ।
नमस्तस्मै परानन्दवपुषे परमात्मने ॥

End:

परिशेषात् प्रत्यगात्मा सच्चिदानन्दात्मकः सत्यज्ञानस्वरूपं ब्रह्मै-वेति सिद्धम् ।

षड्विधं लिङ्गमाश्रित्य वेदान्ता यत्र निश्चिताः ।
विधानप्रतिषेधाभ्यां तं वन्दे पुरुषोत्तमम् ॥

Colophon:

इति गोविन्दभगवत्पूज्यपादशिष्यश्रीशंकरभगवत्पूज्यपादविरचितं पञ्चीकरणभाष्यं समाप्तम् ।

प्रज्ञानांशुप्रतानैः स्थिरचरनिकरैर्व्यापिभिर्व्याप्य लोकं
भुङ्क्ते भोगान् स्थाविष्ठान् पुनरपि धिषणोद्भासितान्...
पीत्वा सर्वान् विशेषान् स्वपिति मधुरभुङ् मायया मोहयन् यो
मायासंख्यातुरीयं परममृतमजं ब्रह्म यत्तन्नतोऽस्मि ॥

यो विश्वात्मा विविधविषयान् प्राश्य भोगान् ... ...

Author—Text: Gaudapādācārya.
Com: Śaṅkarācārya.

Remarks—This work aims at showing the condition of Jīva in wakeful, unwakeful and subconscious stages during one's concentration or Praṇava and the significance of Mahā Vākyas (memorable sentences) like "तत्त्वमसि" etc. It opens only on Fol. 81.

॥ पञ्चीकरणभाष्यम् ॥

587. PAÑCĪKARAṆABHĀṢYAM.

Substance—Palm leaf. Size—14¼″ × 2″. Leaves—7.

10 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—219. Complete.

Subject—Beginning—End—Same as No. 586.

Colophon :

इत्यानन्दगिरिविरचितं पञ्चीकरणं समाप्तम् ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यशुद्धानन्दपूज्यपादशिष्यश्रीमदानन्दगिरिवर्याचार्यकृतपञ्चीकरणविवरणं समाप्तम् ।

ब्रह्मणे नमः ।

Author—Com : Saṅkarācārya.

Remarks—Nos. 586 & 587 are identical works. The difference in the respective colophons is probably due to scribal error.

॥ पञ्चीकरणविवेचनम् ॥

588. PAÑCĪKARAṆAVIVECANAM.

Substance—Palm leaf. Size—$11\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—12. 8 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—264. Complete.

Subject—Same as No. 586.

Beginning:

हरिः। श्रीगणपतये नमः। अविघ्नमस्तु।

आनन्दमानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजबोधयुक्तम् ।

योगीन्द्रवन्द्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि ॥
ब्रह्मविद्या मया लब्धा ब्रह्मणेव सरस्वती ।
यस्य तत्त्वोपदेशेन तस्मै श्रीगुरवे नमः ॥
आत्मानात्मविवेकेन पुंसः संसारनिह्नुतिः ।
तद् विना जन्मकोट्यापि बन्धच्छेदो न सिध्यति ॥
स्थूलसूक्ष्मादिदेहानामात्मन्यारोप एव च ।
अपवादस्ततोऽप्येषां सम्यगत्र प्रदर्शितः ॥

सच्चिदानन्दस्वरूपं यच्छुद्धचैतन्यं, तस्मिन् प्रकृतिरारोपिताभवत् । या तस्मिन् आरोपिता, सा केत्यपेक्षायां मा निरूप्यते । तस्याः निरूपकं सत्त्वं रजः तमश्चेति ॥

End:

कर्मभिर्मुक्तिर्न जायते । अत्र सम्मतिः—
कर्मणा जन्मिनो जन्म यान्ति मुक्तिं न यान्ति ते ।
तेषां कोऽपि चिराद्दैवात् सत्कर्मपरिणामतः ॥
सद्गुरोरुपदेशेन तत्त्वमस्यादिना क्रमात् ।
पञ्चकोशविवेकाच्च परब्रह्मैव जायते ।
एवं विविच्य यो विद्यात् सच्चिदानन्दरूपताम् ॥
स्वस्यैव वेत्ति सो (?) विद्वान् स मुक्तः स च पण्डितः ।

एवमात्मानात्मविवेकं विविच्य आत्मानं यस्तु जानाति स जीवन्मुक्तो भवति । तथाच श्रुतिः—"तरति शोकमात्मवित् । ब्रह्म वेद ब्रह्मैव भवति"—इति ॥

Colophon :

इति पञ्चीकरणविवेचनं सम्पूर्णम् ।

Author:

Remarks—Same as No. 586.

॥ पञ्चीकरणसंग्रहः ॥

589. PAÑCĪKARAṆASAṄGRAHA.

Substance—Palm leaf. Size—3¾″ × 1¼″. Leaves—8. 8 lines per page and 12 letters per line. Script—Malayāḷam. No. of Granthas—48. Incomplete.

Subject—Same as No. 586.

Beginning:

अथात्मजिज्ञासोस्त्वंपदार्थविवेकाय चतुर्विंशतितत्त्वानामुत्पत्तिक्रमाः प्रदर्श्यन्ते। ब्रह्माश्रयं त्रिगुणात्मकमज्ञानम्। तस्मात् त्रिगुणात्मकान्याकाशादीनि सूक्ष्मभूतान्युत्पद्यन्ते। तेभ्यः श्रोत्रादीन्येकोनविंशतितत्त्वान्युत्पन्नानि। पञ्चीकृतस्थूलभूतेभ्यः शब्दादिविषया उत्पन्नाः। कथम्। आकाशसात्त्वकांशात् श्रोत्रेन्द्रियमुत्पन्नम्। वायोः सात्त्वकांशात् चक्षुरिन्द्रियमुत्पन्नम्। अपां सात्त्वकांशात् घ्राणेन्द्रियमुत्पन्नम्॥

End:

एवं चतुर्विंशतितत्त्वादीनि। तेभ्यः परं कूटस्थमात्मतत्त्वं च विविच्य यो जानाति, सोऽमृतत्वाय कल्पते। "तरति शोकमात्मविदि"ति श्रुतेः। तथाचोक्तम्—

पञ्चविंशतितत्त्वज्ञो यत्र कुत्राश्रमे वसेत्।

"जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ॥"

"क्षेत्रक्षेत्रज्ञयोर्ज्ञानमेतज्ज्ञानं मतं मम ॥" इति भगवद्वचनाच्च ।

Colophon :

पञ्चीकरणसङ्ग्रहः समाप्तः ।

Author—Ānandagiri.

Remarks—The work furnishes a detailed account of the component elements such as *Sattva*, *Rajas* and *Tamas* used for the creation of the universe.

॥ परमार्थसारः (सव्याख्यः) ॥

590. PARAMĀRTHASĀRA
with commentary.

Substance—Palm leaf. Size—13″ × 1¾″. Leaves—39. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—800.

Subject—The quintessence of Vedāntic philosophy.

Author : Text : Ādiśeṣa.

Com : Rāghavānandamuni.

Remarks—The work is printed as No. 12 in TSS. It is also called Śeṣārya in honour of its author, as evinced by the colophon : "इति शेषार्या सव्याख्या समाप्ता" of the Ms. available at Madras. Vide p. 1114, part I. Skt. A. Vol. II, MTO.

॥ परमार्थसारसंग्रहः ॥

591. PARAMĀRTHASĀRASAṄGRAHA.

Substance—Palm leaf. Size—14″ × 2″. Leaves—7. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—150.

Subject—Same as No. 590.

Beginning :

श्रीगणपतये नमः ।

नमः शिवाय पूर्णाय स्वात्मारामविहारिणे ।
विश्वाधिकाय विश्वात्मस्वात्मने शाश्वताय ते ॥
परं परस्थं गगनादनादिमेकं निविष्टं बहुधा गुहासु ।
सर्वालयं सर्वचराचरस्थं त्वामेव शम्भुं शरणं प्रपद्ये ॥

इति द्वयमपि इष्टदेवतावन्दनश्लोकम् । पुनः परमार्थसारशतकं लिख्यते ।

गर्भाधिवासपूर्वमरणान्तिकदुःखचक्रविभ्रान्तः ।
आधारं भगवन्तं शिष्यः पप्रच्छ परमार्थम् ॥

End :

विषयेषु सार्वभौमः सर्वजनैः पूज्यते यथा राजा ।
भुवनेषु सर्वदेवैर्योगभ्रष्टस्तथा पूज्यः ॥
महता कालेन पुमान् मानुष्यं प्राप्य योगमभ्यस्य ।
प्राप्नोति दिव्यममृतं यस्मादावर्तते न पुनः ॥

Colophon :

इदमभिनवगुप्तोदितसंक्षेपं ध्यायतः परं ब्रह्म ।

अचिरादेव शिवत्वं निजहृदयावेशमभ्येति ॥
आर्याशतेन तदिदं संक्षिप्तं शास्त्रसारमतिगूढम् ।
अभिनवगुप्तेन मया शिवचरणस्मरणदीप्तेन ॥
परमार्थसारशास्त्रे लघ्वीं वृत्तिं यथाशक्ति ।
अवधूतदेवदासो भक्तिशालीत्थमभ्यधात् ॥
शेषं विचारणीयम् ।
इति परमार्थसारशतकं नाम शास्त्रं समाप्तम् ॥

Author—Abhinavaguptācārya.

Remarks—The gist of Vedānta is compressed here in 100 verses of Āryā metre. The Ms. is much damaged. The colophon furnishes the commentator's name as Avadhūtadevadāsa.

॥ परमार्थसारसंग्रहः ॥

592. PARAMĀRTHASĀRASAṄGRAHA.

Substance—Palm leaf. Size—$2\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—8. 7 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—150.

Subject—Same as No. 591.

Beginning :

"सर्वत्रावस्थितं शान्तं स्वस्वरूपाधिकं शिवम् ।
अनुभूय वपुस्त्यक्त्वा ज्ञप्तिमात्रपरो भव ॥"

End—Colophon—Author—Same as No. 591.

Remarks—The opening portion of an altogether different work is seen at the end:

"एवं शमदमादिसम्पन्नस्य मुमुक्षाप्रवृत्तिरुपदिश्यते" ।

॥ परिमलः (वेदान्तकल्पतरुव्याख्या) ॥

593. PARIMALA.

Commentary on Vedāntakalpataru.

Substance—Palm leaf. Size—$17\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—359. 11 lines per page and 64 letters per line. Script—Grantha. No. of Granthas—15750. Complete.

Subject—Exposition of the Brahmasūtras of Vyāsa.

Beginning:

हरिः ओम् । हरिः श्रीगणपतये नमः ॥ अविघ्नमस्तु ।

गुरुभिरुपदिष्टमर्थं विस्तृतमपि तत्र बोधितं प्राज्ञैः ।
अवलम्ब्य शिवमधीयन् यथामति व्याकरोमि कल्पतरुम् ॥

कल्पकतरुमुपकुर्यां कमधिकमाकाङ्क्षितार्थमुपहृत्य ।
तद्दत्तैरेवार्थैर्मम मतिमीहे परिष्कर्तुम् ॥

यावन्तो निविशन्ते विदुषां व्याख्यानचातुरीभेदाः ।
सर्वेषामपि तेषामयमवकाशं ददाति पुष्पकवत् ॥

इत्थमिहातिगभीरे कियदाशयवर्णनं मया क्रियते ।
तुष्यन्ति ततोऽपि बुधाः कतिपयरत्नग्रहादिवाम्बुनिधेः ॥

यदिति—अत्र प्रत्यगिति ब्रह्मविशेषणेन शास्त्रस्य विषयं प्रदर्श्य

तत्र तेषां वेदान्तानां समन्वयः प्रथमाध्यायार्थः श्रुतिशतेत्यादिविशेषणेन दर्शितः ।

End:

अयमर्थो भाष्यकाराणामिमां श्रुतिं भोगसाम्यार्थत्वेनोदाहृतवतामाशयस्थो न भवतीति स्वयमन्यथा व्याचष्टे—तं ब्रह्मलोकगतमित्यादिना ।

Colophon:

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरीन्द्रसूनोरप्पय्यदीक्षितस्य कृतौ श्रीवेदान्तकल्पतरुपरिमले चतुर्थस्याध्यायस्य चतुर्थः पादः । समाप्तश्चायं चतुर्थोऽध्यायः ।

Author—Appayyadīkṣita.

Remarks—There are four complete chapters in this work. The Ms. is in good condition and printed in N. S. Press, Bombay.

॥ प्रत्यभिज्ञाशास्त्रम् ॥

594. PRATYABHIJÑĀŚĀSTRAM.

Substance—Palm leaf. Size—$9\frac{3}{4}'' \times 1\frac{3}{4}''$. Leaves—14. 8—9 lines per page and 28 letters per line. Script—Malayalam. No. of Granthas—200. Complete.

Subject—Realisation of the Almighty according to *Pratyabhijña* view.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

कथञ्चिदासाद्य महेश्वरस्य दास्यं जनस्याप्युपकारमिच्छन् ।
समस्तसम्पत्समवाप्तिहेतुं तत्प्रत्यभिज्ञामुपपादयामि ॥
कर्तरि ज्ञातरि स्वात्मन्यादिसिद्धे महेश्वरे ।
अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः ॥
किन्तु मोहवशादस्मिन् दृष्टेऽप्यनुपलक्षिते ।
शक्त्याविष्करणेनेयं प्रत्यभिज्ञोपदर्श्यते ॥

End:

एवमात्मानमेतस्य सम्यग् ज्ञानक्रिये तथा ।
पश्यन् यथेप्सितानर्थान् जानाति च करोति च ॥
इति प्रघटितो मया सुघट एष मार्गो नवो
महागुरुभिरुच्यते स्म शिवदृष्टिशास्त्रे यथा ।
तदत्र निदधत् पदं भुवनकर्तृतामात्मनो
विभाव्य शिवतामयीमनिशमाविशन् सिध्यति ॥
तैस्तैरप्युपयाचितैरुपनतस्तस्याः स्थितोऽप्यन्तिके
कान्तो लोकसमान एवमपरिज्ञातो नरं तं यथा ।
लोकस्यैष तथानवेक्षितगुणः स्वात्मापि विश्वेश्वरो
नैवालं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता ॥
... ... जनस्यास्य हेतुस्ततो
हृद्धाम्नि प्रथितश्च भीरवरुचामीशोऽन्तकस्यान्तकः ।
भरं वायति यासु योगिनिवहस्तस्य प्रभुर्भैरवो
विश्वस्मिन् भरणादिकृद् विजयते विज्ञानरूपः परः ॥

Colophon:

इति प्रत्यभिज्ञा समाप्ता ।

Author :

Remarks—The Ms. is much decayed.

॥ बृहदारण्यकभाष्यम् ॥

595. BṚHADĀRAṆYAKABHĀṢYAM.

Substance—Palm leaf. Size—11"×2". Leaves—169. 9—13 lines per page and 56 letters per line. Script—Malayaḷam. No. of Granthas—7000.

Subject—Exposition of the Bṛhadāraṇyaka Upaniṣad from the Advaita point of view.

Beginning :

श्रीगणपतये नमः । ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो ... ... द्या वाजसनेयिब्राह्मणोपानिषत् । तस्या इयमल्पग्रन्था वृत्तिरारभ्यते । संसारनिववृत्सुभ्यः संसारहेतुनिवृत्तिसाधनविद्याप्रतिपत्तये सेयं ब्रह्मविद्योपनिषच्छब्दवाच्या । तत्पराणां सहेतोः संसारस्यात्यन्तावसादनाद् उपानिपूर्वस्य सदेस्तदर्थत्वात् तादर्थ्यात् ग्रन्थोऽप्युपनिषदुच्यते ।

End :

अथेदानीं समस्तप्रवचनवंशः । स्त्रीप्राधान्याद् गुणवान् पुत्रो भवतीति प्रस्तुतम् । अतः स्त्रीविशेषणेन पुत्रविशेषणेन चाचार्यपरम्परा कीर्त्यते । तानीमानि शुक्लानीत्यन्यामिश्राणि ब्राह्मणेन अथवा यानीमानि यजूंषि तानि शुक्लानि शुद्धानीत्येतत् प्रजापतिमारभ्य यावत् पौतिमाषीपुत्रस्तावदधोमुखो नियमाचार्यप-

वेंक्रमो वंशः ब्राह्मणः प्रवचनाख्यस्य । तच्चैतद्ब्रह्म प्रजापतिब-न्धुपरम्परया गत्यास्मास्वनेकधा विप्रसृतमनाद्यन्तं स्वयम्भु-ब्रह्म नित्यम् । तस्मै ब्रह्मणे नमः । नमो वंशर्षिभ्यो वेदाचार्येभ्यो नमः । नमस्तदनुवर्तिभ्यो गुरुभ्यो नमो गुरुभ्य ओमिति ।

Colophon :

इति गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य शङ्करभगवतः कृतौ बृहदारण्यकभाष्ये अष्टमोऽध्यायः समाप्तः । ॐ ।

Author—Śaṅkarācarya.

Remarks—The script is legible.

॥ बृहदारण्यकभाष्यवार्तिकम् (सव्याख्यम्) ॥

596. BṚHADĀRAṆYAKABHĀṢYAVĀRTIKAM

with commentary

Substance—Palm leaf. Size—$18\frac{1}{2}'' \times 2\frac{1}{4}''$. Leaves—720. 9—12 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—32000. Complete.

Subject—Same as No. 595.

Beginning :

हरिः । ॐ श्रीमहागणपतये नमः ।

पृथिव्यादिजगदन्तं जगद्यस्मात् समुद्गतम् ।

तस्मै नमोऽस्तु रामाय चित्ततद्वृत्तिसाक्षिणे ॥
यैरिदं मोक्षदं ज्ञानं मुमुक्षुभ्यः प्रकाशितम् ।
कृपया वार्त्तिकालोकैः सुरेशाख्यान् नमामि तान् ॥
प्रत्यग्गीःपूर्वको बोधध्वनिर्यत्र यथार्थकः ।
तानहं सर्वदा वन्दे गुरुं मन्मोहभेदिनम् ॥
आरण्यवृत्तिश्लोकानां सम्बन्धोक्तिमविस्तराम् ।
करोमि श्रद्धया शक्त्या नतः (?) स्वल्पज्ञहेतुतः ॥
वार्त्ति—

स्वाविद्याविभवप्रसूतविपुलद्वैतप्रपञ्चाहित-
स्पष्टभ्रान्तितिरोहितात्ममतयो यं भागशो मन्वते ।
निर्भागं सकलाभिधानमननव्यापारदूरस्थितं
वन्दे नन्दितविश्वमव्ययमजं भक्त्या तमेकं विभुम् ॥

व्या— नमस्कारव्याजेन श्रोतॄणां सुखप्रबोधनार्थं संक्षेपतो वृत्त्यर्थं दर्शयत्यनेन श्लोकेन । वृत्त्यर्थः क इत्युच्यते ।

End :

यत्प्रज्ञोदधियुक्तिशब्दनखच ? अद्वैकसभ्मेत्रकं
स्थैर्यस्तम्भमुमुक्षुदुःखितकृपायत्नोत्थबोधामृतम् ।
पीत्वा जन्ममृतिप्रवाहविधुरं मोक्षं ययुर्मोक्षिण-
स्तं वन्देऽत्रिकुलप्रसूतममलं बोधाभिधं सद्गुरुम् ॥

इति । अयं वार्त्तिकसंदर्भो मया विरचितः शंकरभाष्यस्य तत्र श्रद्धया न तु सामर्थ्यादित्येतदाह—

यामस्मद्गुरुरेव वेदशिरसामैकात्म्यतात्पर्यतो वृत्तिं सज्जनशंकरं .... ।
...रश्लोकेनापि गरुनमस्कार एव क्रियते । कोऽभिप्रायः । उच्यते ।

गुरुभक्तिमतां ज्ञानं नान्यस्येति प्रतिपादनाय ।

आ शैलादुदया(त् तथा)स्तगिरितो भास्वद्यशोरश्मिभि-
र्व्याप्तं विश्वमनन्धकारमभवद्यस्य स्म शिष्यैरिदम् ।
आराद (जतानेन ? ज्ञान)गभस्तिभिः प्रतिहतश्चन्द्रायते भास्कर-
स्तस्मै शङ्करभानवे तनुमनोवाग्भिर्नमः स्तात् सदा ॥

Colophon :

इति श्रीमत्प्रत्यग्बोधपूज्यपादशिष्येण भगवता विश्वानु-भवाख्येन विरचितायां सुरेश्वरवार्तिकसम्बन्धोक्तावष्टमोऽध्यायः समाप्तः । समाप्ता चेयं सम्बन्धोक्तिः । रघुकुलतिलक-श्रीरामभक्तविशेषणादरणीयेति । श्रीमद्वाराणस्यास्थितेन भगवता परमहंसाचार्यश्रीविश्वानुभवाख्येन सुरेश्वरवार्तिकटीका कृतेति ।

लेखायत्ताख्यकुसुमैर्धूपचन्दनसंयुतैः ।
टीकाख्यदिव्यमालेयं ग्रथिता यतिना मया ॥
परमेश्वरपादाब्जपादपांसुजिघृक्षुणा ।
समर्पितेयमधुना परमेश्वरवक्षसि ॥

प्रमादाद् दृष्टिदोषाद्वा यदवद्यं मया कृतम् ।
लेखास्थान सु ? तत्सर्वं शोधनीयं प्रयत्नतः ॥
क्षन्तव्यं चैव तैः सर्वं तद्वि(दैः ? द्भिः) करुणाकरैः ।
स्वशिष्यपुत्रार्भकवत् कर्तव्योऽस्मास्वनुग्रहः ॥

श्रीरामचन्द्राय नमः । पद्मनाभो रक्षतु । शुभमस्तु । श्रीगुरुभ्यो नमः ।